११—(तम्) पूर्वोक्तम् (यज्ञम्) पूजनीयम् (प्रावृषा) प्र+वृषु प्रजननैश्वर्ययोः—क्विप्। नहिवृतिवृषि०। पा० ६। ३। ११६। पूर्वपदस्य दीर्घः। प्रकृष्टैश्वर्येण सह वर्तमानम् (प्र) प्रकर्षेण (औक्षन्) उक्ष सेचने। उक्षण उक्षतेर्वृद्धिकर्मणः—निरु० १२। ९। असिञ्चन्। हृदये शोधितवन्तः। अन्वेषणेन प्राप्तवन्तः (पुरुषम्) पूर्णं परमात्मानम् (जातम्) प्रसिद्धम् (अग्रशः)

(अग्रशः) पहिले से [सृष्टि के पूर्व से] (जातम्) प्रसिद्ध (पुरुषम्) पुरुष [पूर्ण परमात्मा] को (तेन) उस [पुण्य कर्म] से (प्र) भले प्रकार (औक्षन्) सींचा [स्वच्छ किया, खोजा] और (अयजन्त) पूजा ॥ ११ ॥

भावार्थ—विद्वान् लोग योगाभ्यास आदि तप के साथ पुण्य कर्म करके परमात्मा को खोजें और पूजें ॥ ११ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । ९० । ७ और यजुर्वेद—३१ । ९ ॥

तस्मादश्वा अजायन्त ये च के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १२ ॥

तस्मात् । अश्वाः । अजायन्त । ये । च । के । च । उभयात्ऽदतः ॥
गावः । ह । जज्ञिरे । तस्मात् । तस्मात् । जाताः । अज-अवयः ॥ १२ ॥

भाषार्थ—(तस्मात्) उस [पुरुष परमात्मा] से (अश्वाः) घोड़े (अजायन्त) उत्पन्न हुये, (च च) और [अन्य गदहा खच्चर आदि भी] (ये) जो (के) कोई (उभयादतः) दोनों ओर [नीचे ऊपर] दांतों वाले हैं । (तस्मात्) उससे (ह) ही (गावः) गौयें बैल [एक ओर दांत वाले पशु] (जज्ञिरे) उत्पन्न हुये, (तस्मात्) उससे (अजावयः) बकरी भेड़ (जाताः) उत्पन्न हुये ॥ १२ ॥

अग्रतः सृष्टेः प्राक् (तेन) पूर्वोक्तेन पुण्यकर्मणा (देवाः) विद्वांसः (अयजन्त) पूजितवन्तः (साध्याः) अ० ७ । ५ । १ । साधनवन्तः । योगाभ्यासिनः (वसवः) श्रेष्ठाः पुरुषाः (च) (ये) ॥

१२—(तस्मात्) पुरुषात् (अश्वाः) तुरङ्गाः (अजायन्त) उत्पन्नाः (ये) (के) (च) गर्दभखचरादयः (उभयादतः) छन्दसि च । पा० ५ । ४ । १४२ । दन्तस्य दतृभावः । अन्येषामपि दृश्यते । पा० ६ । ३ । १३७ । इति दीर्घः । ऊर्ध्वाधोभागयोरुभयोर्दन्तयुक्ताः (गावः) धेनुवृषभाः (ह) एव (जज्ञिरे) उत्पन्नाः (तस्मात्) (तस्मात्) (जाताः) (अजावयः) अजाश्चावयश्च ॥

भावार्थ—जिस परमेश्वर ने घोड़े गदहे, गौ, बैल बकरी भेड़ आदि उपकारी पशु उत्पन्न किये हैं; सब मनुष्य उसकी आज्ञा का पालन करते रहें ॥१२॥

यह मन्त्र ऋग्वेद में है—१० । ९० । १० और यजुर्वेद—३१ । ८ ॥

तस्माद् यज्ञात् सर्व॒हुत ऋचः सामानि जज्ञिरे ।

छन्दो ह जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥ १३ ॥

तस्मात् । यज्ञात् । । सर्व॒-हुतः । ऋचः । सामानि । जज्ञिरे ॥

छन्दः । ह । जज्ञिरे । तस्मात् । यजुः । तस्मात् । अजायत १३

भाषार्थ—(तस्मात्) उस (यज्ञात्) पूजनीय (सर्वहुतः) सब के दाता [अन्न आदि देने हारे] [पुरुष परमात्मा] से (ऋचः) ऋग्वेद [पदार्थों की गुणप्रकाशकविद्या] के मन्त्र और (सामानि) सामवेद [मोक्षविद्या] के मन्त्र (जज्ञिरे) उत्पन्न हुये । (तस्मात्) उससे (ह) ही (छन्दः) अथर्ववेद [आनन्ददायक विद्या] के मन्त्र (जज्ञिरे) उत्पन्न हुये, और (तस्मात्) उस से (यजुः) यजुर्वेद [सत्कर्मों का ज्ञान] (अजायत) उत्पन्न हुआ ॥ १३ ॥

भावार्थ—जिस परमात्मा ने संसार के हित के लिये ऋग्वेदादि चार वेद प्रकाशित किये हैं, सब मनुष्य उन वेदों के अनुकूल चलकर उसकी भक्ति करें ॥ १३ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । ९० । ९ और यजुर्वेद ३१।७॥

तस्माद् यज्ञात् सर्व॒हुतः संभृतं पृषदाज्यम् ।

पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ १४ ॥

तस्मात् । यज्ञात् । सर्व॒-हुतः । सम्-भृतम् । पृषत्-आज्यम् ॥

१३—(तस्मात्) पूर्वोक्तात् पुरुषात् (यज्ञात्) पूजनीयात् (सर्वहुतः) हु दानादानादनेषु—क्विप् । सर्वेभ्योऽन्नादिदातुः सकाशात् (ऋचः) ऋग्वेदस्य पदार्थगुणप्रकाशिकाया विद्याया मन्त्राः (सामानि) सामवेदस्य मोक्षज्ञानस्य मन्त्राः (जज्ञिरे) उत्पन्नाः (छन्दः) जसः सुः । छन्दांसि । अथर्ववेदस्य आह्लादकज्ञानस्य मन्त्राः (ह) निश्चयेन (जज्ञिरे) (तस्मात्) (यजुः) यजुर्वेदः । सत्कर्मणां ज्ञानम् (अजायत) ॥

पशून् । तान् । चक्रे । वायव्यान् । आरण्याः । ग्राम्याः । च । ये ॥ १४ ॥

भाषार्थ—(तस्मात्) उस (यज्ञात्) पूजनीय (सर्वहुतः) सब के दानी [अन्न आदि के देने हारे] [पुरुष परमात्मा] से (पृषदाज्यम्) दही, घी [आदि भोग्य पदार्थ] (संभृतम्) सिद्ध किया गया है। उसने (तान्) उन (पशून्) जीवों [दोपाये चौपायों] और (वायव्यान्) पवन में रहने वाले [पक्षी आदियों] को (चक्रे) बनाया, (ये) जो (आरण्याः) बनैले (च) और (ग्राम्याः) ग्राम के रहने वाले हैं ॥ १४ ॥

भावार्थ—जिस परमात्मा ने जगत् के हित के लिये सब भोग्य पदार्थ और सब बनैले और घरेलू जीव, जैसे मनुष्य, सिंह, बाघ, गाय, बैल तथा गिद्ध, चील, तोता, मैना, कीट, पतङ्ग आदि बनाये हैं, सब लोग उसकी उपासना से आत्मोन्नति करें ॥ १४ ॥

यह मन्त्र ऋग्वेद में है—१० । ६० । ८ और यजुर्वेद—३१ । ६ ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

सप्त । अस्य । आसन् । परि-धयः । त्रिः । सप्त । सम्-इधः । कृताः ॥ देवाः । यत् । यज्ञम् । तन्वानाः । अबध्नन् । पुरुषम् । पशुम् ॥ १५ ॥

१४—(तस्मात्) पूर्वोक्तात् पुरुषात् (यज्ञात्) पूजनीयात् (सर्वहुतः) म० १३ । सर्वेभ्योऽन्नादिदातुः सकाशात् (संभृतम्) सम्यग् धारितं सम्पादितम् (पृषदाज्यम्) दधिघृतादिभोग्यं वस्तु (पशून्) द्विपदश्चतुष्पदो जीवान् (चक्रे) जनयामास (वायव्यान्) वाय्वृतुपित्रुषसो यत् । पा० ४ । २ । ३१ । वायु—यत् । वायुदेवताकान् । वायुभवान् (आरण्याः) अरण्य—अण् । अरण्ये भवाः (ग्राम्याः) ग्रामाद्यखञौ । पा० ४ । २ । ९४ । ग्राम—यप्रत्ययः । ग्रामे भवाः (च) (ये) ॥

भाषार्थ—(यत्) जब कि (यज्ञम्) [संसार रूप] यज्ञ को (तन्वानाः) फैलाते हुये (देवाः) विद्वानों ने (पशुम्) दर्शनीय (पुरुषम्) पुरुष [पूर्ण परमात्मा] को (अबध्नन्) [हृदय में] बांधा, [तब] (सप्त) सात [तीन काल, तीन लोक अर्थात् सृष्टि स्थिति और प्रलय और एक जीवात्मा] (अस्य) इस [संसार रूप यज्ञ] के (परिधयः) घेरे समान (आसन्) थे, और (त्रिःसप्त) तीन बार सात [इक्कीस अर्थात् पांच सूक्ष्म भूत, पांच स्थूल भूत, पांच ज्ञानेन्द्रिय, पांच कर्मेन्द्रिय और एक अन्तःकरण] (समिधः) समिधायें [काष्ठ घृत आदि के समान] (कृताः) किये गये ॥१५॥

भावार्थ—जब विद्वान् लोग परमात्मा का ध्यान करते हुये संसार को यज्ञ समान मानें, तो जैसे यज्ञ के लिये वेदी वा हवन कुण्ड और काष्ठ घृत आदि सामग्री आवश्यक हैं, वैसे ही संसार में सृष्टि के लिये मन्त्रोक्त काल आदि सब पदार्थ आवश्यक होते हैं ॥ १५ ॥

यह मन्त्र ऋग्वेद में है—१० । ९० । १५ और यजुर्वेद ३१ । १५ ॥

मूर्ध्नो देवस्य बृहतो अंशवः सप्त सप्ततीः ।
राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥ १६ ॥

मूर्ध्नः । देवस्य । बृहतः । अंशवः । सप्त । सप्ततीः ॥
राज्ञः । सोमस्य । अजायन्त । जातस्य । पुरुषात् । अधि ॥१६

भाषार्थ—(पुरुषात्) पुरुष [पूर्ण परमात्मा] से (अधि) अधिकार

१५—(सप्त) कालत्रयेण, लोकत्रयेण अर्थात् सृष्टिस्थितिप्रलयेन सह जीवात्मा (अस्य) यज्ञस्य (आसन्) (परिधयः) परितः सर्वतो धीयन्ते ये ते । गोलमण्डलस्य परितो वेष्टनरूपाः (त्रिःसप्त) त्रिवारं सप्त, एक विंशतिसंख्याकाः । पञ्च सूक्ष्मभूतानि, पञ्च स्थूलभूतानि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकमन्तःकरणं चेति (समिधः) काष्ठघृतादिसामग्रीभूताः (कृताः) निष्पादिताः (देवाः) विद्वांसः (यत्) यदा (यज्ञम्) संसाररूपं यज्ञम् (तन्वानाः) विस्तृणन्तः (अबध्नन्) मनसि धारितवन्तः (पुरुषम्) पूर्णं परमात्मानम् (पशुम्) दर्शनीयम् ॥

१६—(मूर्ध्नः) मस्तकस्य (देवस्य) प्रकाशमानस्य सूर्यस्य (बृहतः) -

पूर्वक (जातस्य) उत्पन्न हुये (बृहतः) बड़े (देवस्य) प्रकाशमान सूर्य के (मूर्ध्नः) मस्तक की (सप्त) सात [वर्ण वाली] (सप्ततीः) नित्य सम्बन्ध वाली [अथवा सात गुणित सत्तर, चार सौ नव्वे अर्थात् असंख्य] (अंशवः) किरणें (राज्ञः) प्रकाशमान (सोमस्य) चन्द्रमा की [किरणें] (अजायन्त) प्रकट हुयी हैं ॥ १६ ॥

भावार्थ—सृष्टिक्रम विचारने वाले विद्वान् लोगों को जानना चाहिये कि परमात्मा के नियम से शुक्ल, नील, पीत, रक्त, हरित, कपिश और चित्र वर्ण वाली अथवा असंख्य किरणें पृथिवी की अपेक्षा बड़े सूर्य से आकर चन्द्रमा को प्रकाशित करती हैं ॥ १६ ॥

यह मन्त्र अन्य वेदों में नहीं है ॥

सूक्तम् ७ [नक्षत्रसूक्तम्] ॥

१—५ ॥ नक्षत्राणि देवताः ॥ १ निचृत् त्रिष्टुप् ; २, ३, ५ त्रिष्टुप्, ४ भुरिक् त्रिष्टुप् ॥

ज्योतिषविद्योपदेशः—ज्योतिष विद्या का उपदेश ॥

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।
तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम् ॥१

चित्राणि । साकम् । दिवि । रोचनानि । सरीसृपाणि । भुवने । जवानि ॥ तुर्मिशम् । सु-मतिम् । इच्छमानः । अहानि । गीः-भिः । सपर्यामि । नाकम् ॥ १ ॥

पृथिव्यादिलोकेभ्यो महतः (अंशवः) किरणाः (सप्त) अ० ८ । ५ । १५ शप्यशुभ्यां तुट् च । उ० १ । १५७ । षप समवाये—कनिन् तुट् च । शुक्लनील-पीतादिसप्तवर्णाः (सप्ततीः) वहिवस्यर्त्तिभ्यश्चित् । उ० ४ । ६० । षप समवाये-अतिप्रत्ययः, चित् तुट् च, यथा वेतसशब्देऽपि—उ० ३ । ११८ । छान्दसं रूपम् । सप्ततयः । नित्यपरस्परसम्बद्धाः । अथवा (सप्त सप्ततीः) सप्त सप्ततयः सप्तगुणितसप्ततिसंख्याका दशोनपञ्चशतसंख्याकाः । असंख्या इत्यर्थः (राज्ञः) दीप्यमानस्य (सोमस्य) चन्द्रलोकस्य (अजायन्त) प्रादुरभवन् (जातस्य) उत्पन्नस्य (पुरुषात्) पूर्णात् परमेश्वरात् (अधि) अधिकारपूर्वकम् ॥

भाषार्थ—(दिवि) आकाश के बीच (भुवने) संसार में (चित्राणि) विचित्र, (साकम्) परस्पर (सरीसृपाणि) टेढ़े टेढ़े चलने वाले, (जवानि) वेग गति वाले (रोचनानि) चमकते हुये नक्षत्र हैं। (तुर्मिशम्) वेग की ध्वनि [वा समाधि] को और (सुमतिम्) सुमति को (इच्छमानः) चाहता हुआ मैं (अहानि) सब दिन (गीर्भिः) वेदवाणियों से (नाकम्) सुखस्वरूप परमात्मा को (सपर्यामि) पूजता हूं ॥ १ ॥

भावार्थ—जैसे परस्पर आकर्षण से शीघ्र गति के साथ चलकर यह तारागण संसार का उपकार करते हैं, वैसे ही मनुष्य परमात्मा की महिमा को वेद द्वारा गाते हुये परस्पर मेल करके शीघ्रता के साथ सुमति से अपना कर्त्तव्य करते रहें ॥ १ ॥

सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा ।
पुनर्वसू सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे ॥ २ ॥

सु-हवम् । अग्ने । कृत्तिकाः । रोहिणी । च । अस्तु । भद्रम् । मृग-शिरः । शम् । आर्द्रा ॥ पुनर्वसू इति पुनः-वसू । सूनृता । चारु । पुष्यः । भानुः । आ-श्लेषाः । अयनम् । मघाः । मे ।२

भाषार्थ—(अग्ने) हे अग्ने ! [सर्वव्यापक परमात्मन्] (कृत्तिकाः)

१—(चित्राणि) विचित्राणि । अद्भुतानि (साकम्) सह । परस्परम् (दिवि) आकाशे । सूर्यप्रकाशे (रोचनानि) रुच दीप्तावभिप्रीतौ च—युच् । दीप्यमानानि नक्षत्राणि (सरीसृपाणि) सृपेर्यङ्लुगन्तात् पचाद्यच् । नित्यं कौटिल्ये गतौ । पा० ३ । १ । २३ । इति कौटिल्ये—यङ् । वक्रगतीनि (भुवने) संसारे (जवानि) शीघ्रगामीनि । अनुक्षणमावर्त्तमानानि (तुर्मिशम्) तुर त्वरणे—क्विप् + मिश शब्दे रोषकृते समाधौ च—कप्रत्ययः । तुरो वेगस्य मिशं ध्वनिं समाधिं वा (सुमतिम्) कल्याणबुद्धिम् (इच्छमानः) इच्छन् । कामयमानः (अहानि) कालसंयोगे द्वितीया । सर्वाणि दिनानि (गीर्भिः) वेदवाग्भिः (सपर्यामि) परिचरामि —निघ० ३ । ५ । अहं सेवे (नाकम्) सुखस्वरूपं परमात्मानम् ॥

२—(सुहवम्) अ० ३ । २० । ६ । ईषद्दुःसुषु० । पा० ३ । ३ । १२६ ।

कृत्तिकायें (च) और (रोहिणी) रोहिणी (सुहवम्) सुख से बुलाने योग्य [नक्षत्र] (अस्तु) होवे, (मृगशिरः) मृगशिर (भद्रम्) मङ्गलप्रद [नक्षत्र] और (आर्द्रा) आर्द्रा [जलयुक्त](शम्) शान्तिदायक [होवे]। (पुनर्वसू) दो पुनर्वसू और (भानुः) प्रकाशमान (पुष्यः) पुष्य (सुनृता) सुन्दर चेष्टा के साथ (चारु) अनुकूल, और (आश्लेषाः) आश्लेषायें और (मघाः) मघायें (मे) मेरे लिये (अयनम्) सुन्दर मार्ग वाला [नक्षत्र होवे] ॥ २ ॥

भावार्थ—मनुष्य ज्योतिष शास्त्र के द्वारा नक्षत्रों वा तारागणों का परस्पर सम्बन्ध और चन्द्रमा आदि के साथ संसर्ग और अन्न वायु जल आदि

सु+ह्वयतेः—खल्, यद्वा सु+हु दानादानादनेषु—अप्। सुखेनाह्वातव्यं ग्राह्यं वा नक्षत्रम् (अग्ने) हे सर्वव्यापक परमात्मन् (कृत्तिकाः) अ० ६। ७। ३। कृतिभिदिलतिभ्यः कित्। उ०३। १४७। कृती छेदने वेष्टने च—तिकन्, टाप् छेदनशीला वेष्टनशीला। अग्निशिखाकृति, षट्तारकामयम्, अश्विन्यादिषु तृतीयनक्षत्रम् (रोहिणी) अ० १। २२। ३। रुहेश्च। उ० २। ५५। रुह बीजजन्मनि प्रादुर्भावे च-इनन्, ङीष्। रोहयति जनयति स्वास्थ्यं या सा। शुक्राकृति, पञ्चतारात्मकम्, अश्विन्यादिषु चतुर्थनक्षत्रम् (च) (अस्तु) (भद्रम्) मङ्गलप्रदम् (मृगशिरः) मृगस्येव शिरो यस्य। विडालाकृति तारात्रयात्मकं पञ्चमनक्षत्रम् (शम्) सुखप्रदम् (आर्द्रा) अ० १। ३२। ३। अर्देर्दीर्घश्च। उ० २। १८। अर्द वधे याचने गतौ च—रक्, दीर्घश्च। क्लेदनस्वभावा, सजला पद्माकृत्युज्ज्वलैकतारकामयं षष्ठनक्षत्रम् (पुनर्वसू) पुनर्+वस—उ। पुनः पुनश्चन्द्रं वसतः। छन्दसि पुनर्वस्वोरेकवचनम्। पा० १। २। ६१। इति विकल्पकत्वाद् द्विवचनम्। यामकौ, आदित्यौ, पुनर्वसुः। धनुराकृति पञ्चतारात्मकं सप्तमनक्षत्रम् (सुनृता) अ० ३। १२। २। सु+नृती नर्तने-घञर्थे क। विभक्तेराकारादेशः। सुनर्तनेन। सुचेष्टनेन (चारु) मनोहरम्। अनुकूलं नक्षत्रम् (पुष्यः) पुष्यसिद्ध्यौ नक्षत्रे। पा० ३। १। ११६। पुष पुष्टौ—क्यप्। पुष्णाति पदार्थान् सिद्ध्यः। वाणाकृत्येकातारात्मकम्, अष्टमनक्षत्रम् (भानुः) भा दीप्तौ-नु। प्रकाशमानः (आश्लेषाः) आङ् ईषत्+श्लिष आलिङ्गने—घञ् अश्लेषा। चक्राकृति षट्तारात्मकं नवमनक्षत्रम् (अयनम्) अर्शआद्यच् सुमार्गयुक्तं नक्षत्रम् (मघाः) मह पूजायाम्—घ प्रत्ययः; टाप्। लाङ्गलाकृति गृहाकृति वा पञ्चतारात्मकं दशमनक्षत्रम् ॥

पर उन की गति के प्रभाव को समझ कर परमात्मा की अनन्त शक्ति को विचारते हुये अपना सामर्थ्य बढ़ावें ॥ २ ॥

इस मन्त्र में इन नक्षत्रों का वर्णन है। १—कृत्तिकायें [छेदने वाली वा घेरने वाली अर्थात् उग्र स्वभाव वाली, अग्निशिखा—आकृति, छह तारापुञ्ज, अश्विनी नक्षत्र से तीसरा नक्षत्र], २—रोहिणी [स्वास्थ्य उपजाने वाली, शुक्र—आकृति, पांच तारापुञ्ज, अश्विनी से चौथा नक्षत्र-इसी प्रकार आगे भी अश्विनी से गणना जानो], ३—मृगशिर [मृग के शिर समान शिर वाला, विडाल—आकृति, तीन तारापुञ्ज, पांचवां नक्षत्र], ४—आर्द्रा [भीजी हुयी वा सजल, पद्म—आकृति, उज्ज्वल, एक तारा, छठा नक्षत्र], ५—दो पुनर्वसु [बार बार नक्षत्रों में रहने हारे, धनुष—आकृति, पांच [वा दो वा चार] तारापुञ्ज, सातवां नक्षत्र], ६—पुष्य [पोषण करने वाला, दूसरा नाम तिष्य, बाण—आकृति, एक तारा, आठवां नक्षत्र], ७—आश्लेषायें [कुछ मिली हुयीं, दूसरा नाम अश्लेषा, चक्र—आकृति छह तारापुञ्ज, नवां नक्षत्र], ८—मघायें [पूजा योग्य, हल वा घर—आकृति, पांच तारापुञ्ज, दशवां नक्षत्र] ॥

पुण्यं॒ पूर्वा॒ फल्गु॑न्यौ॒ चात्र॒ हस्त॑श्चि॒त्रा शि॒वा स्वा॒ति सु॒खो मे॑ अस्तु। राधे॑ वि॒शाखे॑ सु॒हवा॑नुरा॒धा ज्येष्ठा॑ सु॒नक्ष॑त्र॒मरि॑ष्ट॒ मूल॑म् ॥ ३ ॥

पुण्य॑म्। पूर्वा॑। फल्गु॑न्यौ। च॒। अत्र॑। हस्त॑:। चि॒त्रा। शि॒वा। स्वा॒ति। सु॒-खः। मे॒। अ॒स्तु॒॥ राधे॑। वि॒-शाखे॑। सु॒-हवा॑। अ॒नु॒-रा॒धा। ज्येष्ठा॑। सु॒-नक्ष॑त्रम्। अरि॑ष्ट। मूल॑म् ३

भाषार्थ—(अत्र) यहां (पूर्वा) पूर्वा [पहिली] (च) और [उत्तरा वा पिछली] (फल्गुन्यौ) दोनों फल्गुनी (पुण्यम्) पवित्र [नक्षत्र], (हस्तः) हस्त (सुखः) सुख देने वाला और (चित्रा) चित्रा

३—(पुण्यम्) शुद्धं नक्षत्रम् (पूर्वा) पूर्वभवा (फल्गुन्यौ) अ० १४। १। १३। फलेगुक् च। उ० ३। ५६। फल निष्पत्तौ—उनन्, गुक् च, ङीप्। फलन्ति वृक्षा यत्र। पूर्वाफल्गुनी उत्तराफल्गुनी च द्वे। फल्गुनी प्रोष्ठपदानां च नक्षत्रे। पा० १। २। ६०। इति द्विवचनं वा। खट्वाकृति ताराकाद्वयात्मकमे-

तथा (स्वाति) स्वाति (शिवा) मङ्गलकारक (मे) मेरे लिये (अस्तु) होवे। (राधे) हे सिद्धि करने वाली ! (विशाखे) विशाखा तू (सुहवा) सुख से बुलाने योग्य [हो], (अनुराधा) अनुराधा और (ज्येष्ठा) ज्येष्ठा [सुख से बुलाने योग्य होवे] और (सुनक्षत्रम्) सुन्दर नक्षत्र (मूलम्) मूल (अरिष्ट) हानि रहित [होवे] ॥ ३ ॥

भावार्थ—मन्त्र २ के समान है ॥ ३ ॥

इस मन्त्र में इन नक्षत्रों का वर्णन है । ९—पूर्वाफल्गुनी [पहिली फल्गुनी वा फल उत्पन्न करने वाली, खाट की आकृति, दो तारापुञ्ज, ग्यारहवां नक्षत्र], १०—उत्तराफल्गुनी [पिछली फल्गुनी फल उत्पन्न करने वाली, खाट की आकृति, दो तारापुञ्ज बारहवां नक्षत्र] ११–हस्त, [हाथ की आकृति, पांच तारापुञ्ज, तेरहवां नक्षत्र], १२—चित्रा [विचित्र वा अद्भुत, मोती समान उज्ज्वल, एक तारा, चौदहवां नक्षत्र], १३—स्वाति [अपने आप चलने वाली कुंकुम समान लाल, एक तारा, पन्द्रहवां नक्षत्र], १४—विशाखा [विशेष

कादशनक्षत्रम् (च) उत्तराफल्गुनी, पूर्ववत, द्वादशनक्षत्रम् (अत्र) अस्मिन् नक्षत्रगणे (हस्तः) हसिमृग्रिण्० । उ० ३ । ८६ । हस विकाशे--तन् । हस्ता । हस्ताकृति पञ्चतारात्मकं त्रयोदशनक्षत्रम् (चित्रा) चित्र लेख्ये अद्भुते च—अच्, टाप् । मुक्तावदुज्ज्वलमेकतारात्मकं चतुर्दशनक्षत्रम् (शिवा) मङ्गलकारिणी (स्वाति) स्व + अत सातत्यगमने–इन्, सोलुक् । स्वातिः । स्वेनैवाततीति कुङ्कुमसदृशारुणैकतारात्मकं पञ्चदशनक्षत्रम् (सुखः) सुखप्रदः (मे) मह्यम् (अस्तु) राधे) राध्नोति साधयति कार्याणि, राध संसिद्धौ—अच्, टाप् । हे सिद्धिकारिके। एतद् विशाखा नक्षत्रस्य नामापि (विशाखे) वि + शाखृ व्याप्तौ-अच्, टाप् । विशिष्टाः शाखाः प्रकारा यस्याः सा तत्सम्बुद्धौ । तोरणाकारचतुस्तारामयं षोडशनक्षत्रम् (सुहवा) सुष्ठु आह्वातव्या (अनुराधा) राधां विशाखामनुगता। सर्पाकृति सप्ततारामयं सप्तदशनक्षत्रम् (ज्येष्ठा) सर्ववृद्धा सर्वश्रेष्ठा वा । शूकरदन्ताकृति तारात्रयात्मकम्, अष्टादशनक्षत्रम् (सुनक्षत्रम्) णक्ष गतौ—अत्रन् । शोभनं गमनशीलं नक्षत्रम् (अरिष्ट) रिष हिंसायाम्–क्त । विभक्तेर्लुक् । अरिष्टम् । अहिंसितम् । शुभम् (मूलम्) मूल प्रतिष्ठायाम्—क, यद्वा । मूशक्यविभ्यः क्लः । उ० ४ । १०८ । मूङ् बन्धने—क्ल, सिंहपुच्छाकारं शङ्खमूर्ति वा नवतारामयम्, ऊनविंशनक्षत्रम् ॥

शाखाओं वाली, इसका नाम (राधा) सिद्धि करने वाली भी है, तोरण वा बड़े द्वार समान आकृति, चार तारापुञ्ज, सोलहवां नक्षत्र], १५—अनुराधा [राधा अर्थात् विशाखा के पीछे चलने वाली, सर्प-आकृति, सात तारापुञ्ज, सत्तरहवां नक्षत्र], १६—ज्येष्ठा [सब से बड़ी वा श्रेष्ठ, सूअर के दांत की आकृति, तीन तारापुञ्ज, अठारहवां नक्षत्र], १७—मूल [वा मूला अर्थात् जड़ समान दृढ़, सिंहपूछ-आकृति वा शंख मूर्ति, नव तारापुञ्ज, उन्नीसवां नक्षत्र] ॥

अन्नं पूर्वा रासतां मे अषाढा ऊर्जं देव्युत्तरा आ वहन्तु ।
अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम् ॥४

अन्नम् । पूर्वा । रासताम् । मे । अषाढाः । ऊर्जम् । देवी । उत्-तराः । आ । वहन्तु ॥ अभि-जित् । मे । रासताम् । पुण्यम् । एव । श्रवणः । श्रविष्ठाः । कुर्वताम् । सु-पुष्टिम् ॥४

भाषार्थ—(पूर्वा) पूर्वा [पहिली] (अषाढाः) अषाढ़ायें (मे) मेरे लिये (अन्नम्) अन्न (रासताम्) देवें, और (देवी) चमकीली (उत्तराः) उत्तरायें [पिछली अर्थात् उत्तरा-अषाढायें] (ऊर्जम्) पराक्रम (आ वहन्तु) लावें । (अभिजित्) अभिजित् (मे) मेरे लिये (पुण्यम्) पुण्य कर्म (एव) ही (रासताम्) देवे, (श्रवणः) श्रवण और (श्रविष्ठाः) श्रविष्ठायें (सुपुष्टिम्)

४—(अन्नम्) जीवनसाधनं भक्षणीयं पदार्थं वा (पूर्वा) बहुवचनस्यैकवचनम् । पूर्वाः । प्रथमभवाः (रासताम्) रासतीति दानकर्मा—निघ० ३ । २० । रासृ दाने शब्दे च—लोट्, बहुवचनम्, अदादित्वं छान्दसम् । ददतु (मे) मह्यम् (अषाढाः) नञ्+षह मर्षणे-अण, टाप् । शूर्पाकृति चतुस्तारात्मकं विंशनक्षत्रम् (ऊर्जम्) पराक्रमम् (देवी) देव्यः । प्रकाशमानाः (उत्तराः) उत्तरे भवाः । उत्तराषाढाः । शूर्पाकृति ताराचतुष्टयात्मकमेकविंशनक्षत्रम् (अभिजित्) अभि + जि जये—क्विप् । उत्तराषाढायाः शेषपञ्चदशदण्डाः श्रवणायाः प्रथमदण्डचतुष्टयम् एतदूनविंशतिदण्डात्मकं नक्षत्रम्, तारकात्रयात्मकं शृङ्गाटकाकृति (मे) मह्यम् (रासताम्) रासृ दाने, भ्वादिः, आत्मनेपदम् । ददातु । प्रयच्छतु (पुण्यम्), शुभम् (एव) अवधारणे (श्रवणः) श्रु गतौ श्रवणे च—ल्युट् । शराकृति, तारात्रयात्मकं द्वाविंशनक्षत्रम् (श्रविष्ठाः) श्रु

बहुत पुष्टि (कुर्वताम्) करें ॥ ४॥

भावार्थ—मन्त्र २ के समान है ॥ ४ ॥

इस मन्त्र में इन नक्षत्रों का वर्णन है। १८—पूर्वा—अषाढ़ा [यद्वा पूर्वा—आषाढा = पूर्वाषाढा, सूप—आकृति, चार तारापुञ्ज, बीसवां नक्षत्र], १९—उत्तरा—अषाढ़ा [यद्वा उत्तरा—आषाढा = उत्तराषाढ़ा, सूप—आकृति, चार तारापुञ्ज, इक्कीसवां नक्षत्र], २०—अभिजित् [सब ओर से जीतने वाला, उत्तराषाढ़ा नक्षत्र के शेष पन्द्रह दण्ड और श्रवण नक्षत्र के पहिले चार दण्ड, उन्नीस दण्ड वाला तारा विशेष, सिंगाड़े की आकृति, तीन तारा-पुञ्ज], २१—श्रवण [यद्वा श्रवण, सुनने वाला वा चलने वाला, तीर की आकृति, तीन तारापुञ्ज, बाइसवां नक्षत्र], २२—श्रविष्ठायें [अत्यन्त विख्यात, यद्वा धनिष्ठा बहुत धन वाली, मृदङ्ग—आकृति, पांच तारापुञ्ज तेइसवां नक्षत्र]॥

आ मे॑ म॒हच्छ॒तभि॑षग् वरी॑य॒ आ मे॑ द्व॒या प्रोष्ठ॑पदा सु॒शर्म॑ ।
आ रे॒वती॑ चाश्वयु॒जौ भगं॑ म॒ आ मे॑ र॒यिं भर॑ण्य॒ आ व॑हन्तु ॥५॥

आ । मे॒ । म॒हत् । श॒त-भि॑षक् । वरी॑यः । आ । मे॒ । द्व॒या । प्रोष्ठ॑-पदा । सु॒-शर्म॑ ॥ आ । रे॒वती॑ । च॒ । अ॒श्व॒-यु॒जौ । भग॑म् । मे॒ । आ । मे॒ । र॒यिम् । भर॑ण्यः । आ । व॒ह॒न्तु॒ ॥५॥

भाषार्थ—(शतभिषक्) शतभिषज् (मे) मेरे लिये (वरीयः) अधिक विस्तृत (महत्) बड़ाई (आ = आ वहतु) लावे, (द्वया) द्विगुनी (प्रोष्ठपदा) प्रोष्ठपदा (मे) मेरे लिये (सुशर्म) बड़ा सुख (आ = आ वहतु) लावे। (रेवती) रेवती (च) और (अश्वयुजौ) दो अश्वयुज (मे) मेरे लिये (भगम्) ऐश्वर्य (आ = आ वहन्तु) लावें, (आ) और (भरण्यः) भरणियें

श्रवणे--अप्, श्रवः--मतुप्, इष्ठन्। अतिशयेन श्रवणीयाः प्रख्याताः। धनिष्ठा-नक्षत्रम्। मर्दलाकृति पञ्चतारात्मकं त्रयोविंशनक्षत्रम् (कुर्वताम्) कुर्वन्तु (सुपुष्टिम्) बहुवृद्धिम् ॥

५—(आ) आ वहतु (मे) मह्यम् (महत्) महत्त्वम् (शतभिषक्) शतं भिषज इव तारा यत्र। शतभिषा मण्डलाकाराकृति शततारामयं चतु-र्विंशनक्षत्रम् (वरीयः) उरुतरम् (आ) आ वहतु (मे) (द्वया) ङीपः स्थाने टाप्। द्विप्रकारा (प्रोष्ठपदा) प्रकृष्टो ओष्ठोऽस्येति प्रोष्ठो गौः, भद्रश्च गौस्तस्येव पादा

(मे) मेरे लिये (रयिम्) धन (आ वहन्तु) लावें ॥ ५ ॥

भावार्थ—मन्त्र २ के समान है ॥ ५ ॥

इस मन्त्र में इन नक्षत्रों का वर्णन है । २३—शतभिषज् [वैद्यों के समान सौ तारा वाला, यद्वा शतभिषा और सायण भाष्य में शतविशाखा, मण्डलाकार—आकृति, सौ तारापुञ्ज, चौबीसवां नक्षत्र], २४, २५ दोनों प्रोष्ठपदा अर्थात् पूर्वा भाद्रपदा और उत्तरा भाद्रपदा [प्रोष्ठपदा वा भाद्रपदा=बैल वा गौ के समान पांव वाली, पूर्वा भाद्रपदा दाहिनी और बाईं ओर वर्तमान खाट की आकृति दो तारापुञ्ज, उत्तरा भाद्रपदा, खाट की आकृति, आठ तारापुञ्ज], २६—रेवती [चलती हुयी । मछली की आकृति, बत्तीस तारापुञ्ज, सत्ताइसवां नक्षत्र], २७—दो अश्वयुज् [दो घुड़चढ़े अथवा अश्विनी नक्षत्र, घुड़चढ़े पुरुष के समान आकृति वा घोड़ों के मुख समान आकृति, तीन तारापुञ्ज पहिला नक्षत्र], २८—भरणियां [पालने वाली, त्रिकोण—आकृति, तीन तारापुञ्ज दूसरा नक्षत्र] ॥

संक्षेप मन्त्र २—५ ॥

वेद में २८ नक्षत्र हैं—१ कृत्तिका, २ रोहिणी, ३ मृगशिर, ४ आर्द्रा, ५ पुनर्वसु, ६ पुष्य, ७ आश्लेषा [वा अश्लेषा], ८ मघा, ९ पूर्वा फल्गुनी, १० उत्तरा फल्गुनी, ११ हस्त, १२ चित्रा, १३ स्वाति, १४ विशाखा, १५ अनुराधा, १६ ज्येष्ठा, १७ मूल, १८ पूर्वा—अषाढ़ा, १९ उत्तरा—अषाढ़ा, २० अभिजित्,

---

यस्याःसा । सुप्रातसुश्वसुदिवशारि० । पा० ५ । ४ । १२० । इत्यच् । पूर्वभाद्रपदा नक्षत्रम् । उत्तरभाद्रपदा नक्षत्रं च । पूर्वभाद्रपदा दक्षिणोत्तरवर्ति खट्वाकृति तारकाद्वयात्मकं पञ्चविंशनक्षत्रम् । उत्तरभाद्रपदा। पर्यङ्करूपमष्टतारात्मकं षड्विंशनक्षत्रम् (सुशर्म) बहुसुखम् (रेवती) अ० ३ । ४ । ७ । रेवृ गतौ—अतच्, ङीष् । मत्स्याकृति द्वात्रिंशत् तारात्मकं सप्तविंशनक्षत्रम् (च) (अश्वयुजा) अश्व+युजिर् योगे-क्विप् । अश्वं युनक्ति रूपेणानुकरोति । अश्विनी । अश्वारूढपुरुषस्य रूपयुक्तं यद्वा घोटकमुखाकृति तारात्रयात्मकं प्रथमनक्षत्रम् (भगम्) ऐश्वर्यम् (मे) मह्यम् (आ) चार्थे (मे) (रयिम्) धनम् (भरण्यः) डु भृञ् धारणपोषणयोः ल्यु, ङीष् । तारकात्रयमितत्रिकोणाकृति द्वितीयं नक्षत्रम् (आ वहन्तु) आनयन्तु ॥

२१ श्रवण, २२ श्रविष्ठा, [वा धनिष्ठा], २३ शतभिषज् वा शतभिषा, २४ तथा २५ दोनों प्रोष्ठपदा [वा पूर्वा भाद्रपदा और उत्तरा भाद्र-पद], २६ रेवती, २७ दो अश्वयुज् [वा अश्विनी] और २८ भरणी, [सूक्त ८ मन्त्र १, २ भी देखो] ॥

प्राचीन ज्योतिष ग्रन्थ सूर्य सिद्धान्त अध्याय ८ श्लोक २—६ में अश्विनी से रेवती तक २८ नक्षत्र इस प्रकार है। १ अश्विनी, २ भरणी, ३ कृत्तिका, ४ रोहिणी, ५ मृगशिरा, ६ आर्द्रा ७ पुनर्वसु, ८ पुष्य, ९ अश्लेषा, १० मघा, ११ पूर्वाफल्गुनी, १२ उत्तराफल्गुनी, १३ हस्त, १४ चित्रा, १५ स्वाती, १६ विशाखा, १७ अनुराधा, १८ ज्येष्ठा, १९ मूल [वा मूला], २० पूर्वाषाढ़ा, २१ उत्तराषाढ़ा, २२ अभिजित्, २३ श्रवण, २४ धनिष्ठा [वा श्रविष्ठा], २५ शतभिषा [वा शतभिषज्], २६ पूर्वभाद्रपदा, २७ उत्तरभाद्रपदा, २८ रेवती ॥

शब्दकल्पद्रुम कोश में पूर्वोक्त अश्विनी से रेवती तक २७ और २८ वां अभिजित् है। महर्षि दयानन्द कृत संस्कार विधि नाम करण प्रकरण की टिप्पणी में अश्विनी से रेवती तक २७ नक्षत्र हैं, अभिजित् नहीं है ॥

सूक्तम् ८ ॥

१—७ अग्निः सविता ब्रह्मणस्पतिर्वा देवता ॥ १ विराडार्षी जगती; २ निचृदार्षी त्रिष्टुप्; ३ भुरिगार्षी पङ्क्तिः; ४ निचृदनुष्टुप्; ५, ६ अनुष्टुप्; ७ आर्ची गायत्री ॥

सुखप्राप्त्युपदेशः—सुख की प्राप्ति का उपदेश ॥

मन्त्रौ १,२ [नक्षत्रसूक्तम्] ॥

यानि नक्षत्राणि दिव्य१न्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु। प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु ॥१

यानि। नक्षत्राणि। दिवि। अन्तरिक्षे। अप्-सु। भूमौ। यानि। नगेषु। दिक्षु॥ प्र-कल्पयन्। चन्द्रमाः। यानि। एति। सर्वाणि। मम। एतानि। शिवानि। सन्तु ॥ १ ॥

भाषार्थ—(यानि) जिन (नक्षत्राणि) नक्षत्रों [चलने वाले लोकों] को (दिवि) आकाश के भीतर (अन्तरिक्षे) मध्यलोक में, (यानि) जिन

१—(यानि) (नक्षत्राणि) गमनशीलान् लोकान् (दिवि) आकाशे (अन्तरिक्षे) मध्यलोके (अप्सु) उदकानामुपरि (भूमौ) भूमेरुपरि (यानि)

[नक्षत्रों] को (अप्सु) जल के ऊपर और (भूमौ) भूमि के ऊपर और (यानि) जिन [नक्षत्रों] को (नगेषु) पहाड़ों के ऊपर (दिक्षु) सब दिशाओं में (चन्द्रमाः) चन्द्रमा (प्रकल्पयन्) समर्थ करता हुआ(याति)चलता है, (एतानि) यह (सर्वाणि) सब [नक्षत्र] (मम) मेरे (शिवानि) सुख देने हारे (सन्तु) होवें ॥ १ ॥

भावार्थ—जो नक्षत्र [सूक्त ७] अपने तारागणों के साथ चन्द्रमा के आकर्षण और गतिमार्ग में घूमकर वायु द्वारा जल पृथिवी आदि पर प्रभाव डाल कर अन्न स्वास्थ्य आदि बढ़ाने का कारण हैं, विद्वान् लोग उन नक्षत्रों के ज्योतिष ज्ञान से दूरदर्शी होकर विघ्नों को हटा कर सुख पावें ॥ १ ॥

अ॒ष्टा॒विं॒शानि॑ शि॒वानि॑ श॒ग्मानि॑ स॒ह योगं॑ भजन्तु मे । योगं॒ प्र प॑द्ये॒ क्षेमं॑ च॒ क्षेमं॒ प्र प॑द्ये॒ योगं॑ च॒ नमो॑ऽहोरा॒त्राभ्या॑मस्तु २

अ॒ष्टा-वि॒शानि॑ । शि॒वानि॑ । श॒ग्मानि॑ । स॒ह । योग॑म् । भ॒ज॒न्तु॒ । मे॒ ॥ योग॑म् । प्र । प॒द्ये॒ । क्षेम॑म् । च॒ । क्षेम॑म् । प्र । प॒द्ये॒ । योग॑म् । च॒ । नमः॑ । अ॒हो॒रा॒त्राभ्या॑म् । अ॒स्तु॒ ॥ २ ॥

भाषार्थ—(अष्टाविंशानि) प्रत्येक अट्ठाइसवें [नक्षत्र] (शिवानि) कल्याण कारक और (शग्मानि) सुखदायक होकर (सह) मेल के साथ (मे) मुझ को (योगम्) प्राप्ति सामर्थ्य (भजन्तु) देवें । (योगम्)प्राप्ति सामर्थ्य को (च) और (क्षेमम्) रक्षा सामर्थ्य को [अर्थात् पाने के सामर्थ्य के साथ

नक्षत्राणि (नगेषु) पर्वतानामुपरि (दिक्षु) सर्वासु दिक्षु (प्रकल्पयन्) समर्थानि कुर्वन् । प्रोत्साहयन् (चन्द्रमाः) चन्द्रलोकः (यानि) नक्षत्राणि (एति) गच्छति (सर्वाणि) (मम) (एतानि) नक्षत्राणि (शिवानि) सुखकराणि (सन्तु) भवन्तु ॥

२—(अष्टाविंशानि) तस्य पूरणे डट् । पा० ५ । २ । ४८ । अष्टाविंशति-डट् पूरणार्थे । ति विंशतेर्डिति । पा० ६ । ४ । १४२ । इति तिलोपः । द्व्यष्टनः संख्यायाम० । पा० ६ । ३ । ४७ । इति अष्टशब्दस्य आत्वम् । प्रत्येकमष्टाविंशतेः संख्यायाः पूरणानीति सर्वाणि अष्टाविंशानीति (शिवानि) कल्याणकारकाणि (शग्मानि) सुखकारकाणि (सह) साकम् (योगम्) प्राप्ति-

रक्षा के सामर्थ्य को] (प्र पद्ये) मैं पाऊं, और (क्षेमम्) रक्षा सामर्थ्य को (च) और (योगम्) प्राप्ति सामर्थ्य को [अर्थात् रक्षा के सामर्थ्य के साथ पाने के सामर्थ्य को] (प्र पद्ये) मैं पाऊं, [और मुझे] (अहोरात्राभ्याम्) दोनों दिन राति के लिये (नमः) अन्न (अस्तु) होवे ॥ २ ॥

भावार्थ—सूक्त ७ में कृत्तिकाओं से लेकर भरणियों तक अट्ठाईस नक्षत्र बताये हैं। यह मन्त्र कहता है कि वे नक्षत्र चन्द्रमा के मार्ग में चक्र बनाकर घूमते हैं। इसलिये जिस किसी एक नक्षत्र को ध्रुव मान कर गणना करें तो प्रत्येक अन्तिम नक्षत्र अट्ठाईसवां होता है, जैसे वेद में कृत्तिकाओं से लेकर भरणी, और लोक में अश्विनी से लेकर रेवती अट्ठाईसवां नक्षत्र है। मनुष्यों को योग्य है कि नक्षत्रों की कुचाल से जो दुर्भिक्ष, वायु की अशुद्धि आधिदैविक विपत्तियां पृथिवी पर सूझ पड़ें उनके निवारण के लिये अन्न आदि पदार्थ प्राप्त करते रहें ॥ २ ॥

महर्षि दयानन्द के अनुसार अर्थ—ऋग्वेदादि भाष्य भूमिका उपासना विषय ॥

हे परमेश्वर! (अष्टाविंशानि) अट्ठाईस [दश इन्द्रिय, दश प्राण, मन बुद्धि, चित्त, अहंकार विद्या, स्वभाव, शरीर और बल] (शिवानि) कल्याण कारक और (शग्मानि) सुखकारक होकर (सह) एक साथ (मे) मेरे (योगम्) उपासना योग को (भजन्ताम्) सेवन करें। (योगम्) उस योग को (च) और (क्षेमम्) रक्षा को [अर्थात् योग के द्वारा रक्षा को] (प्र पद्ये) मैं प्राप्त होऊं और (क्षेमम्) रक्षा को (च) और (योगम्) योग को [अर्थात् रक्षा से योग को] (प्र पद्ये) मैं प्राप्त होऊं, [इसलिये मेरा तुझ को] (अहोरात्राभ्याम्) दिन राति (नमः) नमस्कार (अस्तु) होवे ॥

स्वस्तितं मे सुप्रातः सुंसायं सुंदिवं सुंमृगं सुंशकुनं मे अस्तु ।
सुहवमग्ने स्वस्त्यं १ मर्त्यं गत्वा पुनरायाभिनन्दन् ॥ ३ ॥

सामर्थ्यम्। उपासनायोगम् (भजन्तु) विभक्तं कुर्वन्तु। सेवन्ताम् (मे) मह्यम्। मम (योगम्) (प्र पद्ये) प्राप्नुयाम् (क्षेमम्) रक्षासामर्थ्यम् (च) (क्षेमम्) (प्र पद्ये) (योगम्) (च) (नमः) अन्नम्—निघ० २। ७। नमस्कारः (अहोरात्राभ्याम्) अहोरात्रे अनुकूलयितुम्। दिवसे रात्रौ च (अस्तु) भवतु ॥

स्वस्तितम् । मे । सु-प्रातः । सु-सायम् । सु-दिवम् । सु-मृगम् । सु-शकुनम् । मे । अस्तु ॥ सु-हवम् । अग्ने । स्वस्ति । अमर्त्यम् । गत्वा । पुनः । आय । अभि-नन्दन् ॥ ३ ॥

भाषार्थ—(सुप्रातः) सुन्दर प्रातःकाल, (सुसायम्) सुन्दर सायंकाल और (सुदिवम्) सुन्दर दिन (मे) मेरे लिये (सुमृगम्) सुन्दर पशुओं का झुण्ड तथा (सुशकुनम्) सुन्दर पक्षियों का समूह (मे) मेरे लिये (स्वस्तितम्) आनन्द [वा सुन्दर सत्ता] फैलाने वाला (अस्तु) होवे। (अग्ने) हे सर्वव्यापक परमात्मन् ! (सुहवम्) सुन्दर ग्रहण योग्य और (अमर्त्यम्) अमर [अनश्वर] (स्वस्ति) आनन्द [वा सुन्दर सत्ता] (गत्वा = गमयित्वा) प्राप्त कराकर (अभिनन्दन्) अभिनन्दन [मान] करता हुआ तू (पुनः) अवश्य करके (आय) प्राप्त हो ॥ ३ ॥

भावार्थ—जो मनुष्य पदार्थों के ज्ञान और उपयोग से अपने समय को और अपनी सत्ता को सुधारते हैं, वे परमात्मा को प्राप्त होकर स्थिर सुख भोगते हैं ॥ ३ ॥

अनुहवं परिहवं परिवादं परिक्षवम् ।
सर्वैर्मे रिक्तकुम्भान् परा तान्त्सवितः सुव ॥ ४ ॥

अनु-हवम् । परि-हवम् । परि-वादम् । परि-क्षवम् ॥ सर्वैः । मे । रिक्त-कुम्भान् । परा । तान् । सवितः । सुव ॥ ४ ॥

भाषार्थ—(अनुहवम्) विवाद (परिहवम्) बकवाद (परिवादम्)

३—(स्वस्तितम्) स्वस्ति+तनु विस्तारे—ड । आनन्दस्य सुसत्ताया वा विस्तारकम् (मे) मह्यम् (सुप्रातः) शोभनः प्रातःकालः (सुसायम्) शोभनः सायङ्कालः (सुदिवम्) शोभनं दिनम् (सुमृगम्) स नपुंसकम् । पा० २ । ४ । १७ । इति समाहारे नपुंसकम् । शोभनानां पशूनां समाहारः (सुशकुनम्) शोभनानां पक्षिणां समाहारः (मे) मम (अस्तु) भवतु (सुहवम्) हु दानादानादनेषु—अप् । सुग्राह्यम् (अग्ने) हे सर्वव्यापक परमात्मन् (स्वस्ति) कल्याणम् । शोभनम् । अस्तित्वम् (अमर्त्यम्) मरणरहितम् । अनश्वरम् (गत्वा) अन्तर्गतण्यर्थः । गमयित्वा (पुनः) अवश्यम् (आय) आङ्+अय गतौ—लोट्, परस्मैपदम् । आगच्छ । प्राप्नुहि (अभिनन्दन्) मानं हर्षं वा कुर्वन् ॥

४—(अनुहवम्) ह्वः संप्रसारणं च न्यभ्युपविषु । पा० ३ । ३ । ७२ ।

अपवाद और (परिक्षवम्) नाक के फुरफुराहट, (तान्) इन (रिक्तकुम्भान्) रीते घड़ों [निकम्मे कामों] को (मे) मेरे (सर्वैः) सब [दोषों] सहित, (सवितः) हे सर्व प्रेरक परमात्मन् ! (परा सुव) दूर कर दे ॥ ४ ॥

भावार्थ—मनुष्य अपने शारीरिक और आत्मिक दोषों को विचार कर परमेश्वर की उपासना करके दूर करे ॥ ४ ॥

इस मन्त्र का कुछ मिलान करो—अ० १० । ३ । ६ ॥

अपपापं परिक्षवं पुण्यं भक्षीमहि क्षवम् ।
शिवा ते पाप नासिकां पुण्यगश्चाभि मेहताम् ॥ ५ ॥

अप-पापम् । परि-क्षवम् । पुण्यम् । भक्षीमहि । क्षवम् ॥ शिवा । ते । पाप । नासिकाम् । पुण्य-गः । च । अभि । मेहताम् ॥५॥

भाषार्थ—(अपपापम्) बहुत दोषयुक्त (परिक्षवम्) नाक के फुरफुराहट को [हे परमात्मन् ! दूर कर दे—म० ४], (पुण्यम्) शुद्ध [निर्दोष] (क्षवम्) छींक को (भक्षीमहि) हम भोगें । (पाप) हे पापी ! [रोगी वा दोषी] (ते) तेरी (नासिकाम्) नासिका [आदि इन्द्रियों] को (शिवा) कल्याण कारक [क्रिया] (च) और (पुण्यगः) पवित्रता पहुंचाने वाला [व्यवहार] (अभि) सब ओर से (मेहताम्) सींचे [शोधे] ॥ ५ ॥

अनु+ह्वेञ् स्पर्धायां शब्दे च—अप् संप्रसारणं च बाहुलकात् । विवादम् (परिह्वम्) परि+ह्वयतेः—अप् संप्रसारणं च । सक्रवादम् (परिवादम्) अपवादम् (परिक्षवम्) अ० १० । ३ । ६ । टुक्षु नासाशब्दे—अप् । नासातो वायुनिसरणजन्यशब्दम् (सर्वैः) सर्वदोषैः (मे) मम (रिक्तकुम्भान्) शून्य कलशान् । व्यर्थव्यवहारान् (परा) दूरे (तान्) पूर्वोक्तान् (सवितः) हे सर्वप्रेरक परमात्मन् (सुव) षू प्रेरणे । प्रेरय ॥

५—(अपपापम्) बहुदोषयुक्तम् (परिक्षवम्) म० ४ । नासातो वायुनिसरणजन्यशब्दम्—सवितः परासुव इति पूर्वेणान्वयः (पुण्यम्) पवित्रम् । श्रेयस्करम् । निर्दोषम् (भक्षीमहि) भज सेवायाम्—आशीर्लिङि । सेविषीमहि लप्सीमहि (क्षवम्) नासिकाशब्दम् (शिवा) शुभा क्रिया (ते) तव (पाप) हे पापिन् रोगिन् दोषिन् वा (नासिकाम्) (पुण्यगः) शुद्धिप्रापको व्यवहारः (च) (अभि) सर्वतः (मेहताम्) सिञ्चतु । शोधयतु ॥

भावार्थ—मनुष्य अशुद्धिकारक रोगजन्य छींक आदि दोषों को हटाकर उत्तम उत्तम व्यवहारों और चेष्टाओं से इन्द्रियों को प्रबल करके सुखी होवें ॥ ५ ॥

इमा या ब्रह्मणस्पते विषूचीर्वात ईरते ।
सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि ॥ ६ ॥

इमाः । याः । ब्रह्मणः । पते । विषूचीः । वातः । ईरते ॥
सध्रीचीः । इन्द्र । ताः । कृत्वा । मह्यम् । शिव-तमाः । कृधि ६

भाषार्थ—(ब्रह्मणःपते) हे ब्रह्माण्ड के स्वामी परमात्मन् । (इमाः) इन (याः) जिन (विषूचीः) विविध फैली हुयी [दिशाओं] को (वातः) पवन (ईरते) पहुंचाता है । (इन्द्र) हे परम ऐश्वर्यवान् जगदीश्वर ! (ताः) उनको (सध्रीचीः) परस्पर पूजनीय (कृत्वा) करके (मह्यम्) मेरे लिये (शिवतमाः) अत्यन्त सुखकारिणी (कृधि) कर ॥ ६ ॥

भावार्थ—पूर्वादि सब दिशाओं में वायु जल आदि पदार्थ परिपूर्ण हैं, मनुष्य सर्वत्र परमात्मा के विचार के साथ परस्पर सहाय करके सुख प्राप्त करें ॥६॥

स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु ॥ ७ ॥

स्वस्ति । नः । अस्तु । अभयम् । नः । अस्तु । नमः । अहो-रात्राभ्याम् । अस्तु ॥ ७ ॥

भावार्थ—[हे परमात्मन् !] (नः) हमारे लिये (स्वस्ति) कल्याण [सुन्दर

६—(इमाः) परिदृश्यमानाः (याः) (ब्रह्मणस्पते) हे ब्रह्माण्डस्य स्वामिन् परमात्मन् (विषूचीः) विष्वगञ्चनाः । विविधव्यापिका दिशाः (वातः) वायुः (ईरते) भौवादिकः । गच्छति । प्राप्नोति (सध्रीचीः) सह+अञ्चतेः—क्विन्, ङीप्, सहस्य सध्रि आदेशः । परस्परपूजनीयाः (इन्द्र) हे परमैश्वर्यवन् जगदीश्वर (ताः) दिशः (कृत्वा) विधाय (मह्यम्) मदर्थम् (शिवतमाः) अत्यर्थं सुखकारिणीः (कृधि) कुरु ॥

७—(स्वस्ति) कल्याणम् । सु ष्ठु अस्तित्वम् (नः) अस्मभ्यम् (अस्तु)

सत्ता] (अस्तु) होवे (नः) हमारे लिये (अभयम्) अभय (अस्तु) होवे, [हमें] (अहोरात्राभ्याम्)दोनों दिन राति के लिये (नमः) अन्न (अस्तु) होवे॥ ७ ॥

भावार्थ—मनुष्य अपनी सत्ता को सुधार कर सदा निर्भय होकर अन्न आदि प्राप्त करें ॥ ७ ॥

इस मन्त्र का अन्तिम पाद—म० २ में आया है ॥

सूक्तम् ८ [शान्तिसूक्तम्] ॥

१—१४ ॥ विश्वेदेवा देवताः ॥ १, २, ७ भुरिगनुष्टुप् ; ३, ४, ६, ८, १० अनुष्टुप् ; ५ भुरिगार्षी पङ्क्तिः ; ९ आर्षी त्रिष्टुप् ; ११ निचृदनुष्टुप् ; १२ निचृदष्टिः ; १३ स्वराडनुष्टुप् ; १४ संकृतिः ॥

मनुष्यकर्तव्योपदेशः—मनुष्यों को कर्तव्य का उपदेश ॥

शान्ता द्यौः शान्ता पृथिवी शान्तमिदमुर्वन्तरिक्षम् ।
शान्ता उदन्वतीरापः शान्ता नः सन्त्वोषधीः ॥ १ ॥

शान्ता । द्यौः । शान्ता । पृथिवी । शान्तम् । इदम् । उरु । अन्तरिक्षम् ॥ शान्ताः । उदन्वतीः । आपः । शान्ताः । नः । सन्तु । ओषधीः ॥ १ ॥

भाषार्थ—(द्यौः) प्रकाशमान [सूर्य आदि की विद्या] (शान्ता) शान्तियुक्त, (पृथिवी) चौड़ी [पृथिवी आदि] (शान्ता) शान्तियुक्त, (इदम्) यह (उरु) चौड़ा (अन्तरिक्षम्) मध्यवर्ती आकाश (शान्तम्) शान्तियुक्त [होवे]। (उदन्वतीः) उत्तम जल वाली (आपः) फैली हुई नदियां (शान्ताः)

भवतु (अभयम्) भयराहित्यम् (नः) (अस्तु) । अन्यत् पूर्ववत्—म० २ ॥

१—(शान्ता) शमु उपशमे—क्त। शान्तियुक्ता (द्यौः) प्रकाशमानः सूर्यादिलोकः (शान्ता) (पृथिवी) विस्तीर्णो भूम्यादिलोकः (शान्तम्) शान्तियुक्तम् (इदम्) दृश्यमानम् (उरु) विस्तीर्णम् (अन्तरिक्षम्) मध्ये वर्तमानमाकाशम् (शान्ताः) (उदन्वतीः) अ० १८। २। ४८। उदकस्य उदन् मतौ, प्रशंसायां मतुप्। उदन्वत्यः। प्रशस्तजलाः (आपः) व्यापिका नद्यः (शान्ताः) (नः)

शान्तियुक्त और (ओषधीः) ओषधियां [अन्न सोमलता आदि] (नः) हमारे लिये (शान्ताः) शान्तियुक्त (सन्तु) होवें ॥ १ ॥

भावार्थ—मनुष्यों को योग्य है कि प्रकाशविद्या, भूमिविद्या, आकाश-विद्या, जलविद्या, अन्न, ओषधि आदि की अनेक विद्याओं को प्राप्त करके संसार को सुख पहुंचावें ॥ १ ॥

शान्तानि पूर्वरूपाणि शान्तं नो अस्तु कृताकृतम् ।
शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः ॥ २ ॥

शान्तानि । पूर्व-रूपाणि । शान्तम् । नः । अस्तु । कृत-अकृतम् ॥ शान्तम् । भूतम् । च । भव्यम् । च । सर्वम् । एव । शम् । अस्तु । नः ॥ २ ॥

भाषार्थ—(पूर्वरूपाणि) पूर्व रूप [आरम्भ के चिह्न) (शान्तानि) शान्तियुक्त, (कृताकृतम्) किया हुआ और न किया हुआ [मन में विचारा हुआ कर्म] (नः) हमारे लिये (शान्तम्) शान्तियुक्त (अस्तु) होवे । (भूतम्) बीता हुआ (च) और (भव्यम्) होने वाला (शान्तम्) शान्तियुक्त (च) और (सर्वम्) सब (एव) ही (नः) हमारे लिये (शम्) शान्तियुक्त (अस्तु) होवे ॥ २ ॥

भावार्थ—यह कार्य कैसे हुआ वा कैसे होगा, हम ने किया है वा करना विचारा है, उस का फल क्या होगा, पूर्वजों के कर्म का क्या फल हुआ, आगे क्या होगा, ऐसा सोचकर मनुष्य उचित कर्तव्य करता हुआ आनन्द प्राप्त करे ॥ २ ॥

अस्मभ्यम् (सन्तु) (ओषधीः) वा छन्दसि । पा० ६ । १ । १०६ । इति यणादेशाभावे पूर्वसवर्णदीर्घः । ओषध्यः । अन्नसोमलतादयः ॥

२—(शान्तानि) शान्तियुक्तानि । सुखकराणि (पूर्वरूपाणि) प्रथमलक्षणानि । आरम्भचिह्नानि (नः) अस्मभ्यम् (अस्तु) (कृताकृतम्) कृतं निष्पादितम् अकृतमनिष्पादितं मनसि निर्धारितं कर्म (शान्तम्) (भूतम्) अतीतम् (च) (भव्यम्) भविष्यत् । अनागतम् (च) (सर्वम्) (एव) निश्चयेन (शम्) शान्तिकरम् (अस्तु) (नः) अस्मभ्यम् ॥

इयं या पर॑मेष्ठिनी वाग् देवी ब्रह्मसंशिता।
ययैव ससृजे घोरं तयैव शान्तिरस्तु नः ॥ ३ ॥

इयम् । या । पुरमे-स्थिनी । वाक् । देवी । ब्रह्म-संशिता ॥
यया । एव । सुसृजे । घोरम् । तया । एव । शान्तिः। अस्तु ।
नः ॥ ३ ॥

भाषार्थ—(इयम्) यह (या) जो (परमेष्ठिनी) सर्वोत्कृष्ट परमात्मा में ठहरने वाली, (देवी) उत्तमगुण वाली (वाक्) वाणी (ब्रह्मसंशिता) वेद-ज्ञान से तीक्ष्ण की गयी है, और (यया) जिस [वाणी] के द्वारा (एव) ही (घोरम्) घोर [भयङ्कर पाप] (ससृजे) उत्पन्न हुआ है, (तया) उस [वाणी] के द्वारा (एव) ही (नः) हमारे लिये (शान्तिः) शान्ति [धैर्य, आनन्द] (अस्तु) होवे ॥ ३ ॥

भावार्थ—जिस वाणी के द्वारा वेदों को विचार कर परमात्मा को पहुंचते हैं, यदि उस वाणी द्वारा कोई अनर्थ होवे, विद्वान् मनुष्य उस भूल को उचित व्यवहार से सुधार कर शान्ति स्थापित करे ॥ ३ ॥

इदं यत् पर॑मेष्ठिनं मनो वां ब्रह्मसंशितम् ।
येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः ॥ ४ ॥

इदम् । यत् । पुरमे-स्थिनम् । मनः । वाम् । ब्रह्म-संशितम् ॥
येन । एव । सुसृजे । घोरम् । तेन । एव । शान्तिः ।
अस्तु । नः ॥ ४ ॥

३—(इयम्) दृश्यमाना (या) (परमेष्ठिनी) परमे कित् । उ० ४ । १० । परम+ष्ठा गतिनिवृत्तौ—इनि कित्, ङीप्, सप्तम्या अलुक् षत्वं च । परमे सर्वोत्कृष्टे परमात्मनि स्थितिशीला (वाक्) वाणी (देवी) दिव्यगुणा (ब्रह्मसंशिता) ब्रह्मणा वेदज्ञानेन सम्यक् तीक्ष्णीकृता उत्तेजिता (यया) वाचा (एव) निश्चयेन (ससृजे) सृष्टम् । उत्पन्नम् (घोरम्) भयङ्करं पापम् (तया) वाचा (एव) (शान्तिः) सुखकरी क्रिया । धैर्यम् । आनन्दः (अस्तु) (नः) अस्मभ्यम् ॥

भाषार्थ—(इदम्) यह (यत्) जो (परमेष्ठिनम्) सर्वोत्कृष्ट परमात्मा में ठहरने वाला (वाम्) तुम दोनों [स्त्री पुरुषों] का (मनः) मन (ब्रह्मसंशितम्) वेदज्ञान से तीक्ष्ण किया गया है, और (येन) जिस [मन] के द्वारा (एव) ही (घोरम्) घोर [भयङ्कर पाप] (ससृजे) उत्पन्न हुआ है, (तेन) उस [मन] के द्वारा (एव) ही (नः) हमारे लिये (शान्तिः) शान्ति [धैर्य, आनन्द] (अस्तु) होवे ॥ ४ ॥

भावार्थ—यह मन जो परमात्मा का निवास और वेदज्ञान का कोश है, यदि उस मन में कोई विकार उत्पन्न हो तो हे मनुष्यो ! उस को ठीक करके परस्पर सुख बढ़ाओ ॥ ४ ॥

इमानि यानि पञ्चेन्द्रियाणि मनःषष्ठानि मे हृदि ब्रह्मणा संशितानि । यैरेव ससृजे घोरं तैरेव शान्तिरस्तु नः ॥ ५ ॥

इमानि । यानि । पञ्च । इन्द्रियाणि । मनःऽषष्ठानि । मे । हृदि । ब्रह्मणा । सम्ऽशितानि ॥ यैः । एव । ससृजे । घोरम् । तैः । एव । शान्तिः । अस्तु । नः ॥ ५ ॥

भाषार्थ—(इमानि) ये (यानि) जो (मनःषष्ठानि) छठे मन सहित (पञ्च) पांच (इन्द्रियाणि) इन्द्रियां [कान, नेत्र, नासिका, जिह्वा और त्वचा ज्ञानेन्द्रियां] (मे) मेरे (हृदि) हृदय में (ब्रह्मणा) वेद ज्ञान से (संशितानि) तीक्ष्ण की गयी हैं । और (यैः) जिन [इन्द्रियों] के द्वारा (एव) ही (घोरम्) घोर [भयङ्कर पाप] (ससृजे) उत्पन्न हुआ है, (तैः) उन के द्वारा (एव) ही

४—(इदम्) उपस्थितम् (यत्) (परमेष्ठिनम्) अत्तेः किदिच्च । उ० २ । ५१ । परम + ष्ठा गतिनिवृत्तौ—इनन्, कित् । परमे सर्वोत्कृष्टे परमात्मनि स्थितिशीलम् (मनः) अन्तःकरणम् (वाम्) युवयोः । स्त्रीपुरुषयोः (ब्रह्मसंशितम्) ब्रह्मणा वेदज्ञानेन तीक्ष्णीकृतम् उत्तेजितम् । (येन) मनसा (तेन) मनसा । अन्यत् पूर्ववत्—म० ३ ॥

५—(इमानि) दृश्यमानानि (यानि) (पञ्च) (इन्द्रियाणि) श्रोत्रनेत्रनासिकाजिह्वात्वग्रूपाणि ज्ञानेन्द्रियाणि (मनःषष्ठानि) मनः षष्ठं येषां तानि (मे) मम (हृदि) हृदये (ब्रह्मणा) वेदज्ञानेन (संशितानि) तीक्ष्णीकृतानि

(नः) हमारे लिये (शान्तिः) शान्ति [धैर्य्य, आनन्द] (अस्तु) होवे ॥ ५ ॥

भावार्थ--जो मन और सब ज्ञानेन्द्रियां वेदज्ञान से तेजस्वी हुये हैं, यदि उनके विकार से कोई पाप घटना हो जावे विद्वान् पुरुष उसे सुधार कर आपस में सुख भोगें ॥ ५ ॥

शं नो॑ मि॒त्रः शं वरु॑णः शं विष्णुः॒ शं प्र॒जाप॑तिः ।

शं न॒ इन्द्रो॒ बृह॒स्पति॒ः शं नो॑ भवत्वर्य॒मा ॥ ६ ॥

शम् । न॒ः । मि॒त्रः । शम् । वरु॑णः । शम् । विष्णुः॑ । शम् । प्र॒जा-प॑तिः ॥ शम् । न॒ः । इन्द्रः॑ । बृह॒स्पतिः॑ । शम् । न॒ः । भ॒व॒तु॒ । अ॒र्य॒मा ॥ ६ ॥

भाषार्थ—(नः) हमारे लिये (मित्रः) सबका मित्र [परमेश्वर वा विद्वान् पुरुष] (शम्) शान्तिदायक, (वरुणः) सब में श्रेष्ठ (शम्) शान्तिदायक, (विष्णुः) सब गुणों में व्यापक (शम्) शान्तिदायक, (प्रजापतिः) प्रजापति [प्रजाओं का रक्षक] (शम्) शान्तिदायक [होवे] । (नः) हमारे लिये (इन्द्रः) परम ऐश्वर्यवान्, (बृहस्पतिः) बड़ी वेदविद्या का रक्षक (शम्) शान्तिदायक, (नः) हमारे लिये (अर्यमा) श्रेष्ठों का मान करने वाला [न्यायकारी परमेश्वर वा विद्वान् पुरुष] (शम्) शान्तिदायक (भवतु) होवे ॥ ६ ॥

भावार्थ—जैसे सर्वहितकारी, सर्वश्रेष्ठ, सर्वगुण विशिष्ट परमेश्वर सब जगत् की रक्षा करता है, वैसे ही विद्वान् जन परस्पर स्नेह करके संसार का उपकार करें ॥ ६ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१ । ९० । ९ और यजुर्वेद-३६ । ९ ॥

(यैः) इन्द्रियैः (तैः) इन्द्रियैः । अन्यत् पूर्ववत्—म० ३ ॥

६—(शम्) सुखकारी (नः) अस्मभ्यम् (मित्रः) ञिमिदा स्नेहने-क्र । सर्वस्नेही परमेश्वरो विद्वान् वा (शम्) (वरुणः) सर्वोत्कृष्टः (शम्) (विष्णुः) सर्वगुणेषु व्यापकः (शम्) (प्रजापतिः) प्रजानां पालकः (शम्) (नः) (इन्द्रः) परमैश्वर्ययुक्तः (बृहस्पतिः) बृहत्या वाचो विद्यायाः पतिः पालकः (शम्) (नः) (भवतु (अर्यमा) श्रेष्ठानां मानकर्ता न्यायकारी परमेश्वरो मनुष्यो वा ॥

शं नो मित्रः शं वरुणः शं विवस्वाञ्छमन्तकः ।
उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः ॥ ७

शम् । नः । मित्रः । शम् । वरुणः । शम् । विवस्वान् । शम् । अन्तकः ॥ उत्-पाताः । पार्थिवाः । आन्तरिक्षाः । शम् । नः । दिवि-चराः । ग्रहाः ॥ ७ ॥

भाषार्थ--(नः) हमारे लिये (मित्रः) प्राण वायु (शम्) शान्तिदायक, (वरुणः) जल [वा अपान वायु], (शम्) शान्तिदायक (विवस्वान्) विविध चमकने वाला सूर्य (शम्) शान्तिदायक (अन्तकः) अन्त करने वाला [मृत्यु] (शम्) शान्तिदायक [होवे] । (पार्थिवा) पृथिवी पर होने वाले और (आन्तरिक्षाः) अन्तरिक्ष [आकाश] में होने वाले (उत्पाताः) उत्पात [उपद्रव] और (दिविचराः) सूर्य के प्रभाव में घूमने वाले (ग्रहाः) ग्रह [चन्द्र, मङ्गल, बुध आदि] (नः) हमारे लिये (शम्) शान्तिदायक [होवें] ॥ ७ ॥

भावार्थ--मनुष्यों को विद्यापूर्वक वायु जल आदि पदार्थों से उपकार लेकर सुखी होना चाहिये ॥ ७ ॥

शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् ।
शं गावो लोहितक्षीराः शं भूमिरव तीर्यतीः ॥ ८ ॥

शम् । नः । भूमिः । वेप्यमाना । शम् । उल्का । निः-हतम् । च । यत् ॥ शम् । गावः । लोहित-क्षीराः । शम् । भूमिः । अव । तीर्यतीः ॥ ८ ॥

७—(शम्) शान्तिप्रदः (नः) अस्मभ्यम् (मित्रः) मिनोतेः-क्त्र । प्रेरकः प्राणः (शम्) (वरुणः) जलम् । अपानः (शम्) (विवस्वान्) विविधप्रकाशकः सूर्यः (शम्) (अन्तकः) अन्त+करोतेः---डप्रत्ययः । अन्तकरः । मृत्युः (उत्पाताः) उपद्रवाः (पार्थिवा) विभक्तेर्डा । पार्थिवाः । पृथिव्यां भवाः (आन्तरिक्षाः) आकाशे भवाः (शम्) (नः) (दिविचराः) सूर्यप्रभावे विचरणशीलाः (ग्रहाः) चन्द्रमङ्गलबुधादयः ॥

भाषार्थ—(नः) हमारे लिये (वेप्यमाना) कांपती हुई (भूमिः) भूमि (शम्) शान्तिदायक, (च) और (यत्) जो कुछ (उल्का) उल्काओं से [रेखाकार आकाश से गिरते हुये तेजपुञ्जों, टूटते हुये तारों से] (निर्हतम्) नष्ट किया गया है, [वह] (शम्) शान्तिदायक [होवे] । (लोहितक्षीराः) रुधिर युक्त दूध देने वाली (गावः) गौयें (शम्) शान्तिदायक [होवें] और (अव तीर्यतीः) धसकती हुयी (भूमिः) भूमि (शम्) शान्तिदायक [होवे]॥८॥

भावार्थ—दूरदर्शी मनुष्य भूकम्प, तारे टूटने, रोग के कारण दूध विगड़ने, दलदल से पृथिवी के बैठ जाने आदि विघ्नों से बचने का उपाय करके सुखी होवें ॥ ८ ॥

नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृत्याः । शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ॥ ९ ॥

नक्षत्रम् । उल्का । अभि-हतम् । शम् । अस्तु । नः । शम् । नः । अभि-चाराः । शम् । ऊं इति । सन्तु । कृत्याः ॥ शम् । नः । नि-खाताः । वल्गाः । शम् । उल्काः । देश-उप-सर्गाः । शम् । ऊं इति । नः । भवन्तु ॥ ९ ॥

भाषार्थ—(उल्का) उल्काओं [टूटते तारों] से (अभिहतम्) नष्ट किया हुआ (नक्षत्रम्) नक्षत्र (नः) हमें (शम्) शान्तिदायक (अस्तु) होवे,

---

८—(शम्) शान्तिप्रदा (नः) अस्मभ्यम् (भूमिः) (वेप्यमाना) कम्पमाना (शम्) (उल्का) उल दाहे-कप्रत्ययः, विभक्तेर्डा । उल्काभिः । रेखाकारे गगनात् पतत्तेजःपुञ्जैः (निर्हतम्) विनष्टम् (च) (यत्) यत् किञ्चित् (शम्) (गावः) धेनवः (लोहितक्षीराः) रुधिरयुक्तदुग्धोपेताः (शम्) (भूमिः) (अवतीर्यतीः) तॄ प्लवनतरणयोः—शतृ, ङीप् । बहुवचनं छान्दसम् । अवतीर्यती । अवतीर्यमाणा जलबाहुल्येनाधोगमना ॥

९—(नक्षत्रम्) गमनशीलो लोकः (उल्का) म० ८ । उल्काभिः । रेखाकारे गगनात् पतत्तेजोभिः (अभिहतम्) विनष्टम् (शम्) शान्तिप्रदम् (अस्तु)

(नः) हमारे लिये (अभिचाराः) विरुद्ध आचरण (शम्) शान्तिदायक (उ) और (कृत्याः) हिंसा क्रियायें (शम्) शान्तिदायक (सन्तु) होवें । (निखाताः) खोदे हुये (वल्गाः) गढ़े [सुरङ्ग आदि] (नः) हमें (शम्) शान्तिदायक, (उल्काः) उल्कायें [टूटते तारे] (शम्) शान्तिदायक, (उ) और (देशोपसर्गाः) देश के उपद्रव (नः) हमें (शम्) शान्तिदायक (भवन्तु) होवें ॥ ९ ॥

भावार्थ—विद्वान् पुरुष दैवी और मानुषी विपत्तियों से बचने का प्रयत्न करते रहें ॥ ९ ॥

शं नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा ।
शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ॥ १० ॥

शम् । नः । ग्रहाः । चान्द्रमसाः । शम् । आदित्यः । च । राहुणा ॥ शम् । नः । मृत्युः । धूम-केतुः । शम् । रुद्राः । तिग्म-तेजसः ॥ १० ॥

भाषार्थ—(चान्द्रमसाः) चन्द्रमा के (ग्रहाः) ग्रह [कृत्तिका आदि नक्षत्र] (नः) हमें (शम्) शान्तिदायक [होवें], (च) और (आदित्यः) सूर्य (राहुणा) राहु [ग्रह विशेष] के साथ (शम्) शान्तिदायक [होवे]। (मृत्युः) मृत्युरूप (धूमकेतुः) धूमकेतु [पुच्छल तारा] (नः) हमें (शम्)

(नः) अस्मभ्यम् (अभिचाराः) व्यभिचाराः । विरुद्धाचरणानि (शम्) (उ) चार्थे (कृत्याः) अ० १४ । २ । ४९ । कृञ् हिंसायाम्—क्यप् तुक् च । हिंसाक्रियाः (शम्) (नः) (निखाताः) विदारिताः (वल्गाः) मुदिग्रोर्गग्गौ । उ० १ । १२८ । वल संवरणे—गप्रत्ययः । गर्ताः । भूमिच्छिद्राणि (शम्) (उल्काः) म० ८ । गगनात्पतत्तेजःपुञ्जाः (देशोपसर्गाः) देशोपद्रवाः (शम्) (उ) (नः) (भवन्तु) ॥

१०—(शम्) शान्तिप्रदाः (नः) अस्मभ्यम् (ग्रहाः) कृत्तिकादिनक्षत्रगणाः (चान्द्रमसाः) चन्द्रलोकसम्बन्धिनः (शम्) (आदित्यः) आदीप्यमानः सूर्यः (च) (राहुणा) हसनिजनिचरिचटिरहिभ्यो ञुण् । उ० १ । ३ । रह त्यागे—ञुण् । ज्योतिश्चक्रस्थेन सूर्यकिरणसम्पर्काभावेन जायमानपृथिवीच्छायाकारकेण ग्रहभेदेन (शम्) (नः) (मृत्युः) मृत्युरूपः (धूमकेतुः) उत्पात-

शान्तिदायक [हो], (तिग्मतेजसः) तीक्ष्ण तेज वाले (रुद्राः) गतिमान् [बृहस्पति आदि ग्रह] (शम्) शान्तिदायक [होवें] ॥ १० ॥

भावार्थ—राहु ग्रह विशेष, प्रकाश को रोककर सूर्य और चन्द्र के ग्रहण का कारण होता है, धूमकेतु अपनी टेढ़ी चाल से अनेक ग्रहों और नक्षत्रों को टकरा कर नाश करता है, मनुष्य ज्योतिष शास्त्र द्वारा दूरदर्शी होकर विघ्नों से बचने का उपाय करें ॥ १० ॥

शं रुद्राः शं वसवः शमादित्याः शमग्नयः ।
शं नो महर्षयो देवाः शं देवाः शं बृहस्पतिः ॥ ११ ॥

शम् । रुद्राः । शम् । वसवः । शम् । आदित्याः । शम् । अग्नयः ॥ शम् । नः । महऽऋषयः । देवाः । शम् । देवाः । शम् । बृहस्पतिः ॥ ११ ॥

भाषार्थ—(रुद्राः) रुद्र [ग्यारह रुद्र अर्थात् प्राण, अपान, व्यान, उदान, समान, नाग, कूर्म, कृकल, देवदत्त, धनञ्जय और जीवात्मा] (शम्) शान्तिदायक (वसवः) वसु [आठ वसु अर्थात् अग्नि, पृथिवी, वायु, अन्तरिक्ष, सूर्य, प्रकाश, चन्द्रमा और तारागण] (शम्) शन्तिदायक (आदित्याः) महीने [चैत्र आदि बारह महीने] (शम्) शान्तिदायक और (अग्नयः) अग्नियां [शारीरिक, आत्मिक और सामाजिक बल] (शम्) शान्तिदायक [होवें] । (महर्षयः) महर्षि [बड़े बड़े वेदज्ञाता] (देवाः) विद्वान् लोग

कपोऽशुभसूचकस्तारापुञ्जभेदः (शम्) (रुद्राः) रु गतौ—क्विप्, तुक् । रो मत्वर्थीयः । गतिमन्तो ग्रहाः (तिग्मतेजसः) तीक्ष्णतापाः ॥

११—(शम्) शान्तिप्रदाः (रुद्राः) रु गतौ—क्विप्, तुक्, रो मत्वर्थीयः गतिमन्तः । प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयाख्या दश प्राणा एकादशो जीवश्चेत्येकादश रुद्राः-दयानन्दकृतभाष्ये, यजु० २ । ५ (शम्) (वसवः) अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसवः—दयानन्दभाष्ये, यजु० २ । ५ (शम्) (आदित्याः) द्वादशमासाः—तत्रैव (शम्) (अग्नयः) शारीरिकात्मिकसामाजिकपराक्रमाः

(नः) हमें (शम्) शान्तिदायक, (देवाः) उत्तम व्यवहार (शम्) शान्तिदायक [होवें] और (बृहस्पतिः) बड़े ब्रह्माण्डों का स्वामी [परमात्मा] (शम्) शान्तिदायक [होवे] ॥ ११ ॥

भावार्थ—मनुष्य रुद्र, वसु और आदित्य संज्ञक पदार्थों को प्रयत्न पूर्वक महर्षि विद्वानों के सत्संग और परमात्मा के विश्वास से अनेक व्यवहारों में प्रयुक्त करके सब जीवों को सुख पहुंचावें ॥ ११ ॥

रुद्र, वसु और आदित्य शब्दों के लिये महर्षि दयानन्दकृत यजुर्वेदभाष्य—२ । ५ । देखो ॥

ब्रह्म॑ प्र॒जाप॑तिर्धा॒ता लो॒का वे॒दाः स॑प्तऋ॒षयो॒ऽग्नयः॑ । तैर्मे॑ कृ॒तं स्व॒स्त्यय॑न॒मिन्द्रो॑ मे॒ शर्म॑ यच्छतु ब्र॒ह्मा मे॒ शर्म॑ यच्छतु । विश्वे॑ मे दे॒वाः शर्म॑ यच्छन्तु॒ सर्वे॑ मे दे॒वाः शर्म॑ यच्छन्तु ॥१२॥

ब्रह्म॑ । प्र॒जा-प॑तिः । धा॒ता । लो॒काः । वे॒दाः । स॒प्त-ऋ॒षयः॑ । अ॒ग्नयः॑ ॥ तैः । मे॒ । कृ॒तम् । स्व॒स्त्यय॑नम् । इन्द्रः॑ । मे॒ । शर्म॑ । य॒च्छ॒तु॒ । ब्र॒ह्मा । मे॒ । शर्म॑ । य॒च्छ॒तु॒ ॥ विश्वे॑ । मे॒ । दे॒वाः । शर्म॑ । य॒च्छ॒न्तु॒ । सर्वे॑ । मे॒ । दे॒वाः । शर्म॑ । य॒च्छ॒न्तु॒ ॥ १२ ॥

भाषार्थ—(ब्रह्म) अन्न, (प्रजापतिः) प्रजापालक [इन्द्रियादि का रक्षक] और (धाता) पोषक [जीवात्मा], (लोकाः) सब लोक [पृथिवी आदि] (वेदाः) ऋग्वेद आदि चारो वेद, (सप्तऋषयः) सात ऋषि [कान, आंख, नाक, जिह्वा त्वचा पांच ज्ञानेन्द्रिय, मन और बुद्धि], और (अग्नयः) अग्नि [शारीरिक, आत्मिक और सामाजिक पराक्रम] [जो हैं] । (तैः) उन करके

(शम्) (नः) (महर्षयः) महान्तो वेदार्थज्ञातारः (देवाः) विद्वांसः (शम्) (देवाः) उत्तमव्यवहाराः (शम्) (बृहस्पतिः) बृहतां ब्रह्माण्डानां पालकः परमेश्वरः ॥

१२—(ब्रह्म) अन्नम्—निघ० २ । ७ (प्रजापतिः) इन्द्रियादिप्रजानां पालकः (धाता) पोषको जीवात्मा (लोकाः) पृथिव्यादयः (वेदाः) ऋग्वेदादयश्चत्वारो वेदाः (सप्तऋषयः) मनोबुद्धिसहितानि श्रोत्रनेत्रनासिकाजिह्वात्वग्—रूपाणि पञ्च ज्ञानेन्द्रियाणि (अग्नयः) म० ११ (तैः) पूर्वोक्तैः (मे) मह्यम्

(मे) मेरे लिये (स्वस्त्ययनम्) कल्याण का मार्ग (कृतम्) बनाया गया, है (इन्द्रः) इन्द्र [परम ऐश्वर्यवान् जगदीश्वर] (मे) मेरे लिये (शर्म) सुख (यच्छतु) देवे, (ब्रह्मा) ब्रह्मा [सब से बड़ा परमात्मा] (मे) मेरे लिये (शर्म) सुख (यच्छतु) देवे ॥ १२ ॥

भावार्थ—मनुष्यों को चाहिये कि परमेश्वर की सृष्टि के बीच वेद आदि शास्त्र द्वारा संसार के अन्न आदि पदार्थों को इन्द्रियों और मन बुद्धि द्वारा यथावत् परीक्षा करके काम में लावें, और परमेश्वर को धन्यवाद देते हुये सुख प्राप्त करें ॥ १२ ॥

यानि कानि चिच्छान्तानि लोके सप्तऋषयो विदुः ।
सर्वाणि शं भवन्तु मे शं मे अस्त्वभयं मे अस्तु ॥ १३ ॥

यानि । कानि । चित् । शान्तानि । लोके । सप्त-ऋषयः । विदुः ॥ सर्वाणि । शम् । भवन्तु । मे । शम् । मे । अस्तु । अभयम् । मे । अस्तु ॥ १३॥

भाषार्थ—(यानि) जिन (कानि) किन्हीं (चित्) भी [शान्तानि] शान्तकर्मों को (लोके) संसार में (सप्तऋषयः) सात ऋषि [कान, आंख, नाक, जिह्वा त्वचा पांच ज्ञानेन्द्रिय मन और बुद्धि] (विदुः) जानते हैं। (सर्वाणि) वे सब (मे) मेरे लिये (शम्) शान्तिदायक (भवन्तु) होवें, (मे) मेरे लिये (शम्) शान्ति [आरोग्यता धैर्य आदि] (अस्तु) होवे, (मे) मेरे लिये (अभयम्) अभय (अस्तु) होवे ॥ १३ ॥

(कृतम्) निष्पादितम् (स्वस्त्ययनम्) कल्याणमार्गः (इन्द्रः) परमैश्वर्यवान् जगदीश्वरः (मे) (शर्म) सुखम् (यच्छतु) ददातु (ब्रह्मा) सर्वेभ्यः प्रवृद्धः परमात्मा । अन्यत् पूर्ववत् ॥

१३—(यानि कानि) उक्तानुक्तानि (चित्) एव (शान्तानि) शान्तियुक्तानि कर्माणि (लोके) संसारे (सप्तऋषयः) म० १२ । मनोबुद्धिसहितानि पञ्चज्ञानेन्द्रियाणि (विदुः) जानन्ति (सर्वाणि) (शम्) शान्तकराणि (भवन्तु) (मे) मह्यम् (शम्) (मे) (अस्तु) (अभयम्) भयराहित्यम् (मे) (अस्तु) ॥

भावार्थ—मनुष्यों को योग्य है कि संसार के सब पदार्थों को साक्षात् करके उनसे यथावत् लाभ उठावें और धर्म का आचरण करते हुये धैर्य के साथ निर्भय रहें ॥ १३ ॥

पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौः शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः । ताभिः शान्तिभिः सर्वं शान्तिभिः शमयामोहं यदिह घोरं यदिह क्रूरं यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ॥ १४ ॥

पृथिवी । शान्तिः । अन्तरिक्षम् । शान्तिः । द्यौः । शान्तिः । आपः । शान्तिः । ओषधयः । शान्तिः । वनस्पतयः । शान्तिः । विश्वे । मे । देवाः । शान्तिः । सर्वे । मे । देवाः । शान्तिः । शान्तिः । शान्तिः । शान्ति-भिः ॥ ताभिः । शान्ति-भिः । सर्वे । शान्तिभिः । शम् । अयामः । अहम् । यत् । इह । घोरम् । यत् । इह । क्रूरम् । यत् । इह । पापम् । तत् । शान्तम् । तत् । शिवम् । सर्वम् । एव । शम् । अस्तु । नः ॥ १४ ॥

भाषार्थ—(पृथिवी) भूमि (शान्तिः) शान्तिदायक [हो], (अन्तरिक्षम्) मध्यलोक [वायुमण्डल, मेघमण्डल तारागण आदि] (शान्तिः) शान्तिदायक हो, (द्यौः) प्रकाशमान [सूर्य आदि] (शान्तिः) शान्तिदायक हो; (आपः) जल (शान्तिः) शान्तिदायक हो, (ओषधयः) ओषधें [अन्न सोम लता आदि] (शान्तिः) शान्तिदायक हों, (वनस्पतयः) वनस्पतियां [बट-

---

१४—(पृथिवी) भूमिः (शान्तिः) शान्तिकरी (अन्तरिक्षम्) मध्यलोकः (शान्तिः) (द्यौः) प्रकाशमानः सूर्यादिः (शान्तिः) (आपः) जलानि (शान्तिः) (ओषधयः) अन्नसोमलताद्याः (वनस्पतयः) वटादिवृक्षाः (शान्तिः) (विश्वे) सर्वे (मे) मह्यम् (देवाः) विद्वांसः (शान्तिः) (सर्वे) (मे) (देवाः) दिव्यपदार्थाः (शान्तिः) (शान्तिः) (शान्तिभिः) सुखदायिकाभिः क्रियाभिः

आदि वृत्त] (शान्तिः) शान्तिदायक हों, (विश्वे) सब (देवाः) विद्वान् लोग (मे) मेरे लिये (शान्तिः) शान्तिदायक हों, (सर्वे) सब (देवाः) उत्तम पदार्थ (मे) मेरे लिये (शान्तिः) शान्तिदायक हों, (शान्तिभिः) शान्तियों [सुख· दायक क्रियाओं] के साथ (शान्तिः) शान्ति, (शान्तिः) शान्ति [धैर्य आदि] हो। (ताभिः) उन (शान्तिभिः) शान्तियों [आनन्द क्रियाओं] से, (सर्व= सर्वाभिः) सब (शान्तिभिः) शान्तियों [धैर्य क्रियाओं] से (अहम्=वयम्) हम (शम्) शान्ति (अयामः) पावें, (यत्) जो कुछ (इह) यहां पर (घोरम्) घोर [भयङ्कर] हो, (यत्) जो कुछ (इह) यहां पर (क्रूरम्) क्रूर [निर्दय] हो, और (यत्) जो कुछ (इह) यहां पर (पापम्) पाप [अनिष्ट] हो, (तत्) वह (शान्तम्) शान्तियुक्त हो, (तत्) वह (शिवम्) कल्याण कारक हो, (सर्वम्) सब (एव) ही (नः) हमारे लिये (शम्) शान्तिदायक (अस्तु) हो ॥ १४ ॥

भावार्थ—मनुष्यों को प्रयत्न करना चाहिये कि पृथिवी आदि पदार्थ सदा सुखदायक होवें ॥ १४ ॥

यह मन्त्र कुछ भेद से यजुर्वेद में है—३६ । १७ ॥

इति प्रथमोऽनुवाकः ॥

अथ द्वितीयोऽनुवाकः ॥

सूक्तम् १० [शान्तिसूक्तम्] ॥

१—१० ॥ विश्वेदेवा देवताः ॥ १—५, ६ त्रिष्टुप्; ६, ८, १० निचृत् त्रिष्टुप्; ७ विराट्त्रिष्टुप् ॥

सृष्टिपदार्थेभ्य उपकारग्रहणोपदेशः—सृष्टि के पदार्थों से उपकार लेने का उपदेश ॥

(सर्व) विभक्तेर्लुक् । सर्वाभिः (शान्तिभिः) (शम्) शान्तिम् (अयामः) अय गतौ । प्राप्नुमः (अहम्) सुपां सुलुक्० । पा० ७ । १ । ३६ । इति जसः सुः । वयम् (यत्) यत् किञ्चित् (इह) संसारे (घोरम्) भयङ्करम् (यत्) (इह) (क्रूरम्) निर्दयम् (यत्) (इह) (पापम्) अनिष्टम् (तत्) पूर्वोक्तम् (शान्तम्) (तत्) (शिवम्) कल्याणकरम् (सर्वम्) (एव) निश्चयेन (शम्) शान्तिप्रदम् (अस्तु) (नः) अस्मभ्यम् ॥

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥

शम् । नः । इन्द्राग्नी इति । भवताम् । अवः-भिः । शम् । नः । इन्द्रावरुणा । रात-हव्या ॥ शम् । इन्द्रासोमा । सुवि-ताय । शम् । योः । शम् । नः । इन्द्रापूषणा । वाज-सातौ ॥१॥

भाषार्थ—(इन्द्राग्नी) बिजुली और साधारण अग्नि दोनों (अवोभिः) रक्षा साधनों के साथ (नः) हमें (शम्) शान्तिदायक (भवताम्) हों (रात-हव्या) ग्राह्य पदार्थों के देने हारे (इन्द्रावरुणा) बिजुली और जल दोनों (नः) हमें (शम्) शान्तिदायक [हों] । (शम्) शान्तिदायक (इन्द्रासोमा) बिजुली और चन्द्रमा (सुविताय) ऐश्वर्य के लिये (शम्) रोगनाशक और (योः) भयनिवारक हों,(इन्द्रापूषणा) बिजुली और पवन (वाजसातौ) पराक्रम के लाभ वा सङ्ग्राम में (नः) हमें (शम्) शान्तिदायक हों ॥१ ॥

भावार्थ—मनुष्यों को योग्य है कि परमेश्वर की सृष्टि में बिजुली आदि पदार्थों से सदा उपकार लेते रहें ॥ १ ॥

यह सूक्त, मन्त्र १-१० [मन्त्र ८ कुछ भेद से] ऋग्वेद में हैं—७ । ३५ । १-१०, और महर्षि दयानन्दकृत भाष्य में भी व्याख्यात हैं; यह मन्त्र कुछ भेद से यजुर्वेद में है—३६ । ११ ॥

१—(शम्) सुखकारकौ (नः) अस्मभ्यम् (इन्द्राग्नी) विद्युत्पावकौ (भवताम्) (अवोभिः) रक्षासाधनैः (शम्) (नः) (इन्द्रावरुणा) विद्युज्जले (रातहव्या) रातानि दत्तानि हव्यानि ग्राह्याणि वस्तूनि याभ्यां तौ (शम्) सुखकरौ (इन्द्रासोमा) विद्युच्चन्द्रौ (सुविताय) पिशेः किच्च । उ० ३ । ६५। षू ऐश्वर्ये—इतन् स च कित् । ऐश्वर्याय (शम्) शमु उपशमे—विच् । रोगनाशकौ (योः) अ० १ । ६ । १ । अन्येभ्योऽपि दृश्यन्ते । पा० ३ । २ । ७५ । इति यु मिश्रणामिश्रणयोः—विच्, सकारश्छान्दसः,यद्वा । यु-डोसि । शंयोः......शमनं च रोगाणां यावनं च भयानाम्–निरु० ४ । २१ । भयनिवारकौ (वाजसातौ) षण संभक्तौ—क्तिन् । पराक्रमस्य लाभे सङ्ग्रामे वा ॥

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः । शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥ २ ॥

शम् । नः । भगः । शम् । ऊं इति । नः । शंसः । अस्तु । शम् । नः । पुरम्-धिः । शम् । ऊं इति । सन्तु । रायः ॥ शम् । नः । सत्यस्य । सु-यमस्य । शंसः । शम् । नः । अर्यमा । पुरु-जातः । अस्तु ॥ २ ॥

भाषार्थ—(नः) हमारा (भगः) ऐश्वर्य (शम्) शान्तिदायक, (उ) और (नः) हमारी (शंसः) स्तुति (शम्) शान्तिदायक (अस्तु) हो (नः) हमारी [पुरंधिः] नगरों की धारण करने हारी बुद्धि (शम्) शन्तिदायक हो, (उ) और (रायः) सब प्रकार के धन (शम्) शान्तिदायक (सन्तु) हों। (नः) हमारा (सत्यस्य) सच्चे (सुयमस्य) सुन्दर नियम का (शंसः) कथन (शम्) शान्तिदायक हो, (पुरुजातः) बहुत प्रसिद्ध (अर्यमा) श्रेष्ठों का मान करने हारा [न्यायकारी परमेश्वर] (नः) हमें (शम्) शान्तिदायक (अस्तु) हो ॥ २ ॥

भावार्थ—मनुष्य प्रयत्न करें कि उनका ऐश्वर्य, उनका कथन, उनका शासन आदि सब कार्य न्याययुक्त हो, जिससे वह जगदीश्वर सदा आनन्द देवे ॥ २ ॥

२—(शम्) शान्तिप्रदः (नः) अस्माकम् (भगः) ऐश्वर्यम् (शम्) (उ) चार्थे (नः) (शंसः) शंसु हिंसास्तुतिकथनेषु—घञ् । स्तुतिः, कथनम् (अस्तु) (शम्) (नः) (पुरंधिः) कर्मण्यधिकरणे च । पा० ३ । ३ । ९३ । पुर् + डु धाञ् धारणपोषणयोः—किप्रत्ययः, अलुक्समासः । पुरन्धिर्बहुधीः—निरु० ६ । १३ । पुरं गृहं नगरं शरीरं वा दधातीति । नगरस्य धारिका बुद्धिः (शम्) (उ) (सन्तु) (रायः) धनानि (शम्) (नः) (सत्यस्य) यथार्थस्य (सुयमस्य) शोभननियमस्य (शंसः) कथनम् (शम्) (नः) अस्मभ्यम् (अर्यमा) श्रेष्ठानां मानकर्ता न्यायकारी परमेश्वरः (पुरुजातः) बहुप्रसिद्धः (अस्तु) ॥

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः। शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥ ३ ॥

शम्। नः। धाता। शम्। ऊं इति। धर्ता। नः। अस्तु। शम्। नः। उरूची। भवतु। स्वधाभिः॥ शम्। रोदसी इति। बृहती इति। शम्। नः। अद्रिः। शम्। नः। देवानाम्। सु-हवानि। सन्तु ॥ ३ ॥

भाषार्थ—(धाता) पोषण करने वाला [पदार्थ] (नः) हमें (शम्) शान्तिकारक हो, (उ) और (धर्ता) धारण करने वाला [पदार्थ] (नः) हमें (शम्) शान्तिकारक (अस्तु) हो, (उरूची) बहुत फैली हुयी प्रकृति [जगत् सामग्री] (नः) हमें (स्वधाभिः) अपनी धारण शक्तियों से (शम्) शान्तिकारक (भवतु) हो। (बृहती) दोनों बड़े (रोदसी) सूर्य और भूमि, (शम्) शान्तिकारक हों (अद्रिः) मेघ (नः) हमें (शम्) शान्तिकारक हो, (देवानाम्) विद्वानों के (सुहवानि) सुन्दर बुलावे (नः) हमें (शम्) शान्तिकारक (सन्तु) होवें ॥ ३ ॥

भावार्थ—मनुष्यों को चाहिये कि वे धारण पोषण करने वाले पदार्थों के तत्त्व, प्रकृति के स्वभाव, सूर्य, पृथिवी, मेघ आदि के प्रभावों के ज्ञान से उपकारी होकर विद्वानों में प्रतिष्ठा पाकर सुखी होवें ॥ ३ ॥

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना

३—(शम्) शान्तिकारकः (नः) अस्मभ्यम् (धाता) पोषकः पदार्थः (शम्) (उ) चार्थे (धर्ता) धारकः पदार्थः (नः) (अस्तु) (शम्) (नः) (उरूची) बह्वञ्चना। विस्तीर्णव्यापिका प्रकृतिः (भवतु) (स्वधाभिः) आत्मधारणशक्तिभिः (शम्) (रोदसी) द्यावापृथिव्यौ (बृहती) बृहत्यौ। विशाले (शम्) (नः) (अद्रिः) मेघः (शम्) (नः) (देवानाम्) विदुषाम् (सुहवानि) सत्कारेणाह्वानानि (सन्तु) ॥

शम् । शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥ ४ ॥

शम् । नः । अग्निः। ज्योतिः-अनीकः । अस्तु । शम् । नः । मित्रावरुणौ । अश्विना । शम् ॥ शम् । नः । सु-कृताम् । सु-कृतानि । सन्तु । शम् । नः । इषिरः । अभि । वातु । वातः ॥४

भाषार्थ—(ज्योतिरनीकः) ज्योति को सेना समान रखने वाला (अग्निः) अग्नि (नः) हमें (शम्) शान्तिकारक (अस्तु) हो, (मित्रावरुणौ) दोनों दिन और राति (नः) हमें (शम्) शान्तिकारक हों (अश्विना) दोनों सूर्य और चन्द्रमा (शम्) शान्तिकारक हों । (सुकृताम्) सुकर्मियों के (सुकृतानि) पुण्य कर्म (नः) हमें (शम्) शान्तिकारक (सन्तु) हों, (इषिरः) शीघ्र गामी (वातः) पवन (नः) हमारे लिये (शम्) शान्तिकारक (अभि) सब ओर से (वातु) चले ॥ ४ ॥

भावार्थ—जो मनुष्य अग्नि, दिन राति, सूर्य चन्द्रमा और वायु आदि की गति से विद्वानों के समान उपकार लेते हैं वे सुखी रहते हैं ॥ ४ ॥

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु । शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥

शम् । नः। द्यावापृथिवी इति । पूर्व-हूतौ । शम् । अन्तरिक्षम् । दृशये । नः । अस्तु ॥ शम् । नः । ओषधीः । वनिनः । भवन्तु । शम् । नः । रजसः । पतिः । अस्तु । जिष्णुः ॥ ५ ॥

४—(शम्) शान्तिप्रदः (नः) (अग्निः) पावकः (ज्योतिरनीकः) ज्योतिरेवानीकं सैन्यमिव यस्य सः (अस्तु) (शम्) (नः) (मित्रावरुणौ) अहोरात्रे (अश्विना) सूर्याचन्द्रमसौ (शम्) (शम्) (नः) (सुकृताम्) पुण्यकर्मणाम् (सुकृतानि) पुण्यकर्माणि (सन्तु) (शम्) (नः) अस्मभ्यम् (इषिरः) वेगवान् (अभि) सर्वतः (वातु) गच्छतु (वातः) वायुः ॥

भाषार्थ—(पूर्वहूतौ) पहिले बुलावे [अर्थात् कार्य के आरम्भ में] (द्यावापृथिवी) सूर्य और भूमि (नः) हमें (शम्) शान्तिदायक हों, (अन्तरिक्षम्) मध्यलोक [मध्यवर्ती अवकाश] (दृशये) देखने के लिये (नः) हमें (शम्) शान्तिदायक (अस्तु) हो । (ओषधीः) ओषधियां [अन्न सोमलता आदि] और (वनिनः) वन के पदार्थ (नः) हमें (शम्) शान्तिदायक (भवन्तु) हों (रजसः) लोक का (पतिः) स्वामी (जिष्णुः) विजयी मनुष्य (नः) हमें (शम्) शान्तिदायक (अस्तु) हो ॥ ५ ॥

भावार्थ—कार्य के आरम्भ में मनुष्य विचार लें कि सूर्य और भूमि के कारण से ग्रीष्म, वर्षा, शीत आदि ऋतुयें अनुकूल हों, आकाश निर्मल हो, अन्न आदि पदार्थ पुष्कल हों, जिससे मनोरथ सिद्धि में विजय प्राप्त हो ॥ ५ ॥

शं नु इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥६॥

शम् । नः । इन्द्रः । वसु-भिः । देवः । अस्तु । शम् । आदित्येभिः । वरुणः । सु-शंसः ॥ शम् । नः । रुद्रः । रुद्रेभिः । जलाषः । शम् । नः । त्वष्टा । ग्नाभिः । इह । शृणोतु ॥ ६ ॥

भाषार्थ—(देवः) प्रकाशमान (इन्द्रः) सूर्य (वसुभिः) अनेक धनों वा किरणों से (नः) हमें (शम्) शान्तिदायक (अस्तु) हो, (सुशंसः) उत्तम गुण वाला (वरुणः) जल (आदित्येभिः) सूर्य के किरणों के साथ (शम्) शान्ति-

---

५—(शम्) शान्तिप्रदौ (नः) अस्मभ्यम् (द्यावापृथिवी) सूर्यभूमिलोकौ (पूर्वहूतौ) प्रथमाह्वाने । कार्यारम्भे (शम्) (अन्तरिक्षम्) मध्यवर्त्यवकाशः (दृशये) दर्शनाय (नः) (अस्तु) (शम्) (नः) (ओषधीः) अन्नसोमलतादयः (वनिनः) वने भवाः पदार्थाः (भवन्तु) (शम्) (नः) (रजसः) लोकस्य (पतिः) पालकः पुरुषः (अस्तु) (जिष्णुः) विजयी ॥

६—(शम्) शान्तिप्रदः (नः) अस्मभ्यम् (इन्द्रः) सूर्यः (वसुभिः) धनैः । किरणैः (देवः) प्रकाशमानः (अस्तु) (शम्) (आदित्येभिः) आदित्यगण । आदित्यकिरणैः (वरुणः) जलसमूहः (सुशंसः) उत्तमगुणयुक्तः

दायक हो। (जलाषः) जीवों की अभिलाषा पूरी करने हारा (रुद्रः) ज्ञानदाता परमेश्वर (रुद्रेभिः) ज्ञानदाता मुनियों द्वारा (नः) हमें (शम्) शान्तिदायक हो, (शम्) शान्तिदायक (त्वष्टा) विश्वकर्मा जगदीश्वर) (ग्नाभिः) [हमारी] वाणियों द्वारा (इह) यहां पर (नः) हमारी [प्रार्थना] (शृणोतु) सुने ॥ ६ ॥

भावार्थ—जो मनुष्य सूर्य वा प्रकाश और जलादि की विद्या में निपुण होके परमात्मा के ज्ञान को प्राप्त होते हैं, वे सदा सुख पाते हैं ॥ ६ ॥

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः । शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः१ शम्वस्तु वेदिः ॥ ७ ॥

शम् । नः । सोमः । भवतु । ब्रह्म । शम् । नः । शम् । नः । ग्रावाणः । शम् । ऊं इति । सन्तु । यज्ञाः ॥ शम् । नः । स्वरूणाम् । मितयः । भवन्तु । शम् । नः । प्र-स्वः । शम् । ऊं इति । अस्तु । वेदिः ॥ ७ ॥

भाषार्थ—(सोमः) परम ऐश्वर्य वाला परमात्मा (नः) हमें (शम्) शान्तिदायक (भवतु) हो, (ब्रह्म) वेद (नः) हमें (शम्) शान्तिदायक हो, (ग्रावाणः) विज्ञानी लोग (नः) हमें (शम्) शान्तिदायक हों, (उ) और (यज्ञाः) यज्ञ [अग्निहोत्र से शिल्प क्रिया तक] (शम्) शान्तिदायक (सन्तु)

(शम्) (नः) (रुद्रः) रुतो ज्ञानस्य राता दाता (रुद्रेभिः) ज्ञानदातृभिर्मुनिभिः (जलाषः) जनी जनने ड+लष वाञ्छायाम्—घञ्। जानां जातानां लषो वाञ्छा यस्मात् सः (शम्) (नः) अस्माकं प्रार्थनाम् (त्वष्टा) विश्वकर्मा सर्वकर्ता (ग्नाभिः) वाग्भिः—निघ० १ । ११ (इह) अस्मिन् विषये (शृणोतु) आकर्णयतु ॥

७—(शम्) शान्तिप्रदः (सोमः) परमैश्वर्यवान् जगदीश्वरः (भवतु) (ब्रह्म) वेदः (शम्) (नः) (शम्) (नः) (ग्रावाणः) अन्येभ्योऽपि दृश्यन्ते । पा० ३ । २ । ७५ । गॄ निगरणे, वा गॄ शब्दे विज्ञापने च—क्वनिप्। विज्ञानिनः (शम्) (उ) चार्थे (सन्तु) (यज्ञाः) अग्निहोत्रादयः शिल्पान्ताः (शम्)

हों। (स्वरूणाम्) यूपों [जयस्तम्भों] के (मितयः) फैलाव (नः) हमें (शम्) शान्तिदायक (भवन्तु) हों, (प्रस्वः) ओषधें [अन्न सोम लता आदि] (नः) हमें (शम्) शान्तिदायक हों, (उ) और (वेदिः) वेदी [यज्ञकुण्ड, चौतरा आदि] (शम्) सुखदायक (अस्तु) हो ॥ ७ ॥

भावार्थ—मनुष्य परम पिता परमात्मा और परम पवित्र वेदों की शरण लेकर विद्वानों के मेल से यज्ञ और शिल्प विद्या का प्रचार करके संसार को सुख पहुंचावें ॥ ७ ॥

शं नः सूर्य उरुचक्षा उदेतु शं नो भवन्तु प्रदिशश्चतस्रः। शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥८॥

शम्। नः। सूर्यः। उरु-चक्षाः। उत्। एतु। शम्। नः। भवन्तु। प्र-दिशः। चतस्रः॥ शम्। नः। पर्वताः। ध्रुवयः। भवन्तु। शम्। नः। सिन्धवः। शम्। ऊं इति। सन्तु। आपः ॥ ८ ॥

भाषार्थ—(उरुचक्षाः) दूर तक दिखाने वाला (सूर्यः) सूर्य (नः) हमें (शम्) सुखदायक (उत् एतु) उदय हो, (चतस्रः) चारो (प्रदिश) बड़ी दिशायें (नः) हमें (शम्) सुखदायक (भवन्तु) होवें। (ध्रुवयः) दृढ़ (पर्वताः) पहाड़ (नः) हमें (शम्) सुखदायक (भवन्तु) हों, (सिन्धवः)

(नः) (स्वरूणाम्) शृस्वृस्निहि०। उ० १। १०। स्वृ शब्दोपतापयोः—उप्रत्ययः। यूपानाम्। विजयस्तम्भानाम् (मितयः) परिमाणानि। विस्ताराः (भवन्तु) (शम्) (नः) (प्रस्वः) प्र+सूयतेः—क्विप्। प्रकर्षेण सूयमाना जायमाना ओषधयः। अन्नसोमलतादयः (शम्) (उ) (अस्तु) (वेदिः) यज्ञकुण्डः। परिष्कृता चतुरस्रादिरूपा भूमिः ॥

८—(शम्) सुखप्रदः (नः) अस्मभ्यम् (सूर्यः) रविः (उरुचक्षाः) चक्षेर्बहुलं शिच्च। उ० ४। २३३। उरु+चक्षिङ् दर्शने—असि। विस्तीर्णं चक्षो दर्शनं यस्मात् सः (उदेतु) उदयं गच्छेतु (शम्) (नः) (भवन्तु) (प्रदिशः) प्रकृष्टाः पूर्वादयो दिशः (चतस्रः) (शम्) (नः) (पर्वताः)

समुद्र वा नदियां (नः) हमें (शम्) सुखदायक हों, (उ) और (आपः) जल [वा प्राण] (शम्) सुखदायक (सन्तु) हों ॥ ८ ॥

भावार्थ—जो मनुष्य विद्या बल से सूर्य के प्रकाश के समान सब दिशाओं को खोजते, पहाड़ों पर जाते, और नदियों को पार करते और कूप, वृष्टि आदि के जलों से खेती शिल्प आदि में काम लेते हैं, वे संसार में कीर्तिमान् होते हैं ॥ ८ ॥

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः । शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥९

शम् । नः । अदितिः । भवतु । व्रतेभिः । शम् । नः । भवन्तु । मरुतः । सु-अर्काः ॥ शम् । नः । विष्णुः । शम् । ऊं इति । पूषा । नः । अस्तु । शम् । नः । भवित्रम् । शम् । ऊं इति । अस्तु । वायुः ॥ ९ ॥

भाषार्थ—(अदितिः) अखण्ड वेदवाणी (व्रतेभिः) नियमों के साथ (नः) हमें (शम्) सुखदायक (भवतु) हो, (मरुतः) शूर वीर (स्वर्काः) बड़े पण्डित लोग (नः) हमें (शम्) सुखदायक (भवन्तु) हों। (विष्णुः) व्यापक यज्ञ (नः) हमें (शम्) सुखदायक हो, (उ) और (पूषा) पोषण करने वाली पृथिवी (नः) हमें (शम्) सुखदायक (अस्तु) हो, (भवित्रम्)

शैलाः (ध्रुवयः) भुजेः किच्च । उ० ४ । १४२ । ध्रु स्थैर्ये—इप्रत्ययः कित् । स्थिराः (भवन्तु) (शम्) (नः) (सिन्धवः) समुद्रा नद्यो वा (शम्) (उ) (सन्तु) (आपः) जलानि प्राणा वा ॥

९—(शम्) सुखप्रदा (नः) अस्मभ्यम् (अदितिः) अखण्डवेदवाणी (भवतु) (व्रतेभिः) नियमैः (शम्) (नः) (भवन्तु) (मरुतः) शूरवीराः (स्वर्काः) सुपूजनीयाः पण्डिताः (शम्) (नः) (विष्णुः) व्यापको यज्ञः (शम्) (उ) (पूषा) पोषिका पृथिवी—निघ० १ । १ (नः) (अस्तु) (शम्) (नः) (भवित्रम्) अशित्रादिभ्य इत्रोत्रौ । उ० ४ । १७३ । भू सत्तायाम्—इत्र प्रत्ययः ।

रहने का घर (नः) हमें (शम्) सुखदायक हो, (उ) और (वायुः) वायु (शम्) सुखदायक (अस्तु) हो ॥ ९ ॥

भावार्थ—मनुष्य वेद वाणी द्वारा उत्तम नियमों को ग्रहण करके विद्वानों के सत्संग से सब पदार्थों से उपकार लेकर पृथिवी पर सुख बढ़ाते रहें ॥ ९ ॥

शं नो॑ दे॒वः स॑वि॒ता त्राय॑माणः॒ शं नो॑ भवन्तू॒षसो॑ विभा॒तीः ।
शं नः॑ प॒र्जन्यो॑ भवतु प्र॒जाभ्यः॒ शं नः॒ क्षेत्र॑स्य॒ पति॑रस्तु श॒म्भुः ॥१०

शम् । नः॒ । दे॒वः । स॒वि॒ता । त्राय॑माणः । शम् । नः॒ । भव॒न्तु॒ । उ॒षसः॑ । वि॒-भा॒तीः ॥ शम् । नः॒ । प॒र्जन्यः॑ । भव॒तु॒ । प्र॒-जाभ्यः॑ । शम् । नः॒ । क्षेत्र॑स्य । पतिः॑ । अ॒स्तु॒ । श॒म्-भुः ॥१०

भाषार्थ—(देवः) प्रकाशमान (सविता) लोकों का चलाने वाला सूर्य (त्रायमाणः) रक्षा करता हुआ (नः) हमें (शम्) सुखदायक हो, (विभातीः) जगमगाती हुई (उषसः) प्रभात वेलायें (नः) हमें (शम्) सुखदायक (भवन्तु) हों। (पर्जन्यः) सींचने वाला मेघ (नः) हमें और (प्रजाभ्यः) प्रजाओं के लिये (शम्) सुखदायक (भवतु) हो, (शम्भुः) मङ्गल दाता (क्षेत्रस्य) खेत का (पतिः) स्वामी (नः) हमें (शम्) सुखदायक (अस्तु) हो ॥ १० ॥

भावार्थ—मनुष्य सूर्य के ताप की अनुकूलता का और मेघ से वृष्टि आदि का विचार करके खेती आदि व्यवहार करें और अन्न आदि की वृद्धि से सुखी होवें ॥ १० ॥

भुवनम् । निवासस्थानम् (शम्) (उ) (अस्तु) (वायुः) पवनः ॥

१०—(शम्) शान्तिप्रदः (नः) अस्मभ्यम् (देवः) प्रकाशमानः (सविता) लोकप्रेरकः सूर्यः (त्रायमाणः) रक्षन् (शम्) (नः) (भवन्तु) (उषसः) प्रभातवेलाः (विभातीः) विभात्यः । विशेषेण दीप्यमानाः (शम्) (नः) (पर्जन्यः) पर्जन्यः । उ० ३ । १०३ । पृषु सेचने—अन्यप्रत्ययः, षस्य जः । वृष्टिप्रदो मेघः (भवतु) (प्रजाभ्यः) प्रजानां हिताय (शम्) (क्षेत्रस्य) क्षि ऐश्वर्य, निवासे च—ष्ट्रन् । शस्योत्पत्तिस्थानस्य (पतिः) स्वामी (अस्तु) (शम्भुः) मङ्गलप्रदः ॥

सूक्तम् ११ [शान्तिसूक्तम्] ॥

१—६ ॥ विश्वे देवा देवताः ॥ १, २, ५, ६ त्रिष्टुप्; ३ भुरिगार्षी पङ्क्तिः; ४ निचृत् त्रिष्टुप् ॥

इष्टप्राप्त्युपदेशः—इष्ट की प्राप्ति का उपदेश ॥

शं नः॑ स॒त्यस्य॒ पत॑यो भवन्तु॒ शं नो॒ अर्व॑न्तः॒ शमु॑ सन्तु॒ गावः॑ ।
शं न॑ ऋ॒भवः॑ सु॒कृतः॑ सु॒हस्ताः॒ शं नो॑ भवन्तु पि॒तरो॒ हवे॑षु ॥ १ ॥

शम् । नः॒ । स॒त्यस्य॑ । पत॑यः । भ॒वन्तु॒ । शम् । नः॒ । अर्व॑न्तः । शम् । ऊं॒ इति॑ । स॒न्तु॒ । गावः॑ ॥ शम् । न॒ः । ऋ॒भवः॑ । सु॒-कृतः॑ । सु॒-हस्ताः॑ । शम् । न॒ः । भ॒वन्तु॒ । पि॒तरः॑ । हवे॑षु ॥ १ ॥

भाषार्थ—(सत्यस्य) सत्य के (पतयः) पालन करने वाले पुरुष (नः) हमें (शम्) सुखदायक (भवन्तु) हों, (अर्वन्तः) घोड़े (नः) हमें (शम्) सुखदायक, (उ) और (गावः) गौयें और बैल (शम्) सुखदायक (सन्तु) हों। (ऋभवः) बुद्धिमान् (सुकृतः) बड़े काम करने वाले (सुहस्ताः) हस्त क्रिया में चतुर लोग (नः) हमें (शम्) सुखदायक हों, (पितरः) पितर [पिता आदि रक्षक पुरुष] (नः) हमें (हवेषु) बुलावों पर [यज्ञों वा संग्रामों में] (शम्) सुखदायक (भवन्तु) हों ॥ १ ॥

भावार्थ—मनुष्यों को सत्यव्रती पुरुषों का अनुकरण करके ऐसा प्रयत्न करना चाहिये कि घोड़े शीघ्र गामी और गौवें दुधैल, बैल रथादि चलाने वाले, बुद्धिमान् लोग हस्त क्रिया में चतुर और कर्तव्य परायण हों ॥ १ ॥

यह मन्त्र ऋग्वेद में है—७ । ३५ । १२ ॥

१—(शम्) सुखप्रदाः (नः) अस्मभ्यम् (सत्यस्य) यथार्थव्यवहारस्य (पतयः) पालकाः (भवन्तु) (शम्) (नः) (अर्वन्तः) अश्वाः (शम्) (उ) चार्थे (सन्तु) (गावः) धेनवो वृषभाश्च (शम्) (नः) (ऋभवः) मेधाविनः (सुकृतः) महाकर्माणः (सुहस्ताः) हस्तक्रियायां कुशलाः (शम्) (नः) (भवन्तु) (पितरः) पित्रादिरक्षकाः (हवेषु) आह्वानेषु । यज्ञेषु । सङ्ग्रामेषु ॥

शं नो॑ दे॒वा वि॒श्वदे॑वा भवन्तु॒ शं सर॑स्वती स॒ह धी॒भिर॑स्तु । श॒म॑भि॒षाचः॒ शमु॑ राति॒षाचः॒ शं नो॑ दि॒व्याः पार्थि॑वाः॒ शं नो॒ अप्याः॑ ॥ २ ॥

शम् । नः॒ । दे॒वाः । वि॒श्व-दे॑वाः । भ॒व॒न्तु॒ । शम् । सर॑स्वती । स॒ह । धी॒भिः । अ॒स्तु॒ ॥ शम् । अ॒भि॒-साचः॑ । शम् । ऊं॒ इति॑ । रा॒ति॒-साचः॑ । शम् । नः॒ । दि॒व्याः । पार्थि॑वाः । शम् । नः॒ । अप्याः॑ ॥ २ ॥

भाषार्थ—(विश्वदेवाः) सब विजय चाहने वाले, (देवाः) विद्वान् लोग (नः) हमें (शम्) सुखदायक (भवन्तु) हों, (सरस्वती) विज्ञानवती वेद विद्या (धीभिः सह) अनेक क्रियाओं के साथ (शम्) सुखदायक (अस्तु) हो। (अभिषाचः) सब ओर से मिलनसार लोग (शम्) सुखदायक हों, (उ) और (रातिषाचः) दानों की वर्षा करने हारे (शम्) सुखदायक हों, (दिव्याः) आकाश सम्बन्धी पदार्थ [वायु, मेघ, विमान आदि] और (पार्थिवाः) पृथिवी सम्बन्धी पदार्थ [राज्य, सुवर्ण, अग्नि, रथ आदि] (नः) हमें (शम्) सुखदायक हों, (अप्याः) जल सम्बन्धी पदार्थ [मोती, मूंगा, नौका आदि] (नः) हमें (शम्) सुखदायक हों ॥ २ ॥

भावार्थ—जो मनुष्य विजयी आप्त विद्वानों को प्राप्त होकर सब विद्याओं की वृद्धि करते हैं, वे ही सब संसार पर शासन करते हैं ॥ २ ॥

यह मन्त्र ऋग्वेद में है—७ । ३५ । २ ॥

२—(शम्) सुखप्रदाः (नः) अस्मभ्यम् (देवाः) विद्वांसः (विश्वदेवाः) सर्वे विजिगीषवः (भवन्तु) (शम्) (सरस्वती) विज्ञानवती वेदविद्या (सह) साकम् (धीभिः) क्रियाभिः (अस्तु) (शम्) (अभिषाचः) अभि+षच समवाये-ण्वि । सर्वतः संगच्छमानाः पुरुषाः (रातिषाचः) राति+षच सेचने—ण्वि । दानानां वृष्टिकर्तारः (शम्) (नः) (दिव्याः) आकाशसम्बन्धिनो वायुमेघविमानादयः (पार्थिवाः) पृथिव्यां विद्यमाना राज्यसुवर्णादयः (शम्) (नः) (अप्याः) जलसम्बन्धिनो मुक्ताविद्रुमनौकादयः ॥

शं नो अज एकपाद् देवो अस्तु शमहिर्बुध्न्य१: शं समुद्रः।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥३॥

शम्। नः। अजः। एक-पात्। देवः। अस्तु। शम्। अहिः। बुध्न्यः। शम्। समुद्रः॥ शम्। नः। अपाम्। नपात्। पेरुः। अस्तु। शम्। नः। पृश्निः। भवतु। देव-गोपा॥ ३॥

भाषार्थ—(अजः) अजन्मा, (एकपात्) एक डग वाला [एक रस व्यापक], (देवः) प्रकाशमय परमात्मा (नः) हमें (शम्) शान्तिदायक (अस्तु) हो, (अहिः) न मारने वाला, (बुध्न्यः) मूल तत्त्वों में रहने वाला [आदि कारण जगदीश्वर] (शम्) शान्तिदायक हो, (समुद्रः) यथावत् सींचने वाला ईश्वर (शम्) शान्तिदायक हो। (अपाम्) प्रजाओं का (नपात्) न गिराने वाला, (पेरुः) पार लगाने वाला (नः) हमें (शम्) शान्तिदायक (अस्तु) हो, (देवगोपा) प्रकाशमय परमात्मा से रक्षा की गयी (पृश्निः) पूंछने योग्य प्रकृति [जगत् सामग्री] (नः) हमें (शम्) शान्तिदायक (भवतु) हो॥ ३॥

भावार्थ—जगत् पिता परमात्मा की महिमा को विचारता हुआ मनुष्य

३—(शम्) शान्तिप्रदः (नः) अस्मभ्यम् (अजः) अजन्मा जगदीश्वरः (एकपात्) सर्वं जगदेकस्मिन् पादे पादगतिप्रमाणे अंशे वा यस्य सः (देवः) प्रकाशमयः परमात्मा (अस्तु) (शम्) (अहिः) आङि श्रिहनिभ्यां ह्रस्वश्च। उ० ४। १३८। इति बाहुलकात्, नञ्+हन वधे—इण्, डित्। अहन्ता। अमारकः (बुध्न्यः) बुध्नेषु तत्त्वमूलेषु विद्यमानः (शम्) (समुद्रः) समुद्र आदित्यः, समुद्र आत्मा—निरु० १४। १६। सर्वसेचकः परमात्मा (शम्) (नः) (अपाम्) प्रजानाम् (नपात्) न पातयिता। सर्वदा रक्षकः (पेरुः) मीपीभ्यां रुः। उ० ४। १०१। पीङ् पाने—रुप्रत्ययः। यद्वा पा रक्षणे—रुप्रत्ययः, आकारस्य एकारः। यद्वा पार कर्मसमाप्तौ—उप्रत्ययः आकारस्य एकारः। पानकर्ता। रक्षकः। पारयिता (अस्तु) (शम्) (नः) (पृश्निः) प्रष्टव्या प्रकृतिः। जगत्सामग्री (भवतु) (देवगोपा) देव+गुपू रक्षणे—अच्, टाप्। देवः परमेश्वरो गोपो रक्षको यस्याः सा॥

प्रकृति के संयोग वियोग को खोज कर अपनी उन्नति करे ॥ ३ ॥

मन्त्र ३—५ कुछ भेद से ऋग्वेद में हैं—७ । ३५ । १३—१५ ॥

आदित्या रुद्रा वसवो जुषन्तामिदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥४

आदित्याः । रुद्राः । वसवः । जुषन्ताम् । इदम् । ब्रह्म । क्रियमाणम् । नवीयः ॥ शृण्वन्तु । नः । दिव्याः । पार्थिवासः । गो-जाताः । उत । ये । यज्ञियासः ॥ ४ ॥

भाषार्थ—(आदित्याः) अखण्ड ब्रह्मचारी, (रुद्राः) ज्ञानदाता और (वसवः) श्रेष्ठ विद्वान् लोग (इदम्) इस (क्रियमाणम्) सिद्ध होते हुये (नवीयः) अधिक नवीन (ब्रह्म) धन वा अन्न को (जुषन्ताम्) सेवें । (दिव्याः) दिव्य [कामना योग्य] गुण वाले, (पार्थिवासः) पृथिवी के स्वामी (उत) और (गोजाताः) वाणी में प्रसिद्ध [सत्यवक्ता] पुरुष, (ये) जो (यज्ञियासः) पूजा योग्य हैं, (नः) हमारी [प्रार्थना] (शृण्वन्तु) सुनें ॥ ४ ॥

भावार्थ—मनुष्य धार्मिक विद्वानों को अच्छे प्रकार प्रसन्न करके मनोरथ सिद्ध करें ॥ ४ ॥

ये देवानामृत्विजो यज्ञियासो मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥५॥

ये । देवानाम् । ऋत्विजः । यज्ञियासः । मनोः । यजत्राः । अमृताः । ऋत-ज्ञाः ॥ ते । नः । रासन्ताम् । उरु-गायम् ।

४—(आदित्याः) अदिति—ण्य । अखण्डब्रह्मचारिणः (रुद्राः) रुतो ज्ञानस्य रातारो दातारः (वसवः) श्रेष्ठपुरुषाः (जुषन्ताम्) सेवन्ताम् (इदम्) (ब्रह्म) धनमन्नं वा (क्रियमाणम्) सम्पाद्यमानम् (नवीयः) अधिकनूतनम् (शृण्वन्तु) (नः) अस्माकं प्रार्थनाम् (दिव्याः) दिवि कमनीये गुणे भवाः (पार्थिवासः) पृथिवीश्वराः (गोजाताः) गवि सत्यवाचि प्रसिद्धाः (उत) अपि (ये) (यज्ञियासः) पूजार्हाः ॥

अद्य । यूयम् । पात । स्वस्ति-भिः । सदा । नः ॥ ५ ॥

भाषार्थ—(ये) जो लोग (देवानाम्) विद्वानों के बीच (ऋत्विजः) ऋतु ऋतु में यज्ञ [श्रेष्ठव्यवहार] करने हारे, (यज्ञियासः) पूजा योग्य, (मनोः) ज्ञान के (यजत्राः) देने हारे, (अमृताः) अमर [कीर्ति वाले] और (ऋतज्ञाः) सत्य धर्म के जानने हारे हैं । (ते) वे (नः) हमें (अद्य) आज (उरुगायम्) चौड़ा मार्ग [वा बहुत ज्ञान] (रासन्ताम्) देवें, (यूयम्) तुम [विद्वानों] (स्वस्तिभिः) अनेक सुखों से (सदा) सदा (नः) हमारी (पात) रक्षा करो ॥ ५ ॥

भावार्थ—जो लोग विद्वानों में महाविद्वान्, जीवनमुक्त, परोपकारी हों, उनकी आज्ञा पालन करके हम सदा सुखी रहें ॥ ५ ॥

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ ६ ॥

तत् । अस्तु । मित्रावरुणा । तत् । अग्ने । शम् । योः । अस्मभ्यम् । इदम् । अस्तु । शस्तम् ॥ अशीमहि । गाधम् । उत । प्रति-स्थाम् । नमः । दिवे । बृहते । सदनाय ॥ ६ ॥

भाषार्थ—(मित्रावरुणा) हे स्नेही और श्रेष्ठ माता पिता ! दोनो और (अग्ने) हे विद्वान् आचार्य ! (अस्मभ्यम्) हमारे लिये (तत्) यही (शम्)

५—(ये) महाविद्वांसः (देवानाम्) विदुषां मध्ये (ऋत्विजः) ऋतावृतौ यष्टारः श्रेष्ठकर्मकर्त्तारः (यज्ञियासः) पूजार्हाः (मनोः) ज्ञानस्य (यजत्राः) दातारः (अमृताः) अमराः । कीर्तिमन्तः (ऋतज्ञाः) सत्यधर्मस्य ज्ञातारः (ते) पूर्वोक्ताः (नः) अस्मभ्यम् (रासन्ताम्) ददतु (उरुगायम्) गै शब्दे गाङ् गतौ वा—घञ्, युगागमः विस्तीर्णमार्गम् । बहुज्ञानम् (अद्य) अस्मिन् दिने (यूयम्) (पात) रक्षत (स्वस्तिभिः) कल्याणैः (सदा) (नः) अस्मान् ॥

६—(तत्) वक्ष्यमाणम् (अस्तु) (मित्रावरुणा) हे स्नेहिश्रेष्ठौ मातापितरौ (तत्) (अग्ने) हे विद्वन्नाचार्य (शम्) शान्तिकरम् । रोगनाशकम्

शान्तिदायक [रोगनाशक], (तत्) यही (योः) भयनिवारक (अस्तु) होवे और (इदम्) यही (शस्तम्) बड़ाई योग्य (अस्तु) होवे। [कि] (गाधम्) गम्भीरता, (प्रतिष्ठाम्) प्रतिष्ठा [गौरव] (उत) और (नमः) सत्कार को (दिवे) कामना योग्य (बृहते) विशाल (सदनाय) स्थान के लिये (अशीमहि) हम पावें ॥ ६ ॥

भावार्थ–मनुष्य माता पिता और आचार्य आदि विद्वानों की सेवा से उत्तम गुण प्राप्त करके संसार में गम्भीर, प्रतिष्ठित और आदर योग्य होकर उच्च पद पावें ॥ ६ ॥

यह मन्त्र ऋग्वेद में है—५। ४७। ७ ॥

सूक्तम् १२ ॥

मन्त्रः १॥ उषा देवता ॥ भुरिगार्षी पङ्क्तिश्छन्दः।

मनुष्यकर्तव्योपदेशः–मनुष्य के कर्तव्य का उपदेश ॥

उषा अप् स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ १ ॥

उषाः। अप। स्वसुः। तमः। सम्। वर्तयति। वर्तनिम्। सु-जातता ॥ अया। वाजम्। देव-हितम्। सनेम। मदेम। शत-हिमाः। सु-वीराः ॥ १ ॥

भाषार्थ—(उषाः) प्रभात वेला (स्वसुः) [अपनी] बहिन [रात्रि] के (तमः) अन्धकार को (अप =अपवर्तयति) हटा देती है, और (सुजातता)

(योः) सू० १० म० १ । भयनिवारकम् (अस्मभ्यम्) (इदम्) (अस्तु) (शस्तम्) प्रशंसनीयम् (अशीमहि) अशू व्याप्तौ—विधिलिङि विकरणस्य लुक्। अश्नुवीमहि। प्राप्नुयाम् (गाधम्) गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च—घञ्। गाम्भीर्यम् (उत) अपि (प्रतिष्ठाम्) गौरवम् (नमः) सत्कारम् (दिवे) कमनीयाय (बृहते) महते (सदनाय) स्थानाय। अधिकाराय ॥

१—(उषाः) प्रभातवेला (अप) अपवर्तयति। निवारयति (स्वसुः) भगिन्या रात्रेः (तमः) अन्धकारम् (सम्) परस्परम् (वर्तयति) प्रवर्तयति।

[अपनी] भलमनसाहत से (वर्तनिम्) [उसके लिये] मार्ग (सम्) मिल कर (वर्तयति) बता देती है। (अया) इस [नीति] से (शतहिमाः) सौ वर्ष जीवते हुये और (सुवीराः) सुन्दर वीरों को रखते हुये हम (देवहितम्) विद्वानों के हितकारी (वाजम्) विज्ञान को (सनेम) बांटें और (मदेम) आनन्द करें ॥ १ ॥

भावार्थ—पृथिवी की गोलाई के कारण आधे भूगोल में एक साथ प्रकाश करने से उषा रात्रि को हटाकर जितनी आगे बढ़ती है, उतना ही स्थान रात्रि को पीछे से देती चलती है और दोनों प्रीति पूर्वक मिलकर जगत् का उपकार करती हैं, इसी प्रकार सब मनुष्य ज्ञान के प्रचार से परस्पर उपकार करके बड़े बड़े धैर्यवान् बलवानों सहित पूर्ण आयु भोगें ॥ १ ॥

इस मन्त्र का पूर्वार्द्ध—ऋग्वेद में है १० । १७२ । ४ और उत्तरार्द्ध ऋग्० ६ । १७ । १५ और सामवेद पू० ५ । ७ । ७ ॥

सूक्तम् १३ [अप्रतिरथसूक्तम्-युद्ध यात्रा का राग] ॥

१—११ ॥ इन्द्रो देवता ॥ १, २, ७, ८, १० त्रिष्टुप्; ३—६ भुरिक् त्रिष्टुप्; ६ निचृत् त्रिष्टुप्; ११ आर्षी त्रिष्टुप् ॥

सेनापतिकृत्योपदेशः—सेनापति के कर्तव्य का उपदेश ॥

इन्द्र॑स्य बा॒हू स्थवि॑रौ वृषा॑णौ चि॒त्रा इ॒मा वृ॑ष॒भौ पा॑रयि॒ष्णू । तौ यो॑क्षे प्रथ॒मो योग॒ आग॑ते याभ्यां॑ जि॒तमसु॑राणां॒ स्व१॒र्यत् ॥१॥

इन्द्र॑स्य । बा॒हू इति॑ । स्थवि॑रौ । वृषा॑णौ । चि॒त्रा । इ॒मा । वृ॒ष॒भौ । पा॒र॒यि॒ष्णू इति॑ ॥ तौ । यो॒क्षे॒ । प्र॒थ॒मः । योगे॑ । आ-ग॑ते । याभ्या॑म् । जि॒तम् । असु॑राणाम् । स्व॑: । यत् ॥१॥

भाषार्थ—(इन्द्रस्य) इन्द्र [परम ऐश्वर्यवान् पुरुष सेनापति] के

प्रसारयति (वर्तनिम्) वृत्तेश्च । उ० २ । १०६ । वृतु वर्तने—अनि । मार्गम् (सुजातता) सुजाततया । श्रेष्ठगुणवत्त्वेन (अया) अनया नीत्या (वाजम्) विज्ञानम् (देवहितम्) विद्वद्भ्यो हितकरम् (सनेम) विभजेम (मदेम) आनन्देम (शतहिमाः) शतवर्षजीविनः (सुवीराः) उत्तमवीरयुक्ताः ॥

१—(इन्द्रस्य) परमैश्वर्यवतः सेनापतेः (बाहू) भुजौ (स्थविरौ)

(इमौ) ये दोनों (बाहू) भुजायें (स्थविरौ) पुष्ट, (वृषाणौ) वीर्ययुक्त, (चित्रा) अद्भुत (वृषभौ) श्रेष्ठ और (पारयिष्णू) पार लगाने वाले होवें। (तौ) उन दोनों को (योगे) अवसर (आगते) आने पर (प्रथमः) मुखिया तू (योक्षे) काम में लाता है, (याभ्याम्) जिन दोनों से (असुराणाम्) असुरों [प्राण लेने वाले शत्रुओं] का (यत्) जो (स्वः) सुख है, [वह] (जितम्) जीता जाता है ॥ १ ॥

भावार्थ—मनुष्यों को सेनापति ऐसा बनाना चाहिये, जो विद्यावान्, धनी, महाप्रतापी, शरीर से पुष्ट, शत्रुओं का दमन करने वाला और प्रजापालक हो ॥ १ ॥

यह मन्त्र कुछ भेद से सामवेद में है—उ० ६ । ३ । ७ ॥

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः ।२

आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः। चर्षणीनाम् ॥ सम्-क्रन्दनः । अनि-मिषः । एक-वीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥ २ ॥

भाषार्थ—(चर्षणीनाम्) मनुष्यों में (आशुः) फुरतीले, (शिशानः) तीक्ष्ण, (वृषभः न) बैल के समान (भीमः) भयङ्कर, (घनाघनः) अत्यन्त चोट मारने वाले, (क्षोभणः) हलचल मचाने वाले, (सङ्क्रन्दनः) ललकारने

अजिरशिशिरशिथिल० । उ० १ । ५३ । ष्ठा गतिनिवृत्तौ—किरच्, वुगागमः। स्थूलौ । पुष्टौ (वृषाणौ) वीर्ययुक्तौ (चित्रा) चित्रौ । श्लाघनीयौ । अद्भुतौ (इमा) इमौ (वृषभौ) श्रेष्ठौ (पारयिष्णू) पारयितारौ (तौ) भुजौ (योक्षे) युजिर् योगे मध्यमपुरुषस्य लटि छान्दसं रूपम् । त्वं युङ्क्षे । प्रयोगे करोषि (प्रथमः) मुख्यः सन् त्वम् (योगे) अवसरे (आगते) प्राप्ते (याभ्याम्) बाहुभ्याम् (जितम्) जयेन प्राप्तम् (असुराणाम्) असूनां प्राणानां ग्रहीतॄणां शत्रूणाम् (स्वः) सुखम् (यत्) ॥

२—(आशुः) शीघ्रकारी (शिशानः) शो तनूकरणे—कानच् । तीक्ष्णस्वभावः (वृषभः) बलीवर्दः (न) इव (भीमः) भयङ्करः (घनाघनः) हन्तेर्घत्वं च । वा० पा० ६ । १ । १२ । हन हिंसागत्योः—अचि प्रत्यये घत्वमभ्यास-

वाले, (अनिमिषः) पलक न मूंदने वाले, (एकवीरः) एकवीर [अद्वितीय पराक्रमी], (इन्द्रः) इन्द्र [महाप्रतापी सेनापति] ने (शतम्) सौ (सेनाः) सेनाओं को (साकम्) एक साथ (अजयत्) जीता है ॥ २ ॥

भावार्थ—हे मनुष्यो ! यह पहिले से नियम चला आता है कि युद्ध-कुशल, पराक्रमी अनालसी सेनापति शत्रुओं को नाश करता है, वैसाही तुम भी करो ॥ २ ॥

यह मन्त्र ऋग्वेद में है—१० । १०३ । १, यजुर्वेद १७ । ३३ और सामवेद उ० ९ । ३ । १ ॥

सं॒क्रन्द॑नेनानिमि॒षेण॑ जि॒ष्णुना॑योध्ये॒न॑ दुश्च्यव॒नेन॑ धृ॒ष्णुना॑ ।
तदिन्द्रे॑ण जयत॒ तत्स॑हध्वं॒ युधो॑ नर॒ इषु॑हस्तेन॒ वृष्णा॑ ॥३॥

स॒म्-क्रन्द॑नेन । अ॒नि॒-मि॒षेण॑ । जि॒ष्णुना॑ । अ॒योध्येन॑ । दुः-च्य॒व॒नेन॑ । धृ॒ष्णुना॑ ॥ तत् । इन्द्रे॑ण । ज॒य॒त॒ । तत् । स॒ह॒-ध्व॒म् । यु॒धः॒ । न॒रः॒ । इषु॑-हस्तेन । वृष्णा॑ ॥ ३ ॥

भाषार्थ—(नरः) हे नरो ! [नेता लोगो] (सङ्क्रन्दनेन) ललकारने वाले, (अनिमिषेण) पलक न मूंदने वाले, (जिष्णुना) विजयी, (अयोध्येन) अजेय, (दुश्च्यवनेन) न हटने वाले, (धृष्णुना) निडर [बड़े उत्साही], (इषुहस्तेन) तीर [अस्त्र शस्त्र] हाथ में रखने वाले, (वृष्णा) वीर्यवान्, (इन्द्रेण) इन्द्र [महाप्रतापी सेनापति] के साथ (युधः) लड़ाकाओं को (तत्) इस

स्यागमश्च । अतिशयेन प्रहर्ता (क्षोभणः) संचालयिता (चर्षणीनाम्) मनुष्याणाम् (संक्रन्दनः) शत्रूणामाह्वाता (अनिमिषः) अनिमेषचक्षुः । सदा-सावदानः (एकवीरः) अद्वितीयशूरः (शतम्) असंख्याः (सेनाः) (अजयत्) जितवान् (साकम्) सार्धम् (इन्द्रः) महाप्रतापी सेनापतिः ॥

३—(सङ्क्रन्दनेन) आह्वानशीलेन (अनिमिषेण) अनिमिषचक्षुषा । सदा-सावदानेन (जिष्णुना) विजयिना (अयोध्येन) केनापि योद्धुमशक्येन । अजेयेन (दुश्च्यवनेन) दुर्विचाल्येन । दुर्निवार्येण (धृष्णुना) प्रगल्भेन (तत्) अनेन प्रकारेण (इन्द्रेण) महाप्रतापिना सेनापतिना (जयत) (तत्) एवम् (सह-ध्वम्) अभिभवत (युधः) योद्धॄन् । शत्रून् (नरः) हे नेतारः (इषुहस्तेन)

प्रकार (जयत) तुम जीतो और (तत्) इस प्रकार (सहध्वम्) हराओ ॥ ३॥

भावार्थ—मन्त्र २ में जो सेनापति के लक्षण कहे हैं, वैसे युद्धकुशल, सदासावधान महाप्रतापी पुरुष को सेनानी बनाकर वीर पुरुष शत्रुओं को मारें ॥ ३ ॥

मन्त्र ३, ४ कुछ भेद से ऋग्वेद में हैं—१० । १०३ । २, ३ तथा यजुर्वेद १७ । ३४, ३५ और सामवेद उ० ६ । ३ । १ ॥

स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित् सोमपा बाहुशर्ध्यु१ग्रधन्वा प्रतिहिताभिरस्ता ॥४॥

सः । इषु-हस्तैः । सः । निषङ्गि-भिः । वशी । सम्-स्रष्टा । सः । युधः । इन्द्रः । गणेन ॥ संसृष्ट-जित् । सोम-पाः । बाहु-शर्धी । उग्र-धन्वा । प्रति-हिताभिः । अस्ता ॥ ४ ॥

भाषार्थ—(सः सः) वही (इन्द्रः) इन्द्र [महाप्रतापी सेनापति] (इषुहस्तैः) तीर [अस्त्र शस्त्र] हाथों में रखने वालों, और (निषङ्गिभिः) खड्ग वालों के साथ (वशी) वश में करने वाला, (सः) वही (गणेन) अपने गण [अधिकारी लोगों] सहित (युधः) [अपने] योद्धाओं को (संस्रष्टा) एकत्र करने वाला, (संसृष्टजित्) एकत्र हुये [शत्रुओं] को जीतने वाला, (सोमपाः) ऐश्वर्य की रक्षा करने वाला, (बाहुशर्धी) भुजाओं में बल रखने वाला, (उग्रधन्वा) प्रचंड धनुष वाला, (प्रतिहिताभिः) सन्मुख ठहरायी हुयी [सेनाओं] से (अस्ता) [बैरियों का] गिराने वाला है ॥ ४ ॥

भावार्थ—जो युद्धकुशल मनुष्य अपनी वीर सेनाओं की व्यूह रचना से खड़ा करके शत्रुओं को मारने में समर्थ हो, वही सेनाध्यक्ष बनाया जावे ॥ ४ ॥

इषवो वाणा शस्त्राणि हस्तयोर्यस्य तेन (वृष्णा) वीर्यवता ॥

४—(सः) (इषुहस्तैः) शस्त्रपाणिभिः (सः) (निषङ्गिभिः) खड्गधारिभिः (वशी) वशयिता (संस्रष्टा) संयोजकः (सः) (युधः) स्वयोद्धॄन् (इन्द्रः) महाप्रतापी सेनापतिः (गणेन) अधिकारिसमूहेन (संसृष्टजित्) संयुक्तानां शत्रूणां जेता (सोमपाः) ऐश्वर्यस्य पाता रक्षकः (बाहुशर्धी) बाह्वोः शर्धो बलं यस्य सः (उग्रधन्वा) प्रचण्डधनुर्धरः (प्रतिहिताभिः) प्रत्यक्षेण व्यूहेन स्थिताभिः सेनाभिः (अस्ता) शत्रूणां क्षेप्ता मारयिता ॥

बलविज्ञायः स्थविरः प्रवीरःसहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिषत्वा सहोजिज्जैत्रमिन्द्र रथमा तिष्ठ गोविदन् ५

बल-विज्ञायः । स्थविरः । प्र-वीरः । सहस्वान् । वाजी ।
सहमानः । उग्रः ॥ अभि-वीरः । अभि-सत्वा । सहः-जित् ।
जैत्रम् । इन्द्र । रथम् । आ । तिष्ठ । गो-विदन् ॥ ५ ॥

भाषार्थ—(बलविज्ञायः) बल का जानने हारा, (स्थविरः) पुष्टाङ्ग [वा वृद्ध अर्थात् अनुभवी],(प्रवीरः) बड़ा वीर, (सहस्वान्) बड़ा बली, (वाजी) बड़ा ज्ञानी [वा अन्न वाला], (सहमानः) हराने वाला, (उग्रः) प्रचण्ड, (अभिवीरः) सब ओर वीरों को रखने वाला, (अभिसत्वा) सब ओर युद्धकुशल विद्वानों के रखने वाला, (सहोजित्) बल से जीतने वाला, (गोविदन्) पृथिवी के देशों [वा वाणियों] को जानने वाला होकर, (इन्द्र) हे इन्द्र ! [महाप्रतापी सेनापति] (जैत्रम्) विजयी (रथम्)रथ पर (आ तिष्ठ) बैठ ५

भावार्थ—अपने और शत्रु के बल को जानने वाला सेनाध्यक्ष अपने युद्धकुशल वीरों और युद्ध सामग्री के साथ चढ़ाई करे ॥ ५ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ५, यजुर्वेद १७ । ३५ और सामवेद—उ० ६ । ३ । २ ॥

इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सखायो अनु सं रभध्वम् ।

५—(बलविज्ञायः) कर्मण्यण् । पा० ३ । २ । १ । इत्यण् । आतो युक् चिण्कृतोः । पा० ७ । ३ । ३३ । इति युगागमः । बलस्य ज्ञाता (स्थविरः) म० १ । पुष्टाङ्गः । बलविद्यावृद्धः (प्रवीरः) प्रकृष्टो वीरः शूरः (सहस्वान्) महाबली (वाजी) ज्ञानवान् । अन्नवान् (सहमानः) अभिभवनशीलः (उग्रः) तीव्रतेजाः (अविवीरः) अभितो वीरा यस्य सः (अभिसत्वा) अ० ५ । २० । ८ । अन्येभ्योऽपि दृश्यन्ते । पा० ३ । २ ।७५। षद्लृ विशरणगत्यवसादनेषु—क्वनिप्, दस्य तः । अभितः सत्वानो युद्धविद्वांसो यस्य सः (सहोजित्) बलेन जेता (जैत्रम्) जेतृ-अण् प्रज्ञादिः । जेतारम् । विजयिनम् (इन्द्र) हे महाप्रतापिन् सेनापते (रथम्) युद्धयानम् (आ तिष्ठ) आरोह (गोविदन्) गाः पृथिवीदेशान् वाचो वा जानन् सन् ॥

ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा॥६॥

इमम् । वीरम् । अनु । हर्षध्वम् । उग्रम् । इन्द्रम् । सखायः। अनु । सम् । रभध्वम् ॥ ग्राम-जितम् । गो-जितम् । वज्र-बाहुम् । जयन्तम् । अज्म । प्र-मृणन्तम् । ओजसा ॥ ६ ॥

भाषार्थ—(सखायः) हे मित्रो ! (इमम्) इस (वीरम् अनु) वीर [सेनापति] के साथ (हर्षध्वम्) हर्ष करो, (ग्रामजितम्) शत्रुओं के समूह को जीतने वाले, (गोजितम्) उन की भूमि को जीतने वाले, (वज्रबाहुम्) भुजाओं में शस्त्र रखने वाले, (जयन्तम्) विजयी, (ओजसा) [अपने शरीर, बुद्धि और सेना के] बल से (अज्म) संग्राम को (प्रमृणन्तम्) मिटाने वाले, (उग्रम्) तेजस्वी (इन्द्रम् अनु) इन्द्र [महाप्रतापी सेनाध्यक्ष] के साथ (सम्) अच्छे प्रकार (रभध्वम्) उद्योग करो ॥ ६ ॥

भावार्थ—युद्धकुशल सैनिक लोग चतुर सेनापति के अनुगामी होकर शत्रुओं का राज्य आदि लेकर प्रजापालन करें ॥ ६ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ६, यजुर्वेद १७ । ३८ और सामवेद, उ० ६ । ३ । २ । और ऊपर आचुका है-अथ० ६ । ६७ । ३ ॥

अभि गोत्राणि सहसा गाहमानोऽदाय उग्रः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयोध्यो३ऽस्माकं सेना अवतु प्र युत्सु॥७॥

अभि । गोत्राणि । सहसा । गाहमानः । अदायः । उग्रः ।

६—अयं मन्त्रो व्याख्यातः—अ० ६ । ६७ । ३ (इमम्) प्रसिद्धम् (वीरम्) सेनाध्यक्षम् (अनु) अनुसृत्य (हर्षध्वम्) हर्षं प्राप्नुत (उग्रम्) प्रचण्डम् (इन्द्रम्) परमैश्वर्यवन्तं सेनाध्यक्षम् (सखायः) हे सुहृद्गणाः (अनु) अनुगत्य (सम्) सम्यक् (रभध्वम्) रभ राभस्ये । उद्योगं कुरुत (ग्रामजितम्) शत्रुसमूहजेतारम् (गोजितम्) शत्रुभूमिविजयिनम् (वज्र—बाहुम्) वज्राः शस्त्राणि बाह्वोर्यस्य तम् (जयन्तम्) जि जये—झच् । विजयिनम् (अज्म) संग्रामम् (प्रमृणन्तम्) विनाशयन्तम् (ओजसा) स्वस्य शरीरबुद्धिसेनाबलेन ॥

शत-मन्युः । इन्द्रः ॥ दुः-च्यवनः । पृतनाषाट् । अयोध्यः । अस्माकम् । सेनाः । अवतु । प्र । युत्-सु ॥ ७ ॥

भाषार्थ—(गोत्राणि) शत्रुकुलों को (सहसा) बल से (अभि) सब ओर से (गाहमानः) गाहता हुआ [मथता हुआ] (अदायः) अखण्ड, (उग्रः) प्रचण्ड, (शतमन्युः) सैकड़ों प्रकार क्रोध वाला, (दुश्च्यवनः) न हटने वाला, (पृतनाषाट्) सेनाओं का हराने वाला, (अयोध्यः) अजेय (इन्द्रः) इन्द्र [महाप्रतापी सेनापति] (अस्माकम्) हमारी (सेनाः) सेनाओं को (युत्सु) युद्धों में (प्र) प्रयत्न से (अवतु) बचावे ॥ ७ ॥

भावार्थ—जो मनुष्य अपनी अचूक बुद्धि और श्रेष्ठ गुणों से शत्रुओं को हराकर प्रजा की रक्षा कर सके, लोग उसी को सेनापति बनावें ॥ ७ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ७, यजु० १७ । ३९ । और साम०, उ० ६ । ३ । ३ ॥

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जञ्छत्रून् प्रमृणन्नमित्रानस्माकमेध्यविता तनूनाम् ॥ ८ ॥

बृहस्पते । परि । दीय । रथेन । रक्षः-हा । अमित्रान् । अप-बाधमानः ॥ प्र-भञ्जन् । शत्रून् । प्र-मृणन् । अमित्रान् । अस्माकम् । एधि । अविता । तनूनाम् ॥ ८ ॥

७—(अभि) सर्वतः (गोत्राणि) गुधृवीपचि० । उ० ४ । १६७ । गुङ् शब्दे—त्रप्रत्ययः । शत्रुकुलानि (सहसा) बलेन (गाहमानः) विलोडयन् (अदायः) दाप् लवने, दो अवखण्डने वा—घञ् युगागमः । अखण्डः (उग्रः) प्रचण्डः (शतमन्युः) शतधाकोपयुक्तः (इन्द्रः) परमैश्वर्यवान् सेनेशः (दुश्च्यवनः) छन्दसि गत्यर्थेभ्यः । पा० ३ । ३ । १२९ । दुर्+च्युङ् गतौ—युच् । दुर्निवार्यः (पृतनाषाट्) छन्दसि सहः । पा० ३ । २ । ६३ । पृतना+षह अभिभवे— ण्वि । सहेः साडः सः । पा० ८ । ३ । ५६ । इति मूर्धन्यादेशः । सेनानामभिभविता (अयोध्यः) योद्धुमशक्यः । अजेयः । अबाध्यः (अस्माकम्) (सेनाः) (अवतु) रक्षतु (प्र) प्रयत्नेन (युत्सु) युद्धेषु ॥

भाषार्थ—(बृहस्पते) हे बृहस्पति ! [बड़े बड़े पुरुषों के रक्षक] (रक्षोहा) राक्षसों [दुष्टों] का मारने वाला, (अमित्रान्) अमित्रों [बैरियों] को (अपबाधमानः) हटा देने वाला होकर (रथेन) रथ समूह से (परि) सब ओर से (दीय) नाश कर। (शत्रून्) शत्रुओं को (प्रभञ्जन्) कुचलता हुआ और (अमित्रान्) अमित्रों को (प्रमृणन्) मार डालता हुआ तू (अस्माकम्) हमारे (तनूनाम्) शरीरों का (अविता) रक्षक (एधि) हो ॥ ८ ॥

भावार्थ—अनुभवी योद्धाओं को उत्साह देने, बैरियों को मारने, और प्रजा के बचाने में योग्य पुरुष ही सेनापति होवे ॥ ८ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ४ । यजु० १७ । ३६ और साम०—उ० ९ । ३ । २ ॥

इन्द्र॑ एषां नेता बृह॒स्पति॒र्दक्षि॑णा य॒ज्ञः पु॒र ए॑तु॒ सोम॑: । दे॒व॒से॒नाना॑मभिभ॒ञ्जती॑नां॒ जय॑न्तीनां म॒रुतो॑ यन्तु॒ मध्ये॑ ॥ ९ ॥

इन्द्र॑: । ए॒षाम् । ने॒ता । बृ॒ह॒स्पति॑: । दक्षि॑णा । य॒ज्ञः । पु॒र: । ए॒तु॒ । सोम॑: ॥ दे॒व॒-से॒नाना॑म् । अ॒भि॒-भ॒ञ्ज॒ती॑नाम् । जय॑न्तीनाम् । म॒रुत॑: । य॒न्तु॒ । मध्ये॑ ॥ ९ ॥

भाषार्थ—(इन्द्रः) इन्द्र [महाप्रतापी मुख्य सेनापति] (एषाम्) इन [वीरों] का (नेता) नेता [होवे], (बृहस्पतिः) बृहस्पति [बड़े अधिकारों

८—(बृहस्पते) हे बृहतां महतां पुरुषाणां रक्षक (परि) सर्वतः (दीय) दीङ् क्षये, छान्दसो दीर्घः । नाशय (रथेन) युद्धरथसमूहेन (रक्षोहा) रक्षसां दुष्टानां हन्ता (अमित्रान्) अमेर्द्विषति चित्। उ० ४ । १७४ । अम पीडने—इत्र, चित् । पीडकान् । शत्रून् (अपबाधमानः) निवारयन् सन् (प्रभञ्जन्) प्रकर्षेण मर्दयन् (शत्रून्) (प्रमृणन्) अतिशयेन मारयन् (अमित्रान्) (अस्माकम्) (एधि) भव (अविता) रक्षकः (तनूनाम्) शरीराणाम् ॥

९—(इन्द्रः) परमैश्वर्ययुक्तो मुख्यसेनापतिः (एषाम्) वीराणाम् (नेता) नायकः (बृहस्पतिः) बृहतामधिकाराणां रक्षकः सेनानायकः (दक्षिणा)

का स्वामी सेना नायक] (दक्षिणा) दाहिनी ओर और (यज्ञः) पूजनीय, (सोमः) सोम [प्रेरक, उत्साहक सेनाधिकारी] (पुरः) आगे (एतु) चले। (मरुतः) मरुद्गण [शूरवीर पुरुष] (अभिभञ्जतीनाम्) कुचल डालती हुयी, (जयन्तीनाम्) विजयिनी (देवसेनानाम्) विजय चाहने वालों की सेनाओं के (मध्ये) बीच में (यन्तु) चलें ॥ ६ ॥

भावार्थ—व्यूह रचना में अपनी अपनी सेना लेकर मुख्य सेनापति की दाहिनी ओर को बृहस्पति नाम सेनाधिकारी हो, सोम नाम सेनाध्यक्ष सब से आगे और अन्य मरुद्गण शूरवीर योद्धा बीच में रहें। इसी प्रकार चक्रव्यूह, पद्मव्यूह आदि अनेक व्यूह रचनाओं से शत्रुओं को जीतें ॥ ६ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ८, यजु० १७ । ४० और साम०, उ० ६ । ३ । ३ ॥

इन्द्र॑स्य॒ वृष्णो॒ वरु॑णस्य॒ राज्ञ॑ आदि॒त्यानां॑ म॒रुतां॒ शर्ध॑ उ॒ग्रम्।
म॒हाम॑नसां भुवनच्य॒वानां॒ घोषो॑ दे॒वानां॒ जय॑तामु॒द॑स्थात् ॥१०

इन्द्र॑स्य । वृष्णः॑ । वरु॑णस्य । राज्ञः॑ । आ॒दि॒त्याना॑म् । म॒रु॒ताम् । शर्धः॑ । उ॒ग्रम् ॥ म॒हा-म॑नसाम् । भु॒व॒न॒-च्य॒वाना॑म् । घोषः॑ । दे॒वाना॑म् । जय॑ताम् । उत् । अ॒स्था॒त् ॥ १० ॥

भाषार्थ—(वृष्णः) वीर्यवान् (इन्द्रस्य) इन्द्र [महाप्रतापी मुख्य सेनापति] का, (वरुणस्य) वरुण [श्रेष्ठ गुणी मन्त्री]

दक्षिण—आच् । दक्षिणहस्तदिशायाम् (यज्ञः) पूजनीयः (पुरः) अग्रे (एतु) गच्छतु (सोमः) प्रेरकः सेनाध्यक्षः (देवसेनानाम्) विजिगीषूणां सेनानाम् (अभिभञ्जतीनाम्) सर्वतो मर्दयन्तीनाम् (जयन्तीनाम्) तॄभूवहिवसि० । उ० ३ । १२८ । जि जये—झच्, ङीप् गौरादित्वात् । विजयिनीनाम् (मरुतः) अ० १ । २० । १ । मृग्रोरुति । उ० १ । ६४ । मृङ् प्राणत्यागे—उति । मारयन्ति शत्रून् ये । शूरपुरुषाः (यन्तु) गच्छन्तु (मध्ये) ॥

१०—(इन्द्रस्य) परमैश्वर्यवतः सेनापतेः (वृष्णः) वीर्यवतः (वरुणस्य) श्रेष्ठस्य मन्त्रिणः (राज्ञः) शासकस्य (आदित्यानाम्) अखण्डव्रतानाम् (मरुताम्)

(राज्ञः) राजा [शासक] का, (आदित्यानाम्) अखण्डव्रती (मरुताम्) मरुद्गणों [शत्रुनाशक वीरों] का (शर्धः) बल (उग्रम्) उग्र [प्रचण्ड] होवे। (महामनसाम्) बड़े मन वाले, (भुवनच्यवानाम्) संसार को हिला देने वाले, (जयताम्) जीतते हुये (देवानाम्) विजय चाहने वाले वीरों का (घोषः) जय जयकार (उत् अस्थात्) ऊंचा उठा है ॥ १० ॥

भावार्थ—सेनापति, सेनाध्यक्ष और सब शूर वीर सेनादल, अस्त्र शस्त्र मारू बाजे आदि के साथ जय जय ध्वनि करते हुये शत्रुओं को जीतें ॥ १० ॥

यह मन्त्र ऋग्वेद में है—१० । १०३ । ९, यजु० १७ । ४१ और साम०, उ० ९ । ३ । ३ ॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्मान् देवासोऽवता हवेषु ॥ ११ ॥

अस्माकम् । इन्द्रः । सम्-ऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु ॥ अस्माकम् । वीराः । उत्-तरे । भवन्तु । अस्मान् । देवासः । अवत । हवेषु ॥ ११ ॥

भाषार्थ—(ध्वजेषु) ध्वजाओं के (समृतेषु) मिल जाने पर (इन्द्रः) इन्द्र [महाप्रतापी सेनापति] (अस्माकम्) हमारा है, (अस्माकम्) हमारे (याः) जो (इषवः) बाण हैं, (ताः) वे (जयन्तु) जीतें। (अस्माकम्) हमारे (वीराः) वीर (उत्तरे) अधिक ऊंचे (भवन्तु) होवें, (देवासः) हे देवो! [विजय चाहने वाले शूरो] (हवेषु) ललकार के स्थानों [सङ्ग्रामों] में

म० ९ । शत्रुमारकाणां वीराणाम् (शर्धः) बलम् (उग्रम्) प्रचण्डम् (महामनसाम्) उदारचित्तानाम् । परमोत्साहिनाम् (भुवनच्यवानाम्) संसार-चालकानाम् (घोषः) जयध्वनिः (देवानाम्) विजिगीषूणाम् (जयताम्) विजयं-कुर्वताम् (उत्) ऊर्ध्वम् (अस्थात्) स्थितवान् ॥

११—(अस्माकम्) (इन्द्रः) मुख्यसेनाध्यक्षः-अस्तीति शेषः (समृतेषु) शत्रुभिः संगतेषु (ध्वजेषु) पताकासु (अस्माकम्) (याः) (इषवः) बाणाः (जयन्तु) उत्कर्षं प्राप्नुवन्तु (अस्माकम्) (वीराः) (उत्तरे) उच्चतराः (भवन्तु) (अस्मान्) (देवासः) हे विजिगीषवः शूराः (अवत) रक्षत (हवेषु)

(अस्मान्) हमें (अवत) बचाओ ॥ ११ ॥

भावार्थ—जब युद्ध होने लगे और दोनों ओर की ध्वजायें परस्पर मिल जावें, सब वीर पुरुष मुख्य सेनापति की जय मनाते हुये, अस्त्र शस्त्र चलाते हुये आगे बढ़ें और शत्रुओं को मारकर प्रजा की रक्षा करें ॥ ११ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—१० । १०३ । ११, यजु० १७ । ४३ और साम० , उ० ६ । ३ । ४ ॥

सूक्तम् १४ ॥

मन्त्रः १ ॥ इन्द्रो देवता ॥ निचृत् त्रिष्टुप् छन्दः ॥
विजयप्राप्त्युपदेशः—विजय प्राप्ति का उपदेश ॥

इदमुच्छ्रेयोऽवसानमागां शिवे मे द्यावापृथिवी अभूताम् । असपत्नाः प्रदिशो मे भवन्तु न वै त्वा द्विष्मो अभयं नो अस्तु ॥ १ ॥

इदम् । उत्-श्रेयः । अव-सानम् । आ । अगाम् । शिवे इति । मे । द्यावापृथिवी इति । अभूताम् ॥ असपत्नाः । प्र-दिशः । मे । भवन्तु । न । वै । त्वा । द्विष्मः । अभयम् । नः । अस्तु ॥ १

भावार्थ—[हे इन्द्र ! महाप्रतापी राजन्] (इदम्) यह (उच्छ्रेयः) अत्युत्तम (अवसानम्) विश्राम (आ अगाम्) मैं ने पाया है, (द्यावापृथिवी) सूर्य और पृथिवी (मे) मेरे लिये (शिवे) मङ्गलकारी (अभूताम्) हुई हैं। (मे) मेरी (प्रदिशः) दिशायें (असपत्नाः) बिना शत्रु (भवन्तु) होवें, (त्वा) तुझ से (वै) निश्चय करके (न द्विष्मः) हम विरोध नहीं करते, (नः) हमारे

स्पर्धास्थानेषु । संग्रामेषु ॥

१—(इदम्) (उच्छ्रेयः) प्रशस्यतरम् (अवसानम्) विरामम् । विश्रामम् (आ अगाम्) प्राप्तवानस्मि (शिवे) मङ्गलप्रदे (मे) मह्यम् (द्यावापृथिवी) सूर्यभूमी (अभूताम्) (असपत्नाः) शत्रुरहिताः (प्रदिशः) सर्वा दिशाः (मे) मम (भवन्तु) (न) निषेधे (वै) निश्चयेन (त्वा) त्वाम् (द्विष्मः)

लिये (अभयम्) अभय (अस्तु) होवे ॥ १ ॥

भावार्थ—जिस राज्य में प्रजा को सुख मिले, सूर्य और पृथिवी मङ्गलकारी हों अर्थात् जहां वृष्टि और अन्न आदि की उपज ठीक होती हो, वहां प्रजागण चोर उचक्के आदि दुष्टों से रक्षित रहकर राजभक्ति करते रहें ॥१ ॥

सूक्तम् १५ ॥

१-६ ॥ इन्द्रो देवता ॥ १ पथ्या बृहती; २,५ विराडार्षी जगती; ३ विराडार्षी पङ्क्तिः; ४ विराट् त्रिष्टुप्; ६ त्रिष्टुप् ॥

राजकर्त्तव्योपदेशः—राजा के कर्त्तव्य का उपदेश ॥

यत॑ इन्द्र भयामहे ततो॑ नो॒ अभ॑यं कृधि ।

मघ॑वञ्छ॒ग्धि तव॒ त्वं न॑ ऊ॒तिभि॒र्वि द्वि॒षो॒ वि मृधो॑ जहि ॥१॥

यत॑ः । इ॒न्द्र॒ । भया॑महे । तत॑ः । नः॒ । अभ॑यम् । कृ॒धि॒ ॥ मघ॑-वन् । श॒ग्धि । तव॑ । त्वम् । नः॒ । ऊ॒ति-भि॑ः । वि । द्वि॒ष॑ः । वि । मृध॑ः । ज॒हि॒ ॥ १ ॥

भाषार्थ—(इन्द्र) हे इन्द्र ! [बड़े ऐश्वर्य वाले राजन्] (यतः) जिस से (भयामहे) हम डरते हैं, (ततः) उस से (नः) हमें (अभयम्) अभय (कृधि) कर दे । (मघवन्) हे महाधनी ! (त्वम्) तू (तव) अपनी (ऊतिभिः) रक्षाओं से (नः) हमें (शग्धि) शक्ति दे, (द्विषः) द्वेषियों को और (मृधः) सङ्ग्रामों को (वि) विशेष करके (विजहि) विनाश कर दे ॥ १ ॥

भावार्थ—राजा को चाहिये कि प्रजा को जिन शत्रुओं से भय हो,

विरोधयामः (अभयम्) भयराहित्यम् (नः) अस्मभ्यम् (अस्तु) ॥

१—(यतः) यस्मात् कारणात् (इन्द्र) हे परमैश्वर्यवन् राजन् (भयामहे) बिभीमः (ततः) तस्मात् कारणात् (नः) अस्मभ्यम् (अभयम्) भयराहित्यम् (कृधि) कुरु (मघवन्) हे बहुधनवन् (शग्धि) शकेर्लोट् । शक्तिं देहि (तव) स्वकीयाभिः (त्वम्) (नः) अस्मभ्यम् (ऊतिभिः) रक्षाभिः (वि) विशेषेण (द्विषः) द्वेष्टॄन् । द्रोहिणः (मृधः) संग्रामान्—निघ० २ । १७ । (वि जहि) विनाशय ॥

उन को नाश करके प्रजा में शान्ति स्थापित करे ॥ १ ॥

यह मन्त्र ऋग्वेद में है—८ । ६१ [वा सायण भाष्य ५०] । १३, साम० पू० ३ । ६ । २ तथा उ० ५ । २ । १५ ॥

इन्द्रं वयमनूराधं हवामहेऽनु राध्यास्म द्विपदा चतुष्पदा ।
मा नः सेना अररुषीरुप गुर्विषूचीरिन्द्र द्रुहो वि नाशय ॥ २ ॥

इन्द्रम् । वयम् । अनु-राधम् । हवामहे । अनु । राध्यास्म । द्वि-पदा । चतुः-पदा ॥ मा । नः । सेनाः । अररुषीः । उप । गुः । विषूचीः । इन्द्र । द्रुहः । वि । नाशय ॥ २ ॥

भाषार्थ—(अनुराधम्) अनुकूल सिद्धि करने वाले (इन्द्रम्) इन्द्र [महा प्रतापी राजा] को (वयम्) हम (हवामहे) बुलाते हैं, (द्विपदा) दो पाये के साथ और (चतुष्पदा) चौपाये के साथ (अनु) निरन्तर (राध्यास्म) हम सिद्धि पावें । (अररुषीः) लालची (सेनाः) सेनायें [चोर आदि] (नः) हम को (मा उप गुः) न पहुंचें (इन्द्र) हे इन्द्र ! [महाप्रतापी राजन्] (विषूचीः) फैली हुयी (द्रुहः) द्रोह रीतों को (विनाशय) मिटा दे ॥ २ ॥

भावार्थ—प्रजागण महाप्रतापी विद्वान् पुरुष को राजा बना कर अपने मनुष्यों, पशुओं और सम्पत्ति की रक्षा करें ॥ २ ॥

इन्द्रस्त्रातोत वृत्रहा परस्फानो वरेण्यः । स रक्षिता चरमतः स मध्यतः स पश्चात् स पुरस्तान्नो अस्तु ॥ ३ ॥

इन्द्रः । त्राता । उत । वृत्र-हा । परस्फानः । वरेण्यः ॥ सः ।

२—(इन्द्रम्) परमैश्वर्यवन्तं राजानम् (वयम्) (अनुराधम्) अनुकूला राधा सिद्धिर्यस्मात्तम् (हवामहे) आह्वयामः (अनु) निरन्तरम् (राध्यास्म) सम्पन्ना भूयास्म (द्विपदा) पादद्वयोपेतेन मनुष्यादिना (चतुष्पदा) पादचतुष्टयोपेतेन गवादिना सह (नः) अस्मान् (सेनाः) शत्रुसेनाः (अररुषीः) नञ् पूर्वाद् रातेः क्वसु, ङीपि सम्प्रसारणं पूर्वसवर्णदीर्घश्च । अदात्र्यः । कृपणाः (मा उप गुः) मोपगच्छन्तु । समीपं मा प्राप्नुवन्तु (विषूचीः) विष्वगञ्चनाः । सर्वतो व्याप्ताः (द्रुहः) द्रुह्यन्ती रीतीः (विनाशय) विजहि ॥

रक्षिता । चरमतः । सः । मध्यतः । सः । पश्चात् । सः । पुरस्तात् । नः । अस्तु ॥ ३ ॥

भाषार्थ—(इन्द्रः) इन्द्र [महाप्रतापी राजा] (त्राता) रक्षक, (उत) और (वृत्रहा) शत्रुनाशक, (परस्फानः) श्रेष्ठों का बढ़ाने वाला और (वरेण्यः) स्वीकार करने योग्य है। (सः) वह (चरमतः) अन्त में, (सः) वह (मध्यतः) मध्य में, (सः) वह (पश्चात्) पीछे से, (सः) वह (पुरस्तात्) आगे से (नः) हमारा (रक्षिता) रक्षक (अस्तु) होवे ॥ ३ ॥

भावार्थ—न्यायशील बलवान् राजा सब प्रकार से सब दिशाओं में प्रजा की रक्षा करे। आध्यात्मिक पक्ष में (इन्द्रः) का अर्थ "परमेश्वर" है ॥ ३॥

उरुं नो लोकमनु नेषि विद्वान्त्स्व१र्यज्ज्योतिरभयं स्वस्ति ।
उग्रा त इन्द्र स्थविरस्य बाहू उप क्षयेम शरणा बृहन्ता ॥४॥

उरुम् । नः । लोकम् । अनु । नेषि । विद्वान् । स्वः । यत् । ज्योतिः। अभयम् । स्वस्ति ॥ उग्रा । ते । इन्द्र । स्थविरस्य । बाहू इति । उप । क्षयेम । शरणा । बृहन्ता ॥ ४ ॥

भाषार्थ—(विद्वान्) जानकार तू (नः) हमें (उरुम्) चौड़े (लोकम) स्थान में (अनुनेषि) निरन्तर ले चलता है, (यत्) जो (स्वः) सुखप्रद, (ज्योतिः) प्रकाशमान, (अभयम्) निर्भय और (स्वस्ति) मङ्गल दाता

३—(इन्द्रः) परमैश्वर्यवान् राजा परमेश्वरो वा (त्राता) रक्षकः (उत) अपि च (वृत्रहा) शत्रुनाशकः (परस्फानः) स्फायी वृद्धौ—ल्युट्, यलोपश्छान्दसः, अन्तर्गतण्यर्थः। पराणां श्रेष्ठानां वर्धकः (वरेण्यः) वरणीयः स्वीकरणीयः (सः) (रक्षिता) पालकः (चरमतः) अन्ते (सः) (मध्यतः) मध्ये (सः) (पश्चात्) पृष्ठदेशे (सः) (पुरस्तात्) अग्रदेशे (नः) अस्मभ्यम् (अस्तु) ॥

४—(उरुम्) विस्तृतम् (नः) अस्मान् (लोकम्) स्थानम् (अनु) (निरन्तरम्) (नेषि) शपो लुक्। नयसि। प्रापयसि (विद्वान्) जानन् (स्वः) सुखप्रदम् (ज्योतिः) प्रकाशमानम् (अभयम्) निर्भयम् (स्वस्ति) मङ्गल-

[अच्छी सत्ता वाला है] । (इन्द्र) हे इन्द्र ! [महाप्रतापी राजन्] (स्थविरस्य ते) तुझ दृढ़ स्वभाव वाले के (उग्रा) प्रचण्ड, (शरणा) शरण देने वाले, (बृहन्ता) विशाल (बाहू) दोनों भुजाओं का (उप) आश्रय लेकर (क्षयेम) हम रहें ॥ ४ ॥

भावार्थ—नीति कुशल राजा प्रजाओं को उन्नत करके बल और पराक्रम से अपनी शरण में रक्खे ॥ ४ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है—६ । ४७ । ८ ॥

अभयं नः करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे ।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु ॥ ५ ॥

अभयम् । नः । करति । अन्तरिक्षम् । अभयम् । द्यावापृथिवी इति । उभे इति । इमे इति ॥ अभयम् । पश्चात् । अभयम् । पुरस्तात् । उत्-तरात् । अधरात् । अभयम् । नः । अस्तु ॥ ५ ॥

भाषार्थ—(नः) हमें (अन्तरिक्षम्) मध्य लोक (अभयम्) अभय (करति) करे, (इमे) यह (उभे) दोनों (द्यावापृथिवी) सूर्य और पृथिवी (अभयम्) अभय [करें] । (पश्चात्) पश्चिम में वा पीछे से (अभयम्) अभय हो, (पुरस्तात्) पूर्व में वा आगे से (अभयम्) अभय हो, (उत्तरात्) उत्तर में वा ऊपर से और (अधरात्) दक्षिण वा नीचे से (अभयम्) अभय

प्रदम् । सुसत्तायुक्तम् (उग्रा) प्रचण्डौ (ते) तव (इन्द्र) हे महाप्रतापिन् राजन् (स्थविरस्य) स्थिरस्वभावस्य (बाहू) भुजौ (उप) उपेत्य । आश्रित्य (क्षयेम) निवसेम (शरणा) शरणौ (बृहन्ता) विशालौ ॥

५—(अभयम्) भयराहित्यम् (नः) अस्मभ्यम् (करति) लेटि अडागमः । कुर्यात् (अन्तरिक्षम्) मध्यलोकः (अभयम्) कुर्यातामिति शेषः (द्यावापृथिवी) सूर्यपृथिव्यौ (उभे) (इमे) (अभयम्) (पश्चात्) पश्चिमस्यां दिशि, पृष्ठदेशे वा (अभयम्) (पुरस्तात्) पूर्वस्यां दिशि, अग्रदेशे वा (अभयम्) (उत्तरात्) उत्तरस्यां दिशि, उपरिदेशे वा (अधरात्) दक्षिणस्यां दिशि, अधो-

(नः) हमारे लिये (अस्तु) हो ॥ ५ ॥

भावार्थ—जो राजा, विमान, अस्त्र शस्त्र द्वारा आकाश से प्रजा की रक्षा करता है और सूर्य द्वारा हुई वृष्टि के प्रवाह का प्रबन्ध करके पृथिवी को उपजाऊ बनाता है, वह प्रजा को सुख पहुंचाकर बली होता है।

आध्यात्मिक पक्ष में यह भावार्थ है कि हम सब पुरुषार्थ करके परमात्मा के अनुग्रह से सब कालों और सब स्थानों में निर्भय रहें ॥ ५ ॥

अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः। अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥ ६ ॥

अभयम्। मित्रात्। अभयम्। अमित्रात्। अभयम्। ज्ञातात्। अभयम्। पुरः। यः॥ अभयम्। नक्तम्। अभयम्। दिवा। नः। सर्वाः। आशाः। मम। मित्रम्। भवन्तु ॥ ६ ॥

भाषार्थ—(मित्रात्) मित्र से (अभयम्) अभय और (अमित्रात्) अमित्र [पीड़ा देने हारे] से (अभयम्) अभय हो, (ज्ञातात्) जानकर से (अभयम्) अभय और (यः) जो (पुरः) सामने है [उससे भी] (अभयम्) अभय हो। (नः) हमारे लिये (नक्तम्) रात्रि में (अभयम्) अभय और (दिवा) दिन में (अभयम्) अभय हो, (मम) मेरी (सर्वाः) सब (आशाः) आशायें (मित्रम्) मित्र (भवन्तु) होवें ॥ ६ ॥

भावार्थ—मनुष्य को चाहिये कि सर्वदा सब प्रकार चौकस रहकर परमात्मा के विश्वास से और राजा के सुप्रबन्ध से अपनी रक्षा करे ॥ ६ ॥

सूक्तम् १६ ॥

१, २ ॥ मन्त्रोक्ता देवताः ॥ १ निचृदनुष्टुप्; २ अतिशक्करी ॥

देशे वा (अभयम्) (नः) अस्मभ्यम् (अस्तु) ॥

६—(अभयम्) भयराहित्यम्) (मित्रात्) सुहृदः सकाशात् (अभयम्) (अमित्रात्) अम पीडने—इत्रप्रत्ययः। पीडकात् (अभयम्) (ज्ञातात्) परिचितात् (अभयम्) (पुरः) पुरस्तात् (यः) (अभयम्) (नक्तम्) रात्रौ (अभयम्) (दिवा) दिने (नः) अस्मभ्यम् (सर्वाः) (आशाः) दीर्घाकाङ्क्षाः (मित्रम्) (भवन्तु) ॥

अभयस्य रक्षणस्य चोपदेशः—अभय और रक्षा का उपदेश ॥

असपत्नं पुरस्तात् पश्चान्नो अभयं कृतम् ।
सविता मा दक्षिणत उत्तरान्मा शचीपतिः ॥ १ ॥

असपत्नम् । पुरस्तात् । पश्चात् । नः । अभयम् । कृतम् ॥
सविता । मा । दक्षिणतः । उत्तरात् । मा । शची-पतिः ॥१॥

भाषार्थ—(नः) हमारे लिये (मा) मुझ को (पुरस्तात्) सामने [वा पूर्व दिशा] से (पश्चात्) पीछे [वा पश्चिम] से, (दक्षिणतः) दाहिनी ओर [वा दक्षिण] से और (मा) मुझको (उत्तरात्) बाईं ओर [वा उत्तर] से (सविता) सर्व प्रेरक राजा और (शचीपतिः) वाणियों वा कर्मों का पालने वाला [मन्त्री], तुम दोनों (असपत्नम्) शत्रुरहित और (अभयम्) निर्भय (कृतम्) करो ॥ १ ॥

भावार्थ—जहां पर राजा और मन्त्री अपनी वाणी और कर्म में पक्के होते हैं, उस राज्य में प्रजागण शत्रुओं से सुरक्षित रहते हैं ॥ १ ॥

दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः ।
इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् ।
तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ॥२

दिवः । मा । आदित्याः । रक्षन्तु । भूम्याः । रक्षन्तु । अग्नयः ॥
इन्द्राग्नी इति । रक्षताम् । मा । पुरस्तात् । अश्विनौ ।

१—(असपत्नम्) शत्रुरहितम् (पुरस्तात्) अग्रे । पूर्वस्यां दिशि (पश्चात्) पश्चाद् भागे पश्चिमस्यां दिशि (नः) अस्मभ्यम्) (अभयम्) (कृतम्) लोटि छान्दसं रूपम् । युवां कुरुतम् (सविता) सर्वप्रेरको राजा (मा) माम् (दक्षिणतः) दक्षिणभागे । दक्षिणस्यां दिशि (उत्तरात्) उपरिभागे । उत्तरस्यां दिशि (मा) माम् (शचीपतिः) शची वाङ्नाम—निघ० १ । ११ कर्मनाम—निघ० २ । १ । वाणीनां कर्मणां वा पालको मन्त्री ॥

अभितः । शर्म । यच्छताम् ॥ तिरश्चीन् । अघ्न्या । रक्षतु । जात-वेदाः । भूत-कृतः । मे । सर्वतः । सन्तु । वर्म ॥ २ ॥

भाषार्थ—(आदित्याः) अखण्डव्रती शूर (मा) मुझे (दिवः) आकाश से (रक्षन्तु)बचावें, (अग्नयः) ज्ञानी पुरुष (भूम्याः) भूमि से (रक्षन्तु) बचावें। (इन्द्राग्नी) बिजुली और अग्नि [के समान तेजस्वी और व्यापक राजा और मन्त्री दोनों] (मा) मुझे (पुरस्तात्) सामने से (रक्षताम्) बचावें, (अश्विनौ) सूर्य और चन्द्रमा [के समान ठीक मार्ग चलने वाले वे दोनों] (अभितः) सब ओर से (शर्म) सुख (यच्छताम्) देवें । (जातवेदाः) बहुत धन वाली (अघ्नया) अटूट [राजनीति] (तिरश्चीन्=तिरश्चिभ्यः) आड़े चलने वाले [वैरियों] से [मुझे] (रक्षतु) बचावे, (भूतकृतः) उचित कर्म करने वाले पुरुष (मे) मेरे लिये (सर्वतः) सब ओर से (वर्म) कवच (सन्तु)होवें॥ २॥

भावार्थ—जो राजा और राजपुरुष आकाश में वायु यान द्वारा चलने वाले वीरों से और पृथिवी पर अश्ववार आदि से अस्त्र शस्त्र द्वारा शत्रुओं का नाश करते हैं, वही प्रजा की रक्षा कर सकते हैं ॥ २॥

सूक्तम् १७ [पर्यायसूक्तम्] ॥

१—१० ॥ मन्त्रोक्ता देवताः ॥ १ स्वराडार्षी त्रिष्टुप्; २, ३, ४, ८ आर्षी जगती; ५, ६ भुरिगार्षी जगती; ७ अतिजगती; ९ स्वराट् शक्करी; १० निचृदतिजगती ॥

२—(दिवः) आकाशात् (मा) माम् (आदित्याः) अखण्डब्रह्मचारिणः शूराः (रक्षन्तु) पान्तु (भूम्याः) (रक्षन्तु) (अग्नयः) ज्ञानिनः पुरुषाः (इन्द्राग्नी) विद्युदग्निवत्तेजस्विव्यापकौ राजमन्त्रिणौ (रक्षताम्) (मा) माम् (पुरस्तात्) पुरोभागे (अश्विनौ) सूर्याचन्द्रमसाविव सन्मार्गगन्तारौ (अभितः) सर्वतः (यच्छताम्) दत्ताम् (तिरश्चीन्) वातेर्डिच्च । उ० ४। १३४। तिरस्+चर गतौ—इण्, डित्। सुपां सुपो भवन्ति। वा० पा० ७। १। ३९। पञ्चम्याः शस्। तिरश्चिभ्यः। तिर्यग्गतिभ्यः शत्रुभ्यः (अघ्न्या) अहन्तव्या राजनीतिः (रक्षतु) (जातवेदाः) गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वञ्च। उ० ४ । २२७। जात+विद्लृ लाभे—असि। वेदो धननाम—निघ० २। १०। जातं प्रसिद्धं वेदो धनं यस्याः सा (भूतकृतः) भूतस्योचितस्य कर्तारः (मे) मम (सर्वतः) (सन्तु) (वर्म) कवचम् । रक्षासाधनम् ॥

रक्षाकरणोपदेशः—रक्षा करने का उपदेश ॥

अग्निर्मा पातु वसुभिः पुरस्तात् तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ १ ॥

अग्निः । मा । पातु । वसु-भिः । पुरस्तात् । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ १ ॥

भाषार्थ—(अग्निः) ज्ञानस्वरूप परमेश्वर (वसुभिः) श्रेष्ठ गुणों के साथ (मा) मुझे (पुरस्तात्) पूर्व वा सामने से (पातु) बचावे, (तस्मिन्) उसमें [उस परमेश्वर के विश्वास में] (क्रमे) मैं पद बढ़ाता हूं, (तस्मिन्) उसमें (श्रये) आश्रय लेता हूं, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति [वा दुर्गरूप परमेश्वर] को (प्र) अच्छे प्रकार (एमि) प्राप्त होता हूं । (सः) वह [ज्ञानस्वरूप परमेश्वर] (मा) मुझे (रक्षतु) बचावे, (सः) वह (मा) मुझे (गोपायतु) पाले, (तस्मै) उस को (आत्मानम्) अपना आत्मा [मन सहित देह और जीव] (स्वाहा) सुन्दर वाणी [दृढ़ प्रतिज्ञा] के साथ (परि

१—(अग्निः) ज्ञानस्वरूपः परमेश्वरः (मा) माम् (पातु) रक्षतु (वसुभिः) श्रेष्ठगुणैः (पुरस्तात्) पूर्वस्यां दिशि, अभिमुखीभूतायां वा (तस्मिन्) ज्ञानस्वरूपे परमेश्वरे (क्रमे) क्रमु पादविक्षेपे । पादं विक्षिपामि (तस्मिन्) (श्रये) श्रिञ् सेवायाम् । आश्रयामि (ताम्) प्रसिद्धाम् (पुरम्) पुर अग्रगमने—क्विप् । अग्रगामिनीं दुर्गरूपां वा शक्तिं परमात्मानम् (प्र) प्रकर्षेण (एमि) गच्छामि । प्राप्नोमि (सः) ज्ञानस्वरूपपरमेश्वरः (मा) (रक्षतु) (सः) (मा) (गोपायतु) पालयतु (तस्मै) परमेश्वराय (आत्मानम्) स्वात्मानम् । मनःसहितं देहं जीवं च (परि ददे) समर्पयामि (स्वाहा) अ० २ । १६ । १ । सु+आङ्+ह्वेञ् आह्वाने—डा, वलोपः । स्वाहा वाङ्नाम—निघ० १ ।

ददे) मैं सौंपता हूं ॥ १ ॥

भावार्थ—जो मनुष्य परमेश्वर की आज्ञा पालने में आत्मसमर्पण करते हैं, वे प्रत्येक स्थान पर उस परमात्मा की छत्र छाया में ऐसे सुरक्षित रहते हैं, जैसे शूरवीर पुरुष दुर्ग में सुरक्षित होते हैं ॥ १ ॥

इस सूक्त का मिलान करो—अ० ३ । २७ । १—६ तथा १२ । ३ । २४ ॥

वायुर्मान्तरिक्षेणैतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ २ ॥

वायुः । मा । अन्तरिक्षेण । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ २ ॥

भाषार्थ—(वायुः) सर्वव्यापक परमेश्वर (अन्तरिक्षेण) मध्यलोक के साथ [पवन, मेघ आदि के साथ] (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में......[म० १] ॥ २ ॥

भावार्थ—मन्त्र १ के समान है ॥ २ ॥

सोमो मा रुद्रैर्दक्षिणाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ ३ ॥

सोमः । मा । रुद्रैः । दक्षिणायाः । दिशः । पातु । तस्मिन् ।

१। सुवारण्या । दृढप्रतिज्ञया ॥

२—(वायुः) सर्वव्यापकः परमेश्वरः (अन्तरिक्षेण) मध्यलोकेन (एतस्याः) मध्यवर्तिन्याः (दिशः) दिशायाः सकाशात् । अन्यत् पूर्ववत्—म० १ ॥

क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । श्रात्मानम् । परि । ददे । स्वाहा ॥ ३ ॥

भाषार्थ—(सोमः) सब का उत्पन्न करने वाला परमेश्वर (रुद्रैः) दुष्ट नाशक गुणों के साथ (मा) मुझे (दक्षिणायाः) दक्षिण वा दाहिनी (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में......[म०१] ॥ ३ ॥

भावार्थ—मन्त्र १ के समान है ॥ ३ ॥

वरुणो मादित्यैरेतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा श्रात्मानं परि ददे स्वाहा ॥ ४ ॥

वरुणः । मा । श्रादित्यैः । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । श्रात्मानम् । परि । ददे । स्वाहा ॥ ४ ॥

भाषार्थ—(वरुणः) सब में उत्तम परमेश्वर (आदित्यैः) प्रकाशमान गुणों के साथ (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में......[म०१] ॥ ४ ॥

भावार्थ—मन्त्र १ समान है ॥ ४ ॥

३—(सोमः) सर्वोत्पादकः परमेश्वरः (रुद्रैः) रुङ् गतौ वधे च-क्विप् तुक् च+रु वधे-डप्रत्ययः । दुष्टनाशकैर्गुणैः (दक्षिणायाः) दक्षिणस्याः । दक्षिणहस्तस्थितायाः । अन्यत् पूर्ववत् ॥

४—(वरुणः) सर्वोत्तमः परमेश्वरः (आदित्यैः) अ० १।६। १ । आङ्+दीपी दीप्तौ—यक्, पृषोदरादिरूपम् । आदीप्यमानैः प्रकाशमानैर्गुणैः । अन्यत् पूर्ववत् ॥

सूर्यो॑ मा द्यावा॑पृथि॒वीभ्यां॑ प्र॒तीच्या॑ दि॒शः पा॑तु॒ तस्मि॑न् क्र॒मे॒ तस्मि॑ञ्छ्र॒ये॒ तां पुरं॒ प्रैमि॑ । स मा॑ रक्षतु॒ स मा॑ गोपायतु॒ तस्मा॑ आ॒त्मानं॒ परि॑ ददे॒ स्वाहा॑ ॥ ५ ॥

सूर्यः॑ । मा॒ । द्यावा॑पृथि॒वीभ्या॑म् । प्र॒तीच्याः॑ । दि॒शः । पा॒तु॒ । तस्मि॑न् । क्र॒मे॒ । तस्मि॑न् । श्र॒ये॒ । ताम् । पुर॑म् । प्र । ए॒मि॒ ॥ सः । मा॒ । र॒क्ष॒तु॒ । सः । मा॒ । गो॒पा॒य॒तु॒ । तस्मै॑ । आ॒त्मान॑म् । परि॑ । द॒दे॒ । स्वाहा॑ ॥ ५ ॥

भाषार्थ—(सूर्यः) सर्वप्रेरक परमात्मा (द्यावापृथिवीभ्याम्) दोनों सूर्य और पृथिवी के साथ (मा) मुझे (प्रतीच्याः) पश्चिम वा पीछे वाली (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उसमें......[म० १] ॥ ५ ॥

भावार्थ—मन्त्र १ के समान है ॥ ५ ॥

आपो॑ मौष॑धीमतीरे॒तस्या॑ दि॒शः पा॑न्तु॒ तासु॑ क्र॒मे॒ तासु॑ श्र॒ये॒ तां पुरं॒ प्रैमि॑ । ता मा॑ रक्षन्तु॒ ता मा॑ गोपपायन्तु॒ ताभ्य॑ आ॒त्मानं॒ परि॑ ददे॒ स्वाहा॑ ॥ ६ ॥

आपः॑ । मा॒ । ओष॑धी-मतीः । ए॒तस्याः॑ । दि॒शः । पा॒न्तु॒ । तासु॑ । क्र॒मे॒ । तासु॑ । श्र॒ये॒ । ताम् । पुर॑म् । प्र । ए॒मि॒ ॥ ताः । मा॒ । र॒क्ष॒न्तु॒ । ताः । मा॒ । गो॒पा॒य॒न्तु॒ । ताभ्यः॑ । आ॒त्मान॑म् । परि॑ । द॒दे॒ । स्वाहा॑ ॥ ६ ॥

भाषार्थ—(ओषधीमतीः) ओषधियों [अन्न सोम रस आदि] वाली (आपः) श्रेष्ठ गुणों में व्याप्त प्रजायें [उत्पन्न जीव] (मा) मुझे (एतस्याः)

५—(सूर्यः) सुवतेः क्यप् । सर्वप्रेरकः परमेश्वरः (द्यावापृथिवीभ्याम्) सूर्यभूमिभ्याम् (प्रतीच्याः) पश्चिमायाः । पृश्चाद् भवायाः । अन्यत् पूर्ववत् ॥

६—(आपः) आप्लृ व्याप्तौ—क्विप् , आप्ताः प्रजाः–दयानन्दभाष्ये–यजु० ६ । २७ (मा) माम् (ओषधीमतीः) ओषधीमत्यः । अन्नसोमरसादियुक्ताः

इस [बीच वाली] (दिशः) दिशा से (पान्तु) बचावें, (तासु) उनमें [प्रजाओं के विश्वास में] (क्रमे) मैं पद बढ़ाता हूं, (तासु) उन में (श्रये) आश्रय लेताहूं, (ताम्) उस (पुरम्) अग्रगमिनी शक्ति [वा दुर्गरूप परमेश्वर] को (प्र) अच्छे प्रकार (एमि) मैं प्राप्तहोता हूं। (ताः) वे [प्रजायें](मा) मुझे (रक्षन्तु) बचावें, (ताः) वे (मा) मुझे (गोपायन्तु) पालें, (ताभ्यः) उन को (आत्मानम्) अपना आत्मा [मन सहित देह और जीव] (स्वाहा) सुन्दर वाणी [दृढ़ प्रतिज्ञा] के साथ (परि ददे) मैं सौंपता हूं ॥ ६ ॥

भावार्थ—मन्त्र १ के समान है ॥ ६ ॥

विश्वकर्मा मा सप्तऋषिभिरुदीच्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ ७ ॥

विश्व-कर्मा । मा । सप्तऋषि-भिः । उदीच्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु ॥ तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ७ ॥

भाषार्थ—(विश्वकर्मा) विश्वकर्मा [सब कर्म करने वाला परमेश्वर (सप्तऋषिभिः) सात ऋषियों सहित [कान, आंख, नाक, जिह्वा, त्वचा, पांच ज्ञानेन्द्रिय, मन और बुद्धि सहित] (मा) मुझे (उदीच्याः) उत्तर वा बायीं (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में...... [म० १] ॥ ७ ॥

(पान्तु) रक्षन्तु (तासु) अप्सु । प्रजासु (ताः) आपः । प्रजाः (रक्षतु) (गोपायन्तु) पालयन्तु (ताभ्यः) प्रजाभ्यः । अन्यत् पूर्ववत् ॥

७—(विश्वकर्मा) सर्वकर्मकर्ता परमेश्वरः (सप्तऋषिभिः) ऋत्यकः । पा० ६।१।१२८। इति प्रकृतिभावः । मनोबुद्धिसहितैः श्रोत्रनेत्र-

भावार्थ—मन्त्र १ के समान है ॥ ७ ॥

इन्द्रो मा मुरुत्वानेतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ ८ ॥

इन्द्रः । मा । मुरुत्-वान् । एतस्याः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ८ ॥

भाषार्थ—(मरुत्वान्) शूरोंका अधिष्ठाता (इन्द्रः) इन्द्र [परम-ऐश्वर्यवान् परमात्मा] (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में .....[म०१] ॥ ८ ॥

भावार्थ—मन्त्र १ के समान है ॥ ८ ॥

प्रजापतिर्मा प्रजननवान्त्सह प्रतिष्ठाया ध्रुवाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ ९ ॥

प्रजा-पतिः । मा । प्रजनन-वान् । सह । प्रति-स्थायाः । ध्रुवायाः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ ९ ॥

भाषार्थ—(प्रजननवान्) सृजन सामर्थ्य वाला (प्रजापतिः) प्रजापति

नासिकाजिह्वात्वग्रूपैःपञ्चज्ञानेन्द्रियैः (उदीच्याः) उत्तरस्याः । वामभाग-स्थायाः । अन्यत् पूर्ववत्—म०२ ॥

८—(इन्द्रः) परमैश्वर्यवान् परमात्मा (मा) (मरुत्वान्) अ० १ । २० । १ । मरुतः शत्रुमारकाः शूराः, तैस्तद्वान् । अन्यत् पूर्ववत् ॥

९—(प्रजापतिः) प्रजापालकः परमात्मा (प्रजननवान्) उत्पादन-

[प्रजाओंका पालक परमेश्वर] (मा) मुझे (प्रतिष्ठायाः=प्रतिष्ठया) प्रतिष्ठा [गौरव] के (सह) साथ (ध्रुवायाः) स्थिर वा नीचे वाली (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में... ..[म० १] ॥ ९ ॥

भावार्थ—मन्त्र १ के समान है ॥ ९ ॥

बृहस्पतिर्मा विश्वैर्देवैरूर्ध्वाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि । स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परि ददे स्वाहा ॥ १० ॥

बृहस्पतिः । मा । विश्वैः । देवैः । ऊर्ध्वायाः । दिशः । पातु । तस्मिन् । क्रमे । तस्मिन् । श्रये । ताम् । पुरम् । प्र । एमि ॥ सः । मा । रक्षतु । सः । मा । गोपायतु । तस्मै । आत्मानम् । परि । ददे । स्वाहा ॥ १० ॥

भाषार्थ—(बृहस्पतिः) बृहस्पति [बड़ी वेदवाणी का रक्षक परमात्मा] (विश्वैः) सब (देवैः) उत्तम गुणों के साथ (मा) मुझे (ऊर्ध्वायाः) ऊपर वाली (दिशः) दिशा से (पातु) बचावे, (तस्मिन्) उस में [उस परमेश्वर के विश्वास में] (क्रमे) मैं पद बढ़ाता हूं, (तस्मिन्) उस में (श्रये) आश्रय लेता हूं, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति [वा दुर्गरूप परमेश्वर] को (प्र) अच्छे प्रकार (एमि) प्राप्त होता हूं। (सः) वह [ज्ञानस्वरूप परमेश्वर] (मा) मुझे (रक्षतु) बचावे, (सः) वह (मा) मुझे (गोपायतु) पाले, (तस्मै) उसको (आत्मानम्) अपना आत्मा [मन सहित देह और जीव] (स्वाहा) सुन्दर वाणी [दृढ़ प्रतिज्ञा] के साथ (परि ददे) मैं सौंपता हूं ॥ १० ॥

भावार्थ—मन्त्र १ के समान है ॥ १० ॥

सामर्थ्योपेतः (सः) (प्रतिष्ठायाः) तृतीयार्थे षष्ठी । प्रतिष्ठया । गौरवेण (ध्रुवायाः) स्थिरायाः । अधोभवायाः । अन्यत् पूर्ववत् ॥

१०—(बृहस्पतिः) बृहत्या वेदवाण्या रक्षकः परमात्मा (विश्वैः) सर्वैः (देवैः) श्रेष्ठगुणैः सह (ऊर्ध्वायाः) उपरिस्थितायाः । शिष्टं पूर्ववत् ॥

सूक्तम् १८ [पर्यायसूक्तम्] ॥

१—१० ॥ मन्त्रोक्ता देवताः ॥ १ साम्नी त्रिष्टुप्; २, ३, ६ आर्च्यनुष्टुप्; ४ भुरिगार्च्यनुष्टुप्; ५ स्वराडार्च्यनुष्टुप्; ७, ९, १० प्राजापत्या त्रिष्टुप्; ८ भुरिक् साम्नी त्रिष्टुप् ॥

रक्षाप्रयत्नोपदेशः—रक्षा के प्रयत्न का उपदेश ॥

अग्निं ते वसुंवन्तमृच्छन्तु ।

ये माघायवः प्राच्या दिशोऽभिदासात् ॥ १ ॥

अग्निम् । ते । वसु-वन्तम् । ऋच्छन्तु ॥ ये । मा । अघ-यवः । प्राच्याः । दिशः । अभि-दासात् ॥ १ ॥

भाषार्थ—(ते) वे [दुष्ट] (वसुवन्तम्) श्रेष्ठ गुणों के स्वामी (अग्निम्) ज्ञान स्वरूप परमेश्वर की (ऋच्छन्तु) सेवा करें । (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (प्राच्याः) पूर्व वा सामने वाली (दिशः) दिशा से (अभिदासात्) सताया करें ॥ १ ॥

भावार्थ—मनुष्य प्रयत्न करें कि पापी लोग दुष्टाचरण छोड़कर सर्वनियन्ता परमेश्वर की आज्ञा में रह कर सर्वत्र सब को सुख देवें ॥ १ ॥

इस सूक्त के मन्त्रों को यथाक्रम गत सूक्त के मन्त्रों से मिलाओ ॥

१—(अग्निम्) ज्ञानस्वरूपं परमेश्वरम् (ते) अघायवः (वसुवन्तम्) संज्ञायाम् । पा० ८ । २ । ११ । इति मतोर्वः । श्रेष्ठगुणस्य स्वामिनम् (ऋच्छन्तु) ऋच्छतिः परिचरणकर्मा—निघ० ३ । ५ । परिचरन्तु । सेवन्ताम् (ये) (मा) माम् (अघायवः) अघ—क्यच् परेच्छायाम् । अश्वाघस्यात् । पा० ७ । ४ । ३७ । इत्यात्वम् । क्याच्छन्दसि । पा० ३ । २ । १७० । इति उप्रत्ययः । पापमिच्छन्तः । जिघांसवः (प्राच्याः) पूर्वस्याः । अभिमुखीभूतायाः (दिशः) (अभिदासात्) लेटि बहुवचनस्यैकवचनम् । सर्वतो दासेयुः । हिंस्युः ॥

वायुं तेऽन्तरिक्षवन्तमृच्छन्तु ।
ये माघायव एतस्या दिशोऽभिदासात् ॥ २ ॥

वायुम् । ते । अन्तरिक्ष-वन्तम् । ऋच्छन्तु ॥ ये । मा । अघ-यवः । एतस्याः । दिशः । अभि-दासात् ॥ २ ॥

भाषार्थ—(ते) वे [दुष्ट] (अन्तरिक्षवन्तम्) मध्यलोक के स्वामी (वायुम्) सर्वव्यापक परमेश्वर की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (अभिदासात्) सताया करें ॥ २ ॥

भावार्थ—मन्त्र १ के समान है ॥ २ ॥

सोमं ते रुद्रवन्तमृच्छन्तु ।
ये माघायवो दक्षिणाया दिशोऽभिदासात् ॥ ३ ॥

सोमम् । ते । रुद्र-वन्तम् । ऋच्छन्तु ॥ ये । मा । अघ-यवः । दक्षिणायाः । दिशः । अभि-दासात् ॥ ३ ॥

भाषार्थ—(ते) वे [दुष्ट] (रुद्रवन्तम्) दुष्टनाशक गुणों के स्वामी (सोमम्) सब के उत्पन्न करने वाले परमेश्वर की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (दक्षिणायाः) दक्षिण वा दाहिनी (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ३ ॥

भावार्थ—मन्त्र १ के समान है ॥ ३ ॥

वरुणं त आदित्यवन्तमृच्छन्तु ।
ये माघायव एतस्या दिशोऽभिदासात् ॥ ४ ॥

२—(वायुम्) सर्वव्यापकं परमात्मनम् (अन्तरिक्षवन्तम्) मध्यलोकस्य स्वामिनम् (एतस्याः) मध्यवर्तमानायाः । अन्यत् पूर्ववत् ।

३—(सोमम्) सर्वोत्पादकं परमात्मानम् (रुद्रवन्तम्) रुङ् हिंसायाम्—क्विप् तुक् च+रुङ् हिंसायाम्—ड । रुद्राणां दुष्टनाशकगुणानां स्वामिनम् (दक्षिणायाः) दक्षिणस्याः । दक्षिणहस्तभवायाः । अन्यत् पूर्ववत् ॥

वरुणम् । ते । आदित्य-वन्तम् । ऋच्छन्तु ॥ ये । मा ।
अघ-यवः । एतस्याः । दिशः । अभि-दासात् ॥ ४ ॥

भाषार्थ—(ते) वे [दुष्ट] (आदित्यवन्तम्) प्रकाशमान गुणों के स्वामी (वरुणम्) सब में उत्तम परमेश्वर की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ४ ॥

भावार्थ—मन्त्र १ के समान है ॥ ४ ॥

सूर्यं ते द्यावापृथिवीवन्तमृच्छन्तु ।
ये माघायवः प्रतीच्या दिशोऽभिदासात् ॥ ५ ॥

सूर्यम् । ते । द्यावापृथिवी-वन्तम् । ऋच्छन्तु ॥ ये । मा ।
अघ-यवः । प्रतीच्याः । दिशः । अभि-दासात् ॥ ५ ॥

भाषार्थ—(ते) वे [दुष्ट] (द्यावापृथिवीवन्तम्) सूर्य और पृथिवी के स्वामी (सूर्यम्) सर्व प्रेरक परमात्मा की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (प्रतीच्याः) पश्चिम वा पीछे वाली (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ५ ॥

भावार्थ—मन्त्र १ के समान है ॥ ५ ॥

अपस्त ओषधीमतीर्ऋच्छन्तु ।
ये माघायव एतस्या दिशोऽभिदासात् ॥ ६ ॥

अपः । ते । ओषधी-मतीः । ऋच्छन्तु ॥
ये । मा । अघ-यवः । एतस्याः । दिशः । अभि-दासात् ॥ ६ ॥

४—(वरुणम्) सर्वोत्तमं परमेश्वरम् (आदित्यवन्तम्) प्रकाशमान-गुणानां स्वामिनम्। अन्यत् पूर्ववत् ॥

५—(सूर्यम्) सर्वप्रेरकं परमात्मानम् (द्यावापृथिवीवन्तम्) छन्दसीरः। पा० ८। २। १५। मतुपो मस्य वः। सूर्यपृथिव्योः स्वामिनम् (प्रतीच्याः) पश्चिमायाः। पृष्ठतः स्थितायाः। अन्यत् पूर्ववत् ॥

भाषार्थ—(ते) वे [दुष्ट] (ओषधीमतीः) ओषधियों [अन्न सोम-लता आदि] वाली (अपः) श्रेष्ठ गुणों में व्याप्त प्रजाओं की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (अभिदासात्) सताया करें ॥६ ॥

भावार्थ—मन्त्र १ के समान है ॥ ६ ॥

सूचना—(अपः) शब्द के लिये गत सूक्त का मन्त्र ६ देखो ॥

विश्वकर्माणं ते सप्तऋषिवन्तमृच्छन्तु ।
ये माघायव उदीच्या दिशोऽभिदासात् ॥ ७ ॥

विश्व-कर्माणम् । ते । सप्तऋषि-वन्तम् । ऋच्छन्तु ॥ ये । मा । अघ-यवः । उदीच्याः । दिशः । अभि-दासात् ॥ ७ ॥

भाषार्थ—(ते) वे [दुष्ट] (सप्तऋषिवन्तम्) सात ऋषियों [हमारे कान आंख, नाक, जिह्वा, त्वचा, पांच ज्ञानेन्द्रियों मन, बुद्धि] के स्वामी (विश्व कर्माणम्) विश्वकर्मा [सब के बनाने वाले परमेश्वर] की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (उदीच्याः) उत्तर वा बायीं (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ७ ॥

भावार्थ—मन्त्र १ के समान है ॥ ७ ॥

इन्द्रं ते मरुत्वन्तमृच्छन्तु ।
ये माघायव एतस्या दिशोऽभिदासात् ॥ ८ ॥

इन्द्रम् । ते । मरुत्-वन्तम् । ऋच्छन्तु ॥
ये । मा । अघ-यवः । एतस्याः । दिशः । अभि-दासात् ॥८॥

६—(अपः) सू० १७ म० ६ । आप्ताः प्रजाः (ओषधीमतीः) अन्नसोम-लतायुक्ताः । अन्यत् पूर्ववत् ॥

७—(विश्वकर्माणम्) सर्वस्रष्टारं परमेश्वरम् (सप्तऋषिवन्तम्) सू० १७ । म० ७ । छन्दसीरः । पा० ८ । २।१५। मतुपो वः । मनोबुद्धिसहितपञ्चज्ञानेन्द्रियाणां स्वामिनम् (उदीच्याः) उत्तरस्याः वामस्थायाः । अन्यत् पूर्ववत् ॥

भाषार्थ—(ते) वे [दुष्ट] (मरुत्वन्तम्) शूरों के स्वामी (इन्द्रम्) इन्द्र [परम ऐश्वर्यवान् परमात्मा] को (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (एतस्याः) इस [बीच वाली] (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ८ ॥

भावार्थ—मन्त्र १ के समान है ॥ ८ ॥

प्रजापतिं ते प्रजननवन्तमृच्छन्तु ।
ये माघायवो ध्रुवाया दिशोऽभिदासात् ॥ ९ ॥
प्रजा-पतिम् । ते । प्रजनन-वन्तम् । ऋच्छन्तु ॥
ये । मा । अघ-यवः । ध्रुवायाः । दिशः । अभि-दासात् ॥ ९ ॥

भाषार्थ—(ते) वे [दुष्ट] (प्रजननवन्तम्) सृजन सामार्थ्य के स्वामी (प्रजापतिम्) प्रजापति [प्रजाओं के पालक परमेश्वर] की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (ध्रुवायाः) स्थिर वा नीचे वाली (दिशः) दिशा से (अभिदासात्) सताया करें ॥ ९ ॥

भावार्थ—मन्त्र १ समान है ॥ ९ ॥

बृहस्पतिं ते विश्वदेववन्तमृच्छन्तु ।
ये माघायव ऊर्ध्वाया दिशोऽभिदासात् ॥ १० ॥
बृहस्पतिम् । ते । विश्वदेव-वन्तम् । ऋच्छन्तु ॥ ये । मा । अघ-यवः । ऊर्ध्वायाः । दिशः । अभि-दासात् ॥ १० ॥

भाषार्थ—(ते) वे [दुष्ट] विश्वदेववन्तम्) सब उत्तम गुण रखने

८—(इन्द्रम्) परमैश्वर्यवन्तं परमात्मानम् (मरुत्वन्तम्) मरुतां शत्रुमारकाणां शूराणां स्वामिनम् । अन्यत् पूर्ववत् ॥

९—(प्रजापतिम्) सर्वपालकं परमात्मानम् (प्रजननवन्तम्) सृजनसामर्थ्यस्वामिनम् (ध्रुवायाः) स्थिरायाः । अधःस्थितायाः । अन्यत् पूर्ववत् ॥

१०—(बृहस्पतिम्) बृहत्या वेदवाण्या रक्षकं परमात्मानम्

वाले (बृहस्पतिम्) बृहस्पति [वेदवाणी के रक्षक परमात्मा] की (ऋच्छन्तु) सेवा करें। (ये) जो (अघायवः) बुरा चीतने वाले (मा) मुझे (ऊर्ध्वायाः) ऊपर वाली (दिशः) दिशा से (अभिदासात्) सताया करें ॥१०॥

भावार्थ—मन्त्र १ के समान है ॥ १० ॥

सूक्तम् १८ [पर्यायसूक्तम्] ॥

१—११ । मन्त्रोक्ता देवताः । १, ६ भुरिगार्षी बृहती; २, ४—७ निचृदार्षी पङ्क्तिः; ३ आर्षी बृहती; ८, ११ आर्षी पङ्क्तिः; १० स्वराडार्षी बृहती ॥

रक्षाप्रयत्नोपदेशः—रक्षा के प्रयत्न का उपदेश ॥

मित्रः पृथिव्योदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ १ ॥

मित्रः । पृथिव्या । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ १ ॥

भाषार्थ—(मित्रः) मित्र [हितकारी मनुष्य] (पृथिव्या) पृथिवी के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति [वा दुर्ग रूप परमेश्वर] की ओर (वः) तुम्हें (प्र) आगे (नयामि) लिये चलता हूं। (ताम्) उस [शक्ति] में (आ विशत) तुम घुस जाओ, (ताम्) उस में (प्र विशत) तुम भीतर जाओ, (सा) वह [शक्ति] (वः)

(विश्वदेववन्तम्) सर्वश्रेष्ठगुणयुक्तम् (ऊर्ध्वायाः) उपरिस्थितायाः । अन्यत् पूर्ववत् ॥

१—(मित्रः) ञिमिदा स्नेहे—क्त्र । स्नेही पुरुषः (पृथिव्या) भूमिराज्यादिना सह (उदक्रामत्) उत्क्रान्तवान् । उच्चपदं प्राप्तवान् (ताम्) प्रसिद्धाम् (पुरम्) पुर अग्रगमने—क्विप् । अग्रगामिनीं दुर्गरूपां वा शक्तिं परमात्मानं प्रति (प्र) अग्रे (नयामि) गमयामि (वः) युष्मान् (ताम्) शक्तिम् (आ विशत) आभिमुख्येन मध्ये गच्छत (ताम्) (प्र विशत) प्रवेशेन प्राप्नुत (सा)

तुम्हें (शर्म) सुख (च च) और (वर्म) कवच [रक्षा साधन] (यच्छतु) देवे ॥ १ ॥

भावार्थ—जो मनुष्य रत्नों को धारण करने वाली पृथिवी का मान करते और परमात्मा में पूर्ण विश्वास रखते हैं, वे ही सुरक्षित रहकर उन्नति करते हैं ॥ १ ॥

वायुरन्तरिक्षेणोदंक्रामत् तां पुरं प्र णंयामि वः। तामा विशत तां प्र विंशत सा वः शर्म च वर्म च यच्छतु ॥ २ ॥

वायुः । अन्तरिक्षेण । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ २ ॥

भाषार्थ—(वायुः) वायु [पवन] (अन्तरिक्षेण) आकाश के साथ (उत् अक्रामत्) ऊपर चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति...... [मन्त्र १] ॥ २ ॥

भावार्थ—जैसे वायु आकाश में होकर प्रत्येक वस्तु में प्रवेश करके आगे बढ़ता जाता है, वैसे ही मनुष्य परमेश्वर में श्रद्धा करके विद्या और बल में आगे बढ़ें ॥ २ ॥

सूर्यो दिवोदंक्रामत् तां पुरं प्र णंयामि वः। तामा विशत तां प्र विंशत सा वः शर्म च वर्म च यच्छतु ॥ ३ ॥

सूर्यः । दिवा । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ३ ॥

शक्तिः (वः) युष्मभ्यम् (शर्म) सुखम् (च च) समुच्चये (वर्म) कवचम् रक्षासाधनम् (यच्छतु) ददातु ॥

२—(वायुः) वातः । पवनः (अन्तरिक्षेण) आकाशेन । अन्यद् गतम् ॥

भाषार्थ—(सूर्यः) सूर्य (दिवा) प्रकाश के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति……[मन्त्र १] ॥ ३ ॥

भावार्थ—मनुष्य सूर्य के समान प्रतापी होकर परमात्मा का स्मरण करता हुआ पुरुषार्थ करे ॥ ३ ॥

चन्द्रमा नक्षत्रैरुदक्रामत् तां पुरं प्र णयामि वः। तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ४ ॥

चन्द्रमाः। नक्षत्रैः। उत्। अक्रामत्। ताम्। पुरम्। प्र। नयामि। वः॥ ताम्। आ। विशत। ताम्। प्र। विशत। सा। वः। शर्म। च। वर्म। च। यच्छतु ॥ ४ ॥

भाषार्थ—(चन्द्रमाः) चन्द्रमा (नक्षत्रैः) नक्षत्रों के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति……[मन्त्र १] ॥ ४ ॥

भावार्थ—चन्द्रमा और नक्षत्रों के विषय में सू० ७ और सूक्त ८ मन्त्र १, २ देखो। मनुष्य चन्द्रमा के समान परमात्मा के नियम में चलकर परोपकार करे ॥ ४ ॥

सोम ओषधीभिरुदक्रामत् तां पुरं प्र णयामि वः। तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ५ ॥

सोमः। ओषधीभिः। उत्। अक्रामत्। ताम्। पुरम्। प्र। नयामि। वः॥ ताम्। आ। विशत। ताम्। प्र। विशत। सा। वः। शर्म। च। वर्म। च। यच्छतु ॥ ५ ॥

३—(सूर्यः) रविः (दिवा) प्रकाशेन सह। अन्यद् गतम् ॥

४—(चन्द्रमाः) चन्द्रमाह्लादं माति निर्मिमीते सः। आह्लादकश्चन्द्रलोकः (नक्षत्रैः) गमनशीलैस्तारागणैः—पश्यत सूक्तम् ७ तथा ८ म० १, २। अन्यद् गतम् ॥

भाषार्थ—(सोमः) सोम रस (ओषधीभिः) ओषधियों [अन्नादि] के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति······[म० १] ॥ ५ ॥

भावार्थ—जैसे सोमरस उत्तममहौषध दूसरी ओषधियों के साथ में उपकारी होता है, वैसे ही परमेश्वर भक्त विद्वान् पुरुष अन्य मनुष्यों के मेल से उपकार करे ॥ ५ ॥

यज्ञो दक्षिणाभिरुदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ६ ॥

यज्ञः । दक्षिणाभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ६ ॥

भाषार्थ—(यज्ञः) यज्ञ [पूजनीय व्यवहार] (दक्षिणाभिः) दक्षिणाओं [योग्य दानों] के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति······[मन्त्र १] ॥ ६ ॥

भावार्थ—जैसे उत्तम उत्तम काम सुपात्रों के सत्कार से सिद्ध होते हैं, वैसे ही मनुष्यों को ईश्वर भक्ति के साथ लोगों का मान करके बड़े बड़े काम करने चाहियें ॥ ६ ॥

समुद्रो नदीभिरुदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ७ ॥

समुद्रः । नदीभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ७ ॥

५—(सोमः) सोमरसः (ओषधीभिः) अन्नादिभिः । अन्यद् गतम् ॥

६—(यज्ञः) पूजनीयव्यवहारः (दक्षिणाभिः) योग्यदानैः । अन्यद् गतम् ॥

भाषार्थ—(समुद्रः) समुद्र [जल समूह] (नदीभिः) नदियों के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति……[मन्त्र १] ॥ ७ ॥

भावार्थ—जैसे समुद्र ईश्वर नियम से नदियों के मेल से बड़ा होता है, वैसे ही मनुष्य मिलकर उन्नति करें ॥ ७ ॥

ब्रह्म ब्रह्मचारिभिरुदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ८ ॥

ब्रह्म । ब्रह्मचारि-भिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ८ ॥

भाषार्थ—(ब्रह्म) वेदज्ञान (ब्रह्मचारिभिः) ब्रह्मचारियों [वीर्यनिग्रह से ईश्वर और वेद को प्राप्त होने वालों] के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति……[मन्त्र १] ॥ ८ ॥

भावार्थ—जैसे ब्रह्मचारी लोग ब्रह्मचर्य के उत्तम नियमों के पालन से संसार का उपकार करते हैं, वैसे ही सब मनुष्यों को करना चाहिये ॥ ८ ॥

इन्द्रो वीर्ये३णोदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ९ ॥

इन्द्रः । वीर्येण । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ९ ॥

भाषार्थ—(इन्द्रः) इन्द्र [परम ऐश्वर्यवान् पुरुष] (वीर्येण) वीरता से (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति

७—(समुद्रः) जलौघः (नदीभिः) । सरिद्भिः । अन्यद् गतम् ॥

८—(ब्रह्म) वेदज्ञानम् (ब्रह्मचारिभिः) वीर्यनिग्रहेण परमेश्वरस्य वेदस्य च प्राप्तये अभ्यासिभिः । अन्यद् गतम् ॥

९—(इन्द्रः) परमैश्वर्यवान् पुरुषः (वीर्येण) वीरकर्मणा । अन्यद्

......[मन्त्र १] ॥ ९ ॥

भावार्थ—मनुष्यों को परमेश्वर की भक्ति के साथ प्रतापी वीरों के समान वीर कर्म करके उन्नति करनी चाहिये ॥ ९ ॥

देवा अमृतेनोदक्रामंस्तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ १० ॥

देवाः । अमृतेन । उत् । अक्रामन् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ १० ॥

भाषार्थ—(देवाः) विद्वान् लोग (अमृतेन) अमरपन [पुरुषार्थ वा मोक्ष सुख] के साथ (उत् अक्रामन्) ऊंचे चढ़े हैं, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति......[मन्त्र १] ॥ १० ॥

भावार्थ—विद्वान् लोग पुरुषार्थ करके उच्च पद पाते हैं, वैसे ही सब मनुष्य विद्वान् होकर उन्नति करते रहें ॥ १० ॥

प्रजापतिः प्रजाभिरुदक्रामत् तां पुरं प्र णयामि वः । तामा विशत तां प्र विशत सा वः शर्म च वर्म च यच्छतु ॥ ११ ॥

प्रजा-पतिः । प्र-जाभिः । उत् । अक्रामत् । ताम् । पुरम् । प्र । नयामि । वः ॥ ताम् । आ । विशत । ताम् । प्र । विशत । सा । वः । शर्म । च । वर्म । च । यच्छतु ॥ ११ ॥

भाषार्थ—(प्रजापतिः) प्रजापति [प्रजापालक मनुष्य] (प्रजाभिः) प्रजाओं के साथ (उत् अक्रामत्) ऊंचा चढ़ा है, (ताम्) उस (पुरम्) अग्रगामिनी शक्ति की ओर (वः) तुम्हें (प्र) आगे (नयामि) लिये चलता हूं। (ताम्) उस [शक्ति] में (आ विशत) तुम घुस जाओ, (ताम्) उस में (प्र

गतम् ॥

१०—(देवाः) विद्वांसः (अमृतेन) अमरत्वेन । पुरुषार्थेन । मोक्षसुखेन । अन्यद् गतम् ॥

११—(प्रजापतिः) प्रजापालकः पुरुष (प्रजाभिः) सन्तानैः । अनताभिः।

विशत) तुम भीतर जाओ, (सा) वह [शक्ति] (वः) तुम्हें (शर्म) सुख (च च) और (वर्म) कवच [रक्षासाधन] (यच्छतु) देवे ॥ ११ ॥

भावार्थ—प्रजापालक पुरुष उत्तम सन्तानों और जनताओं के साथ आगे बढ़ते हैं, वैसे ही सब मनुष्यों को परस्पर सहाय करके सब की उन्नति से अपनी उन्नति करनी चाहिये ॥ ११ ॥

सूक्तम् २० ॥

१—४ ॥ मन्त्रोक्ता देवताः ॥ १ आर्षी त्रिष्टुप् ; २ निचृज् जगती; ३ आर्ष्यनुष्टुप् ; ४ निचृदनुष्टुप् ॥

रक्षाप्रयत्नोपदेशः—रक्षा के प्रयत्न का उपदेश ॥

अप न्यधुः पौरुषेयं वधं यमिन्द्राग्नी धाता सविता बृहस्पतिः। सोमो राजा वरुणो अश्विना यमः पूषास्मान् परि पातु मृत्योः ॥ १ ॥

अप । न्यधुः । पौरुषेयम् । वधम् । यम् । इन्द्राग्नी इति । धाता । सविता । बृहस्पतिः ॥ सोमः । राजा । वरुणः । अश्विना । यमः । पूषा । अस्मान् । परि । पातु । मृत्योः ।१।

भाषार्थ—(यम्) जिस (पौरुषेयम्) पुरुषों में विकार करने वाले (वधम्) हथियार को (अप) छिपा कर (न्यधुः) उन [शत्रुओं] ने जमा रक्खा है, [उस] (मृत्योः) मृत्यु [मृत्यु के कारण] से (इन्द्राग्नी) बिजुली और अग्नि दोनों [के सामन व्यापक और तेजस्वी], (धाता) धारण करने वाला, (सविता) आगे चलाने वाला, (बृहस्पतिः) बड़ी विद्याओं का रक्षक, (सोमः)

अन्यद् गतम् ॥

१—(अप) अपगूढम् । अप्रकाशम् (न्यधुः) निहितवन्तः । नीचैः स्थापितवन्तः शत्रवः (पौरुषेयम्) पुरुषाद् वधविकारसमूहतेनकृतेषु । वा० पा० ५ । १ । १० । पुरुष—ढञ् । पुरुषाणां विकर्तारं नाशकम् (वधम्) हननसाधनं शस्त्रास्त्रादिरूपम् (यम्) (इन्द्राग्नी) विद्युत्पावकाविव व्यापकस्तेजस्वी च (धाता) धारकः (सविता) प्रेरकः (बृहस्पतिः) बृहतीनां विद्यानां पालकः

ऐश्वर्यवान्, (राजा) राजा [शासक] (वरुणः) श्रेष्ठ, (अश्विना) सूर्य और चन्द्रमा दोनों [के समान नियम पर चलने वाला], (यमः) न्यायकारी (पूषा) पोषण करने वाला [शूर पुरुष] (अस्मान्)हमें (परि) सब ओर से (पातु) बचावे ॥ १ ॥

भावार्थ—यदि शत्रु, चोर, डाकू आदि छल कपट से सुरंग आदि लगा कर प्रजा को दुःख देवें, शूर प्रतापी राजा उन को रोक कर प्रजा की रक्षा करे ॥ १ ॥

यानि चकार भुवनस्य यस्पतिःप्रजापतिर्मातरिश्वा प्रजाभ्यः । प्रदिशो यानि वसते दिशश्च तानि मे वर्माणि बहुलानि सन्तु ॥ २ ॥

यानि । चकार । भुवनस्य । यः । पतिः । प्रजा-पतिः । मातरिश्वा । प्र-जाभ्यः ॥ प्र-दिशः । यानि । वसते । दिशः । च । तानि । मे । वर्माणि । बहुलानि । सन्तु ॥ २ ॥

भाषार्थ—(भुवनस्य) संसार का (यः) जो (पतिः) पति [परमात्मा] है, [उस] (प्रजापतिः) प्रजापति, (मातरिश्वा) आकाश में व्यापक [परमात्मा] ने (प्रजाभ्यः)प्रजाओं के लिये (यानि) जिन[रक्षा साधनों]को (चकार) बनाया है । और (यानि) जो (प्रदिशः) दिशाओं (च) और (दिशः) मध्य दिशाओं को (वसते) ढकते हैं [रक्षित करते हैं], (तानि)

(सोमः) ऐश्वर्यवान् (राजा) शासकः (वरुणः) श्रेष्ठः (अश्विना) सूर्याचन्द्रमसाविव नियमवान् पुरुषः (यमः) न्यायकारी (पूषा) पोषकः (अस्मान्) प्रजागणान् (परि) सर्वतः (पातु) (रक्षतु)(मृत्योः)तस्मात् मरणकारणात् ॥

२—(यानि) वर्माणि । रक्षासाधनानि (चकार) रचितवान् (भुवनस्य) संसारस्य (यः) (पतिः) स्वामी (प्रजापतिः) प्रजापालकः (मातरिश्वा) टुओश्वि गतिवृद्ध्योः—कनिन् । मातरि आकाशे श्वयति व्याप्नोतीति परमात्मा (प्रजाभ्यः) (प्रदिशः) प्राच्यादिदिशाः (यानि) वर्माणि (वसते) आच्छादयन्ति । रक्षन्ति (दिशः) मध्यवर्तिनीर्दिशाः (च) (तानि) (मे)

वे (वर्माणि) कवच [रक्षा साधन) (मे) मेरे लिये (बहुलानि) बहुत से (सन्तु) होवें ॥ २ ॥

भावार्थ—जगत्पालक परमेश्वर ने मनुष्य के लिये सब दिशाओं में रक्षा के साधन उपस्थित किये हैं मनुष्य प्रयत्न पूर्वक उन्हें प्राप्त करके सुखी होवे ॥२

यत् ते तनूष्वनंह्यन्त देवा द्युराजयो देहिनः ।

इन्द्रो यच्चक्रे वर्म तदस्मान् पातु विश्वतः ॥ ३ ॥

यत् । ते । तनूषु । अनंह्यन्त । देवाः । द्यु-राजयः । देहिनः ॥

इन्द्रः । यत् । चक्रे । वर्म । तत् । अस्मान् । पातु । विश्वतः॥३

भाषार्थ—[हे मनुष्य !] (यत्) जिस [कवच] को (तनूषु) शरीरों पर (ते) उन (द्युराजयः) व्यवहारों में ऐश्वर्यवान्, (देहिनः) शरीरधारी (देवाः) विद्वानों ने (अनह्यन्त) बांधा है । और (यत्) जिस (वर्म) कवच [रक्षासाधन] को (इन्द्रः) इन्द्र [परम ऐश्वर्यवान् जगदीश्वर] ने (चक्रे) बनाया है, (तत्) वह [कवच] (अस्मान्) हमें (विश्वतः) सब ओर से (पातु) बचावे ॥ ३ ॥

भावार्थ—जैसे विद्वान् लोगों ने परमेश्वरकृत नियमों को मान कर सब की रक्षा की है, वैसे ही मनुष्यों को विद्वान् होकर परस्पर रक्षा करनी चाहिये ॥ ३ ॥

वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्यः ।

वर्म मे विश्वे देवाः क्रन् मा मा प्रापत् प्रतीचिका ॥ ४ ॥

मह्यम् (वर्माणि) कवचानि । रक्षासाधनानि (बहुलानि) प्रभूतानि (सन्तु) भवन्तु ॥

३—(यत्) वर्म (ते) प्रसिद्धाः (तनूषु) शरीरेषु (अनह्यन्त) णह बन्धने—लङ् । धृतवन्तः (देवाः) विद्वांसः (द्युराजयः) दिवु व्यवहारे–क्विप्+राजृ दीप्तौ ऐश्वर्ये च—इन् । व्यवहारेषु समर्थाः (देहिनः) शरीरिणः (इन्द्रः) परमैश्वर्यवान् परमेश्वरः (यत्) (चक्रे) कृतवान् (वर्म) कवचम् । रक्षासाधनम् (तत) (अस्मान्) उपासकान् (पातु) (विश्वतः) सर्वतः ॥

वर्म॑ । मे॒ । द्यावा॑पृथि॒वी इति॑ । वर्म॑ । अहः॑ । वर्म॑ । सूर्यः॑ ॥ वर्म॑ । मे॒ । विश्वे॑ । दे॒वाः । क्र॒न् । मा । मा॒ । प्र । आ॒प॒त् ॥ प्र॒ती॒चि॒का ॥ ४ ॥

भाषार्थ—(मे) मेरे लिये (द्यावापृथिवी) आकाश और भूमि ने (वर्म) कवच, (अहः) दिन ने (वर्म) कवच, (सूर्यः) सूर्य ने (वर्म) कवच, (विश्वे) सब (देवाः) उत्तम पदार्थों ने (वर्म) कवच (मे) मेरे लिये (क्रन्) किया है, (मा) मुझ को (प्रतीचिका) उलटी चलने वाली [विपत्ति] (मा प्र आपत्) कभी न प्राप्त हो ॥ ४ ॥

भावार्थ—जो मनुष्य संसार के बीच सब पदार्थों से सर्वदा उपकार लेते हैं, वह सुखी रहते हैं ॥ ४ ॥

इति द्वितीयोऽनुवाकः ॥

अथ तृतीयोऽनुवाकः ॥

सूक्तम् २१ ॥

मन्त्रः १ ॥ वाग् देवता ॥ साम्नी बृहती छन्दः ॥

महाशान्त्युपदेशः—महाशान्ति के लिये उपदेश ॥

गा॒य॒त्र्यु१॒॑ष्णिग॑नु॒ष्टुब् बृ॑ह॒ती प॒ङ्क्तिस्त्रि॒ष्टुब् जग॑त्यै ॥ १ ॥

गा॒य॒त्री । उ॒ष्णिक् । अ॒नु॒-स्तुप् । बृ॒ह॒ती । प॒ङ्क्तिः । त्रि॒-स्तुप् । जग॑त्यै ॥ १ ॥

भाषार्थ—(गायत्री) गायत्री [गानेयोग्य] (उष्णिक्) उष्णिक्

४-(वर्म) कवचम् (मे) मह्यम् (द्यावापृथिवी) सूर्यभूमी (वर्म) (अहः) दिनम् (वर्म) (सूर्यः) भास्करः (वर्म) (मे) (विश्वे) सर्वे (देवाः) दिव्यपदार्थाः (क्रन्) छान्दसो लुङ् । अकार्षुः (मा) निषेधे (मा) माम् (प्र आपत्) अप्नोतेलुङ् । प्राप्नोत् (प्रतीचिका) प्रतीची-कन् स्वार्थे । केऽणः । पा० ७ । ४ । १३ । इति ह्रस्वः । प्रतिकूलाञ्चना विपत्तिः ॥

१—(गायत्री) अ० ८ । ९ । १४ । अमिनक्षियजि० । उ० ३ । १०५ । गै गाने-अत्रन्, षित्, युक् ङीप् च । गायत्री गायतेः स्तुतिकर्मणः—निरु० ७।१२।

[बड़े स्नेह वाली],(बृहती) बृहती [बढ़ती हुयी], (पङ्क्तिः) पङ्क्ति [विस्तार-वाली], (त्रिष्टुप्) त्रिष्टुप् [तीन कर्म, उपासना, ज्ञान से सत्कार की गयी], (अनुष्टुप्) अनुष्टुप् [निरन्तर पूजने योग्य वेद वाणी] (जगत्यै) जगती [चलते हुये जगत् के हित के लिये] है ॥ १ ॥

भावार्थ—मनुष्यों को परमेश्वरोक्त वेदवाणी द्वारा कर्म, उपासना और ज्ञान में तत्पर होकर संसार का हित करना चाहिये ॥ १ ॥

सूचना—गायत्री २४, उष्णिक् २८, अनुष्टुप् ३२, बृहती ३६, पङ्क्ति ४०, त्रिष्टुप् ४४ और जगती ४८ अक्षर के छन्द विशेष भी हैं, परन्तु इस पद्य में अर्थ की सङ्गति विचारणीय है ॥

सूक्तम् २२ ॥

१–२१ ॥ मन्त्रोक्ता देवताः ॥ १ साम्न्युष्णिक् ; २, ६, १४–१६, २० दैवी पङ्क्तिः; ३ , १६ प्राजापत्या गायत्री; ४ , ७ , ११ , १७ दैवी जगती; ५ , १२ , १३ दैवी त्रिष्टुप् ;८–१० आसुरी जगती ; १८ आसुर्यनुष्टुप् ; २१ निचृत् त्रिष्टुप् ॥

महाशान्त्युपदेशः–महाशान्ति के लिये उपदेश ॥

गानयोग्या। छन्दोविशेषोऽपि (उष्णिक्) ऋत्विग्दधृक्स्रग् दिगुष्णिग्०। पा० ३। २। ५६। उत्+ष्णिह प्रीतौ स्नेहने च-क्विन्। उष्णिगुत्स्नाता भवति, स्निह्यतेर्वा स्यात्कान्तिकर्मण उष्णीषिणी वेत्यौपमिकमुष्णीषं स्नायतेः—निरु०७। १२। उत्कर्षेण स्नेहिनी। प्रीतिमती (अनुष्टुप्) अ० ८। ६। १४। अनु+ष्टुभ पूजायाम्—क्विप्। स्तोभतिरर्चतिकर्मा–निघ० ३। १४। अनुष्टुब् वाङ्नाम–निघ० १। ११। निरन्तरं स्तुतियोग्या वेदवाणी। छन्दोविशेषोऽपि (बृहती) अ० १। १७। ४। वर्तमाने पृषद्बृहन्महज्जगच्०। उ० २। ८४। बृह वृद्धौ-अति, ङीष्। बृहती परिबर्हणात्—निरु०७ १२। प्रवर्धमाना। छन्दोविशेषोऽपि(पङ्क्तिः) अ० ६। १०। २१। पचि व्यक्तीकरणे–क्तिन्। पङ्क्तिः पञ्चपदा–निरु० ७। १२। विस्तारवती। छन्दो विशेषोऽपि (त्रिष्टुप्)अ० ८। ६।१४। त्रि+ष्टुभ पूजायाम्-क्विप्। स्तोभतिरर्चतिकर्मा– निघ० ३। १४। त्रिष्टुप् स्तोभत्युत्तरपदा–निरु० ७। १२। त्रिभिः कर्मोपासनाज्ञानैः पूजिता। छन्दोविशेषोऽपि (जगत्यै) अ० ८। ६। १४। वर्तमाने पृषद्बृहन्महज्जगच्। उ० २। ८४। गम्लृ गतौ-अति, ङीप्, जगते संसारहिताय। जगतीति छन्दो विशेषोऽपि ॥

आङ्गिरसानामाद्यैः पञ्चानुवाकैः स्वाहा ॥ १ ॥

आङ्गिरसानाम् । आद्यैः । पञ्च । अनु-वाकैः । स्वाहा ॥ १ ॥

भाषार्थ—(आङ्गिरसानाम्) अङ्गिरा [सर्वज्ञ परमेश्वर] के बनाये [ज्ञानों] के (पञ्च) पांच [पृथिवी, जल, तेज, वायु, आकाश पञ्चभूतों] से सम्बन्ध वाले (आद्यैः) आदि में [इस सृष्टि के पहिले] वर्तमान (अनुवाकैः) अनुकूल वेदवाक्यों के साथ (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १ ॥

भावार्थ—मनुष्य परमेश्वरीय ज्ञान वेदों द्वारा पृथिवी आदि पदार्थों को यथावत् जानकर अपनी वाणी को सुफल करें ॥ १ ॥

षष्ठाय स्वाहा ॥ २ ॥ षष्ठाय । स्वाहा ॥ २ ॥

भाषार्थ—(षष्ठाय) छठे [पृथिवी, जल, तेज, वायु, आकाश पञ्च भूतों की अपेक्षा छठे परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २ ॥

भावार्थ—पृथिव्यादि पञ्चभूतों के नियन्ता परमेश्वर की उपासना सब मनुष्य करें। अथर्व० ८ । ६ । ४ । भी देखो ॥ २ ॥

सप्तमाष्टमाभ्यां स्वाहा ॥३॥ सप्तम-अष्टमाभ्याम् । स्वाहा ॥३॥

भाषार्थ—(सप्तमाष्टमाभ्याम्) सातवें के लिये और आठवें के लिये [भावार्थ देखो] (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ३ ॥

भावार्थ—यहां सातवां और आठवां पद परमेश्वर के दो गुणों का नाम

१—(आङ्गिरसानाम्) अङ्गिरस्—अण् । अङ्गिरसा सर्वज्ञेन परमात्मना कृतानां ज्ञानानाम् (आद्यैः) सृष्टेः प्राग् वर्तमानैः (पञ्च) विभक्तेर्लुक् । पञ्चभिः पृथिव्यादिपञ्चभूतसम्बन्धिभिः (अनुवाकैः) अनुकूलवेदवाक्यैः सह (स्वाहा) अ० १६ । १७ । १ । सुवाणी ॥

२—(षष्ठाय) पृथिव्यादिपञ्चभूतापेक्षया षट्संख्यापूरकाय परमेश्वराय ॥

३—(सप्तमाष्टमाभ्याम्) सप्तमश्चाष्टमश्च तौ ताभ्याम् । षड्वर्गेण काम-क्रोधलोभमोहमदमात्सर्यैः पृथग्भूताय सप्तमाय, श्रोत्रनेत्रनासिकाजिह्वात्वग्-मनश्चित्तैः पृथग् वर्तमानाय अष्टमाय च परमेश्वराय ॥

है। परमेश्वर षड्वर्ग अर्थात् काम, क्रोध, लोभ, मोह, मद और मात्सर्य से अलग सातवां है। तथा कान, आंख, नाक जिह्वा, त्वचा पांच ज्ञानेन्द्रिय और मन और चित्त से पृथक् होने से उसको आठवां माना है। उसकी उपासना हमें सदा करनी चाहिये ॥ ३ ॥

नीलनखेभ्युः स्वाहा ॥ ४ ॥ नील-नखेभ्यः । स्वाहा ॥ ४ ॥

भाषार्थ—(नीलनखेभ्यः) निश्चित ज्ञान प्राप्त कराने वाले [परमेश्वर के गुणों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ४ ॥

भावार्थ—स्पष्ट है ॥ ४ ॥

हरितेभ्युः स्वाहा ॥ ५ ॥ हरितेभ्यः । स्वाहा ॥ ५ ॥

भाषार्थ—(हरितेभ्यः) स्वीकार करने योग्य [परमेश्वर के गुणों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ५ ॥

क्षुद्रेभ्युः स्वाहा ॥ ६ ॥ क्षुद्रेभ्यः । स्वाहा ॥ ६ ॥

भाषार्थ—(क्षुद्रेभ्यः) सूक्ष्म गुणों के लिये (स्वाहा) स्वाहा [सुन्दर-वाणी] हो ॥ ६ ॥

यह मन्त्र आगे है—अथर्व० १६ । २३ । २१ ॥

पर्यायिकेभ्युः स्वाहा ॥७॥ पर्यायिकेभ्यः । स्वाहा ॥ ७ ॥

भाषार्थ—(पर्यायिकेभ्यः) पर्याय [अनुक्रम] वाले गुणों के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ७ ॥

४—(नीलनखेभ्यः) नि + इल गतौ—क + णख गतौ—क । इला वाङ्नाम—निघ० १ । ११ । नीलानां निश्चितज्ञानानां नखेभ्यः प्रापकेभ्यः परमात्मगुणेभ्यः ॥

५—(हरितेभ्यः) हृश्याभ्यामितन् । उ० ३ । ९३ । हृञ् स्वीकारे—इतन् । स्वीकरणीयेभ्यः परमेश्वरगुणेभ्यः ॥

६—(क्षुद्रेभ्यः) स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदि० । उ० २ । १३ । क्षुदिर् संपेषणे-रक् । सूक्ष्मगुणेभ्यः ॥

७—(पर्यायिकेभ्यः) अत इनिठनौ । पा० ५ । २ । ११५ । पर्याय-ठन् । अनुक्रमयुक्तेभ्यः ॥

प्रथमेभ्यः शङ्खेभ्यः स्वाहा ।८। प्रथमेभ्यः । शङ्खेभ्यः । स्वाहा ॥८॥

भाषार्थ—(प्रथमेभ्यः) पहिले [सृष्टि से पहिले वर्तमान] (शङ्खेभ्यः) विचार योग्य गुणों के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ८ ॥

द्वितीयेभ्यः शङ्खेभ्यः स्वाहा ।९। द्वितीयेभ्यः । शङ्खेभ्यः । स्वाहा ९

भाषार्थ—(द्वितीयेभ्यः) दूसरे [सृष्टि के आदि की अपेक्षा अन्त में विद्यमान] (शङ्खेभ्यः) दर्शनीय गुणों के लिये (स्वाहा) स्वाहा [सुन्दर-वाणी] हो ॥ ९ ॥

तृतीयेभ्यः शङ्खेभ्यः स्वाहा।१०। तृतीयेभ्यः। शङ्खेभ्यः । स्वाहा।१०

भाषार्थ—(तृतीयेभ्यः) तीसरे [आदि और अन्त की अपेक्षा मध्य में वर्तमान] (शङ्खेभ्यः) शान्तिदायक गुणों के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १० ॥

उपोत्तमेभ्यः स्वाहा ॥ ११ ॥ उप-उत्तमेभ्यः । स्वाहा ॥ ११ ॥

भाषार्थ—(उपोत्तमेभ्यः) श्रेष्ठों के समीपवर्ती [ब्रह्मचारी आदि पुरुषों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ११ ॥

उत्तमेभ्यः स्वाहा ॥ १२ ॥ उत्-तमेभ्यः । स्वाहा ॥ १२ ॥

भाषार्थ—(उत्तमेभ्यः) अत्यन्त श्रेष्ठ [पुरुषों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १२ ॥

८—(प्रथमेभ्यः) सृष्टेः पूर्ववर्तमानेभ्यः (शङ्खेभ्यः) शमेः खः। उ० १। १०२। शम आलोचने दर्शने च, शमु उपशमे च-खप्रत्ययः। आलोचनीयेभ्यो गुणेभ्यः ॥

९—(द्वितीयेभ्यः) सृष्टेराद्यपेक्षया अन्ते वर्तमानेभ्यः (शङ्खेभ्यः) म० ८। दर्शनीयगुणेभ्यः ॥

१०—(तृतीयेभ्यः) आद्यन्तापेक्षया मध्ये वर्तमानेभ्यः (शङ्खेभ्यः) म० ८। शान्तिप्रदगुणेभ्यः ॥

११—(उपोत्तमेभ्यः) श्रेष्ठानां समीपवर्तिभ्यो ब्रह्मचार्यादिभ्यः ॥

उत्तरेभ्यः स्वाहा ॥ १३ ॥ उत्-तरेभ्यः । स्वाहा ॥ १३ ॥

भाषार्थ—(उत्तरेभ्यः) अधिकतर ऊंचे [पुरुषों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १३ ॥

ऋषिभ्यः स्वाहा ॥ १४ ॥ ऋषि-भ्यः । स्वाहा ॥ १४ ॥

भाषार्थ—(ऋषिभ्यः) ऋषियों [वेदव्याख्याता मुनियों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १४ ॥

शिखिभ्यः स्वाहा ॥१५॥ शिखि-भ्यः । स्वाहा ॥ १५ ॥

भाषार्थ—(शिखिभ्यः) शिखाधारियों [चोटी वालों, अथवा चोटी वाले पर्वतादि के समान ऊंचे ब्रह्मज्ञानियों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १५ ॥

गणेभ्यः स्वाहा ॥ १६ ॥ गणेभ्यः । स्वाहा ॥ १६ ॥

भाषार्थ—(गणेभ्यः) समूहों के लिये (स्वाहा) स्वाहा [सुन्दर-वाणी] हो ॥ १६ ॥

महागणेभ्यः स्वाहा ॥ १७ ॥ महा-गणेभ्यः । स्वाहा ॥ १७ ॥

भाषार्थ—(महागणेभ्यः) बड़े समूहों के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १७ ॥

सर्वेभ्योऽङ्गिरोभ्यो विदगणेभ्यः स्वाहा ॥ १८ ॥

सर्वेभ्यः । अङ्गिरः-भ्यः । विद्-गणेभ्यः । स्वाहा ॥ १८ ॥

भाषार्थ—(सर्वेभ्यः) सब (अङ्गिरोभ्यः) विज्ञानी (विद्गणेभ्यः)

१३—(उत्तरेभ्यः) अधिकतरोन्नतपुरुषेभ्यः ॥

१४—(ऋषिभ्यः) वेदार्थदर्शकेभ्यो मुनिभ्यः ॥

१५—(शिखिभ्यः) व्रीह्यादिभ्यश्च । पा० ५ । २ । ११६ । शिखा—इनि । शिखाधारिभ्यः, यद्वा शिखरयुक्तपर्वतादितुल्योन्नतेभ्यो ब्राह्मणेभ्यः ॥

१६—(गणेभ्यः) समूहेभ्यः ॥

१७—(महागणेभ्यः) महासमूहेभ्यः ॥

पण्डित समूहों के लिये (स्वाहा) स्वाहा [सुन्दर वाणी) हो ॥ १८ ॥

पृथक्सहस्राभ्यां स्वाहा॥१९॥ पृथक्-सहस्राभ्याम् । स्वाहा॥१९॥

भाषार्थ—(पृथक्सहस्राभ्याम्) पृथक् पृथक् और सहस्रों वाले दोनों [समूहों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १९ ॥

भावार्थ—मनुष्य पृथक् पृथक् होकर और सामाजिक समुदाय बनाकर हितकारी कर्म करें करावें ॥ १९ ॥

ब्रह्मणे स्वाहा ॥ २० ॥ ब्रह्मणे । स्वाहा ॥ २० ॥

भाषार्थ—(ब्रह्मणे) वेदज्ञान के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २० ॥

भावार्थ—मनुष्य वेदविद्या के उपदेश से परस्पर हित करते कराते रहें ॥ २० ॥

ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान ।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः २१

ब्रह्म-ज्येष्ठा । सम् -भृता । वीर्याणि । ब्रह्म । अग्रे । ज्येष्ठम् । दिवम् । आ । ततान ॥ भूतानाम् । ब्रह्मा । प्रथमः । उत । जज्ञे । तेन । अर्हति । ब्रह्मणा । स्पर्धितुम् । कः ॥ २१ ॥

भाषार्थ—(संभृता) यथावत् भरे हुये (वीर्याणि) वीर कर्म (ब्रह्मज्येष्ठा) ब्रह्म [परमात्मा] को ज्येष्ठ [महाप्रधान रखने वाले] हैं, (ज्येष्ठम्) ज्येष्ठ [सर्वप्रधान] (ब्रह्म) ब्रह्म [परमात्मा] ने (अग्रे) पहिले (दिवम्)

विद ज्ञाने-क । पण्डितसमूहेभ्यः ॥

१९—(पृथक्सहस्राभ्याम्) व्यक्तिजन्यसहस्रजन्याभ्यां समूहाभ्याम् ॥

२०—(ब्रह्मणे) वेदज्ञानाय ॥

२१—(ब्रह्मज्येष्ठा) ब्रह्म परमात्मा ज्येष्ठो महाप्रधानो येषां तानि (संभृता) सम्यक् पोषितानि (वीर्याणि) वीरकर्माणि (ब्रह्म) प्रवृद्धः परमात्मा (अग्रे) सृष्टिपूर्वम् (ज्येष्ठम्) सर्वप्रधानम् (दिवम्) दिवु गतौ-क । ज्ञानम् (आ)

ज्ञान को (आ) सब ओर (ततान) फैलाया है। (उत) और (ब्रह्मा) वह ब्रह्मा [सब से बड़ा, सर्वजनक परमात्मा] (भूतानाम्) प्राणियों में (प्रथमः) पहिला (जज्ञे) प्रकट हुआ है, (तेन) इस लिये (ब्रह्मणा) ब्रह्मा [महान् परमात्मा] के साथ (कः) कौन (स्पर्धितुम्) झगड़ने को (अर्हति) समर्थ है? ॥ २१ ॥

भावार्थ—संसार में सब प्रकार के पराक्रम और बल सर्वशक्तिमान् जगदीश्वर के सामर्थ्य से हैं, उस महावृद्ध, सर्वजनक से तुल्य वा अधिक कोई भी नहीं है। सब मनुष्य उसकी उपासना कर के सुख प्राप्त करें ॥ २१ ॥

मन्त्र २०,२१ आगे हैं-अथर्व० १६। २३। २६, ३० ॥

सूक्तम् २३ ॥

१-३० ॥ प्रजापतिर्देवता ॥ १ आसुरी बृहती; २-७, २०, २३, २७ दैवी त्रिष्टुप्; ८, १०-१२, १४, १६ प्राजापत्या गायत्री; ६,१३,१८, २२, २६,२८ दैवी जगती; १७, १६, २१, २४, २५, २६ दैवी पङ्क्तिः; ३० निचृत् त्रिष्टुप् ॥

ब्रह्मविद्योपदेशः—ब्रह्मविद्या का उपदेश ॥

आ॒थ॒र्व॒णानां॑ चतुर्ऋ॒चेभ्यः॒ स्वाहा॑ ॥ १ ॥

आ॒थ॒र्व॒णाना॑म् । च॒तुः॒-ऋ॒चेभ्यः॑ । स्वाहा॑ ॥ १ ॥

भाषार्थ—(आथर्वणानाम्) अथर्वा [निश्चल ब्रह्म] के बताये ज्ञानों के (चतुर्ऋचेभ्यः) चार [धर्म, अर्थ, काम, मोक्ष] की स्तुति योग्य विद्या वाले

समन्तात् (ततान) विस्तारितवान् (भूतानाम्) प्राणिनां मध्ये (ब्रह्मा) सर्वेभ्यः प्रवृद्धः परमात्मा (प्रथमः) आद्यः (उत) अपि (प्रथमोत) रोर्यत्वे तस्य लोपे पुनः सन्धिश्छान्दसः संहितायाम् (जज्ञे) प्रादुर्बभूव (तेन) कारणेन (अर्हति) समर्थो भवति (ब्रह्मणा) परमात्मना सह (स्पर्धितुम्) स्पर्धामभिभवेच्छां कर्त्तुम् (कः) कः पुरुषः । न कोऽपीत्यर्थः ॥

१—(आथर्वणानाम्) अथर्वन्-अण् । अथर्वणा निश्चलब्रह्मणा प्रोक्तानां ज्ञानानाम् (चतुर्ऋचेभ्यः) ऋक्पूरब्धूःपथामानक्षे। पा०५ । ४। ७४ । इति चतुर + ऋच्—अप्रत्ययः समासान्तः । ऋच स्तुतौ-क्विप् । ऋग्वाङ्नाम—निघ० १।

[वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १ ॥

भावार्थ—मनुष्यों को परमेश्वरोक्त ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद द्वारा श्रेष्ठ विद्यायें प्राप्त करके इस जन्म और पर जन्म का सुख भोगना चाहिये ॥ १ ॥

यही भावार्थ आगे मन्त्र २९ तक समझें और "निश्चल ब्रह्म के बताये ज्ञानों के"—इन पदों की अनुवृत्ति जानें ॥

पञ्चर्चेभ्यः स्वाहा ॥ २ ॥ पञ्च-ऋचेभ्यः । स्वाहा ॥ २ ॥

भाषार्थ—(पञ्चर्चेभ्यः) पांच [पृथिवी, जल, तेज, वायु, आकाश पांच तत्त्वों] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २ ॥

षड्चेभ्यः स्वाहा ॥ ३ ॥ षट्-ऋचेभ्यः । स्वाहा ॥ ३ ॥

भाषार्थ—(षडृचेभ्यः) छह [वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर, छह ऋतुओं] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ३ ॥

सप्तर्चेभ्यः स्वाहा ॥ ४ ॥ सप्त-ऋचेभ्यः । स्वाहा ॥ ४ ॥

भाषार्थ—(सप्तर्चेभ्यः) सात [दो कान दो, नथने, दो आंखें और एक मुख—अथर्व० १० । २ । ६ इन की] स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ४ ॥

---

१ । चतुर्णां धर्मार्थकाममोक्षाणाम् ऋक् स्तुत्या विद्या येषु वेदेषु तेभ्यः स्वाहा) अ० १६ । १७ । १ । सुवाणी ॥

२-(पञ्चर्चेभ्यः) म० १ । पञ्चानां पृथिव्यप्तेजोवाय्वाकाशानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

३—(षडृचेभ्यः) म० १० । षण्णां वसन्तादिषड् ऋतूनां स्तुत्या विद्या येषु वेदेषु तेभ्यः । वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः । वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः । साम० पू० ६ । १३ । २ । इति षड् ऋतवः ॥

४—(सप्तर्चेभ्यः) म० १ । कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम्—अथर्व० १० । २ । ६ । इत्येतेषां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

अष्टर्चेभ्यः स्वाहा ॥ ५ ॥ अष्ट-ऋचेभ्यः । स्वाहा ॥ ५ ॥

भाषार्थ—(अष्टर्चेभ्यः) आठ [यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान समाधि, आठ योग के अङ्गों] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ५ ॥

नवर्चेभ्यः स्वाहा ॥ ६ ॥ नव-ऋचेभ्यः । स्वाहा ॥ ६ ॥

भाषार्थ—(नवर्चेभ्यः) नव [दो कान, दो आंख, दो नथने, एक मुख, एक पायु, एक उपस्थ, नवद्वारपुर शरीर] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ६ ॥

दशर्चेभ्यः स्वाहा ॥ ७ ॥ दश-ऋचेभ्यः । स्वाहा ॥ ७ ॥

भाषार्थ—(दशर्चेभ्यः) दस [दान, शील, क्षमा, वीरता, ध्यान, बुद्धि, सेना, उपाय, दूत और ज्ञान इन दस बलों] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ७ ॥

एकादशर्चेभ्यः स्वाहा ॥८॥ एकादश-ऋचेभ्यः । स्वाहा ॥८॥

भाषार्थ—(एकाशचभ्यः) ग्यारह [प्राण, अपान, उदान, व्यान, समान, नाग, कूर्म, कृकल, देवदत्त, धनञ्जय दस प्राण और ग्यारहवें जीवात्मा]

५—(अष्टर्चेभ्यः) म० १ । अष्टानां यमनियमादीनां स्तुत्या विद्या येषु वेदेषु तेभ्यः । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाव—ङ्गानि । पातञ्जलयोगदर्शने, २ । २९ ॥

६–(नवर्चेभ्यः) म० १ । नवद्वारपुरस्य शरीरस्य स्तुत्या विद्या येषु वेदेषु तेभ्यः । द्वे श्रोत्रे चक्षुषी नासिके च मुखमेकं द्वे पायूपस्थे—इति शरीरस्य नव—छिद्ररूपाणि द्वाराणि ॥

७—(दशर्चेभ्यः) म० १ । दशानां दशबलानां स्तुत्या विद्या येषु वेदेषु तेभ्यः । दानशीलक्षमावीर्यध्यानप्रज्ञाबलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै—इति शब्दस्तोममहानिधौ ॥

८—(एकादशर्चेभ्यः) म० १ । प्राणापानोदानव्यानसमाननागकूर्म–

की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ८ ॥

द्वादुशुर्चेभ्युः स्वाहा ॥९॥ द्वादुश-ऋुचेभ्यः । स्वाहा ॥९॥

भाषार्थ—(द्वादशर्चेभ्यः) बारह [चैत्र आदि बारह महीनों] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ९ ॥

त्रयोदुशुर्चेभ्युःस्वाहा॥१०॥ त्रुयोदुशु-ऋुचेभ्यः । स्वाहा ॥१०॥

भाषार्थ—(त्रयोदशर्चेभ्यः) तेरह [उछालना, गिराना, सकोड़ना, फैलाना और चलना पांच कर्म तथा छोटाई, हलकायी, प्राप्ति, स्वतन्त्रता, बड़ाई, ईश्वरपन, जितेन्द्रियता और सत्य संकल्प आठ ऐश्वर्य इन तेरह] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १० ॥

चुतुर्द् शुर्चेभ्युः स्वाहा॥११॥ चुतुर्द् शु-ऋुचेभ्यः । स्वाहा ॥११॥

भाषार्थ—(चतुर्दशर्चेभ्यः) चौदह [कान, आंख, नासिका, जिह्वा, त्वचा-पांच ज्ञानेन्द्रिय, और वाक्, हाथ, पांव, पायु, उपस्थ पांच कर्मेन्द्रिय, तथा मन, बुद्धि, चित्त, अहंकार] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ११ ॥

कृकलदेवदत्तधनञ्जया इति दश प्राणा एकादशो जीवात्मा, एतेषां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

९—(द्वादशर्चेभ्यः) म० १ । चैत्रादिद्वादशमासानां स्तुत्या विद्या येषु तेभ्यो वेदेभ्यः ॥

१०—(त्रयोदशर्चेभ्यः) म० १ उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि-वैशेषिके १ । १ । ७ । अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वं च तथा कामावसायिता ॥ १ " इत्यष्टैश्वर्याणि । इत्येतेषां त्रयोदशानां स्तुत्या विद्या येषु तेभ्यो वेदेभ्यः ॥

११—(चतुर्दशर्चेभ्यः) म० १ । मनोबुद्धिचित्ताहङ्कारसहितानां दशेन्द्रियाणां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

पञ्चदशर्चेभ्यः स्वाहा॥१२॥ पञ्चदश-ऋचेभ्यः। स्वाहा॥१२॥

भाषार्थ—(पञ्चदशर्चेभ्यः) पन्द्रह [शुक्ल, नील, पीत रक्त, हरित, कपिश, चित्र ये सात रूप, तथा मधुर आम्ल, लवण, कटु कषाय, तिक्त ये छह रस और सुरभि, असुरभि दो प्रकार का गन्ध, इन पन्द्रह] की स्तुति योग्य विद्या-वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १२ ॥

षोडशर्चेभ्यः स्वाहा ॥१३॥ षोडश-ऋचेभ्यः। स्वाहा ॥१३॥

भाषार्थ—(षोडशर्चेभ्यः) सोलह [प्राण, श्रद्धा, आकाश, वायु, प्रकाश, जल, पृथिवी, इन्द्रिय, मन, अन्न, वीर्य, तप, मन्त्र, कर्म, लोक और नाम—इन सोलह कलाओं] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १३ ॥

टिप्पणी—प्रश्नोपनिषद् में सोलह कलायें इस प्रकार हैं [स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम् । मनोऽन्नमन्नाद् वीर्यं तपो मन्त्राः कर्मलोका लोकेषु च नाम च ॥ प्रश्न ६ श्लोक ४] उस [पुरुष] ने प्राण, प्राण से श्रद्धा [आस्तिक बुद्धि], आकाश, वायु, प्रकाश, जल, पृथिवी, इन्द्रिय [ज्ञानेन्द्रिय और कर्मेन्द्रिय] मन और अन्न को, अन्न से वीर्य, तप, मन्त्रों [ऋग्वेदादि चार वेदों] कर्म और लोकों, और लोकों में नाम को उत्पन्न किया ॥

सप्तदशर्चेभ्यः स्वाहा ॥१४॥ सप्तदश-ऋचेभ्यः। स्वाहा ॥१४॥

भाषार्थ—(सप्तदशर्चेभ्यः) सत्तरह [चार दिशा, चार विदिशा, एक ऊपर की और एक नीचे की दस दिशायें—सत्त्व, रज, और तम तीन गुण—

१२—(पञ्चदशर्चेभ्यः) म० १ । शुक्लनीलपीतरक्तहरितकपिशचित्र-सप्तरूपाणि, मधुराम्ललवणकटुकषायतिक्तषड्रसाः, सुरभिश्चासुरभिश्चेति गन्धौ । इत्येतेषां पञ्चदशानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

१३—(षोडशर्चेभ्यः) म० १ । प्रश्नोपनिषदि प्रश्ने ६ श्लोके ४ प्रतिपादितानां प्राणश्रद्धादिषोडशकलानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

१४—(सप्तदशर्चेभ्यः) म० १ । चतस्रो दिशाश्चतस्रो मध्यदिशा एकोपरिस्था, एकाधोभवेति दश दिशाः, सत्त्वरजस्तमांसि त्रयो गुणाः, ईश्वरो जीवः

ईश्वर, जीव, प्रकृति और संसार] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १४ ॥

अ॒ष्टा॒द॒श॒र्चेभ्यः॑ स्वाहा॑ ।१५। अ॒ष्टा॒द॒श॒-ऋ॒चेभ्यः॑ । स्वाहा॑ ॥१५॥

भावार्थ—(अष्टादशर्चेभ्यः) अठारह [धैर्य, सहन, मन का रोकना, चोरी न करना, शुद्धता, जितेन्द्रियता बुद्धि, विद्या, सत्य, क्रोध न करना, ये दस धर्म—मनु० ६ । ६२, तथा ब्राह्मण, गौ, अग्नि, सुवर्ण, घृत, सूर्य, जल, राजा ये आठ मङ्गल-शब्दकल्पद्रुमकोश, इन अठारह] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १५ ॥

एको॒न॒विं॒श॒तिः॒ स्वाहा॑ ।१६। एको॒न॒विं॒श॒तिः॑ । स्वाहा॑ ॥ १६ ॥

भावार्थ—(एकोनविंशतिः) उन्नीस [ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, चार वर्ण-ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, संन्यास, चार आश्रम-सत्संग, सुनना, विचारना, ध्यान करना, चार कर्म-अप्राप्त की इच्छा, प्राप्त की रक्षा, रक्षित का बढ़ाना, बढ़े हुये का सन्मार्ग में व्यय करना चार पुरुषार्थ-मन, बुद्धि और अहङ्कार इन उन्नीस स्तुति योग्य विद्याओं के लिये] (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १६ ॥

प्रकृतिः संसारश्चेति सप्तदशानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

१५—(अष्टादशर्चेभ्यः) म० १ । धृतिःक्षमा दमोऽस्तेयं शौचमिन्द्रिय-निग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्—मनु० ६ । ६२। लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः ॥ १ ॥ इति शब्दकल्पद्रुमकोशः । एतेषामष्टादशानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

१६—(एकोनविंशतिः) सुपां सुलुक्० । पा० ७ । १ ।३६ । चतुर्थीस्थाने प्रथमा विशेषणपदलोपश्च । एकोनविंशतये ऋग्भ्यः । चत्वारो वर्णाश्चत्वार आश्रमाः सत्संगश्रवणमननिदिध्यासनानि चत्वारि कर्माणि, अलब्धस्य लिप्सा लब्धस्य रक्षणं रक्षितस्य वृद्धिर्वृद्धस्य सन्मार्गे व्ययकरणम्, मनो-बुद्ध्यहंकाराश्चेत्यूनविंशतिर्विद्यास्ताभ्यः ॥

विंशतिः स्वाहा ॥ १७ ॥ विंशतिः । स्वाहा ॥ १७ ॥

भाषार्थ—(विंशतिः) बीस [पांच सूक्ष्म भूत, पांच स्थूल भूत, पांच ज्ञानेन्द्रिय, और पांच कर्मेन्द्रिय-इन बीस स्तुति योग्य विद्याओं के लिये] (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १७ ॥

महत्काण्डाय स्वाहा ॥१८॥ महत्-काण्डाय । स्वाहा ॥ १८ ॥

भाषार्थ—(महत्काण्डाय) बड़े [धर्मात्माओं] के संरक्षक [वेद] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १८ ॥

तृचेभ्यः स्वाहा ॥ १९ ॥ तृचेभ्यः । स्वाहा ॥ १९ ॥

भाषार्थ—(तृचेभ्यः) तीन [भूत, भविष्यत्, वर्तमान] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥१९॥

एकर्चेभ्यः स्वाहा ॥ २० ॥ एक-ऋचेभ्यः स्वाहा ॥ २० ॥

भाषार्थ—(एकर्चेभ्यः) एक [परमात्मा] की स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २० ॥

क्षुद्रेभ्यः स्वाहा ॥ २१ ॥ क्षुद्रेभ्यः । स्वाहा ॥ २१ ॥

भाषार्थ—(क्षुद्रेभ्यः) सूक्ष्मज्ञान वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २१ ॥

१७—(विंशतिः) यथा म० १६, चतुर्थीस्थाने प्रथमा, विशेषणपदलोपश्च । पञ्च सूक्ष्मभूतानि, पञ्च स्थूलभूतानि, पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि चेति विंशतिर्विद्यास्ताभ्यः ॥

१८—(महत्काण्डाय) कादिभ्यः कित् । उ० १ । ११५ । कमु कन वा कान्तौ—डप्रत्ययो दीर्घश्च, यद्वा कडि भेदने संरक्षणे च—घञ् । महतां विदुषां संरक्षकाय वेदाय ॥

१९—(तृचेभ्यः) म० १ । त्रयाणां भूतभविष्यद्वर्तमानानां स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

२०—(एकर्चेभ्यः) म० १ । एकस्य परमात्मनः स्तुत्या विद्या येषु वेदेषु तेभ्यः ॥

२१—(क्षुद्रेभ्यः) अ० १९ । २२ । ६ । सूक्ष्मज्ञानयुक्तेभ्यो वेदेभ्यः ॥

यह मन्त्र आ चुका है—अ० १६ । २२ । ६ ॥

एकानृचेभ्यः स्वाहा ॥२२॥ एक-अनृचेभ्यः । स्वाहा ॥ २२ ॥

भाषार्थ—(एकानृचेभ्यः) एक [परमात्मा] की अत्यन्त ही स्तुति योग्य विद्या वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥२२॥

रोहितेभ्यः स्वाहा ॥२३॥ रोहितेभ्यः । स्वाहा ॥ २३ ॥

भाषार्थ—(रोहितेभ्यः) प्रकट होते हुये धार्मिक गुण युक्त [वेदों] के लिये (स्वाहा) (सुन्दर वाणी] हो ॥ २३ ॥

सूर्याभ्यां स्वाहा ॥ २४ ॥ सूर्याभ्याम् स्वाहा ॥ २४ ॥

भाषार्थ—(सूर्याभ्याम्) दो प्रेरकों [परमात्मा और जीवात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २४ ॥

व्रात्याभ्यां स्वाहा ॥ २५ ॥ व्रात्याभ्याम् । स्वाहा ॥ २५ ॥

भाषार्थ—(व्रात्याभ्याम्) मनुष्यों के हितकारी दोनों [बल और पराक्रम] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २५ ॥

प्राजापत्याभ्यां स्वाहा॥२६। प्राजा-पत्याभ्याम् । स्वाहा ॥२६॥

भाषार्थ—(प्राजापत्याभ्याम्) प्रजापति [परमात्मा] को पूजनीय मानने वाले दोनों [कार्य और कारण] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २६ ॥

२२—(एकानृचेभ्यः) म० १ । नास्ति ऋक् स्तुत्या विद्या यस्याः सकाशादिति अनृचः । एकस्य परमेश्वरस्य अतिशयेन स्तुत्यविद्यायुक्तेभ्यो वेदेभ्यः ॥

२३—(रोहितेभ्यः) रुहेरश्च लो वा । उ० ३ । ६४ । रुह प्रादुर्भावे—इतन् । प्रादुर्भावशीलेभ्यो धार्मिकगुणयुक्तेभ्यो वेदेभ्यः ॥

२४—(सूर्याभ्याम्) प्रेरकाभ्यां परमात्मजीवात्मभ्याम् ॥

२५—(व्रात्याभ्याम्) अ० १५ । १ । १ । व्रात—यत् । व्राताः, मनुष्यनाम—निघ० २ । ३ । मनुष्येभ्यो हिताभ्यां बलपराक्रमाभ्याम् ॥

२६—(प्राजापत्याभ्याम्) प्रजापतिः परमात्मा देवता पूजनीयो ययोस्ताभ्यां कार्यकारणाभ्याम् ॥

विषासह्यै स्वाहा ॥ २७ ॥ वि-ससह्यै । स्वाहा ॥ २७ ॥

भाषार्थ—(विषासह्यै) सदा विजयिनी [वेदविद्या] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २७ ॥

मङ्गलिकेभ्यः स्वाहा ॥२८॥ मङ्गलिकेभ्यः । स्वाहा ॥ २८ ॥

भाषार्थ—(मङ्गलिकेभ्यः) मङ्गल वाले [वेदों] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी]हो ॥ २८ ॥

ब्रह्मणे स्वाहा ॥ २९ ॥ ब्रह्मणे । स्वाहा ॥ २९ ॥

भाषार्थ—(ब्रह्मणे) वेदज्ञान के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ २९ ॥

ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान ।
भूतानां ब्रह्मा प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ३०

ब्रह्म-ज्येष्ठा । सम्-भृता । वीर्याणि । ब्रह्म । अग्रे । ज्येष्ठम् । दिवम् । आ । ततान ॥ भूतानाम् । ब्रह्मा । प्रथमः । उत । जज्ञे । तेन । अर्हति । ब्रह्मणा । स्पर्धितुम् । कः ॥ ३० ॥

भाषार्थ—(संभृता) यथावत् भरे हुये (वीर्याणि) वीर कर्म (ब्रह्म—ज्येष्ठा) ब्रह्म [परमात्मा] को ज्येष्ठ [महाप्रधान रखने वाले] हैं, (ज्येष्ठम्) ज्येष्ठ [महाप्रधान] (ब्रह्म) ब्रह्म [परमात्मा] ने (अग्रे) पहिले (दिवम्) ज्ञान को (आ) सब ओर (ततान) फैलाया है । (उत) और (ब्रह्मा) वह ब्रह्मा [सब से बड़ा सर्वजनक परमात्मा] (भूतानाम्) प्राणियों में (प्रथमः)

२७—(विषासह्यै) सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ । वा० पा० ३ । २ । १७१ । षह अभिभवे—कि । अलोपयलोपौ । विविधं पुनः पुनः सोढ्री तस्यै सदाविजयिन्यै वेदविद्यायै ॥

२८—(मङ्गलिकेभ्यः) अत इनिठनौ । पा० ५ । २ । ११५ । मङ्गल—ठन् । मङ्गलयुक्तेभ्यो वेदेभ्यः ॥

२९—(ब्रह्मणे) वेदज्ञानाय ॥

३०—अयं मन्त्रो व्याख्यातः । अ० १६ । २२ । २१ ॥

पहिला (जज्ञे) प्रकट हुआ है, (तेन) इस लिये (ब्रह्मणा) ब्रह्मा [महान् परमात्मा] के साथ (कः) कौन (स्पर्धितुम्) झगड़ने को (अर्हति) समर्थ है ? ॥ ३० ॥

भावार्थ—संसार में सब प्रकार के पराक्रम वा बल सर्वशक्तिमान् जगदीश्वर के सामर्थ्य से हैं, उस महावृद्ध सर्वजनक से तुल्य वा अधिक कोई भी नहीं है। सब मनुष्य उसकी उपासना करके सुख प्राप्त करें ॥ ३० ॥

मन्त्र २९, ३० आ चुके हैं-अ० १९ । २२ । २०, २१ ॥

सूक्तम् २४ ॥

१-८ ॥ ब्रह्मणस्पतिर्देवता ॥ १-३ अनुष्टुप्; ४—६ त्रिष्टुप्; ७ गायत्री; ८ निचृत् त्रिष्टुप् ॥

राजकर्तव्योपदेशः—राजा के कर्तव्य का उपदेश ॥

येन॑ दे॒वं स॑वि॒तारं॒ परि॑ दे॒वा अधा॑रयन् ।
तेने॒मं ब्र॑ह्मणस्पते॒ परि॑ रा॒ष्ट्राय॑ धत्तन ॥ १ ॥

येन॑ । दे॒वम् । स॒वि॒तार॑म् । परि॑ । दे॒वाः । अधा॑रयन् ॥
तेन॑ । इ॒मम् । ब्र॒ह्म॒णः॒ । प॒ते॒ । परि॑ । रा॒ष्ट्राय॑ । ध॒त्त॒न ॥ १ ॥

भाषार्थ—(येन) जिस [नियम] से (देवम्) विजय चाहने वाले (सवितारम्) प्रेरक [पुरुष] को (देवाः) विद्वानों ने (परि) सब ओर से (अधारयन्) धारण किया है [स्वीकार किया है]। (तेन) उस [नियम] से (इमम्) इस [पराक्रमी] को (राष्ट्राय) राज्य के लिये, (ब्रह्मणः पते) हे वेद के रक्षक ! [और तुम सब] (परि) सब ओर से (धत्तन) धारण करो ॥ १ ॥

१—(येन) नियमेन (देवम्) विजिगीषुम् (सवितारम्) प्रेरकम् (परि) सर्वतः (देवाः) विद्वांसः (अधारयन्) धारितवन्तः । स्वीकृतवन्तः (तेन) नियमेन (इमम्) पराक्रमिणम् (ब्रह्मणस्पते) हे वेदस्य रक्षक यूयं च सर्वे (परि) (राष्ट्राय) राज्याय (धत्तन) तस्य तनप् । धारयत । स्वीकुरुत ॥

भावार्थ—जैसे प्रजागण सदा से सदाचारी पराक्रमी पुरुष को राजा बनाते आये हैं, वैसे ही विद्वान् प्रजा के प्रतिनिधि पुरुष प्रजा की सम्मति से राजा बनावें ॥ १ ॥

परीममिन्द्रमायुषे महे क्षत्राय धत्तन ।
यथैनं जरसे नयां ज्योक् क्षत्रेऽधि जागरत् ॥ २ ॥

परि । इमम् । इन्द्रम् । आयुषे । महे । क्षत्राय । धत्तन ॥ यथा । एनम् । जरसे । नयाम् । ज्योक् । क्षत्रे । अधि । जागरत् ॥ २ ॥

भाषार्थ—[हे विद्वानो !] (इमम्) इस (इन्द्रम्) इन्द्र [परम ऐश्वर्यवान् पुरुष] को (महे) बड़े (आयुषे) जीवन के लिये और (क्षत्राय) राज्य के लिये (परि) सब प्रकार (धत्तन) धारण करो । (यथा) जिससे (एनम्) इस [पुरुष] को (जरसे) स्तुति के लिये (नयाम्) मैं ले चलूं, और वह (ज्योक्) बहुत काल तक (क्षत्रे) राज्य के भीतर (अधि) अधिकार पूर्वक (जागरत्) जागता रहे ॥ २ ॥

भावार्थ—जिस प्रजापालक, महाप्रतापी पुरुष को प्रजागण राजा स्वीकार करें, वह अपनी योग्यता से कार्तिमान् होकर प्रजा को सावधानी से सदा पालता रहे ॥ २ ॥

परीमं सोममायुषे महे श्रोत्राय धत्तन ।
यथैनं जरसे नयां ज्योक् श्रोत्रेऽधि जागरत् ॥ ३ ॥

परि । इमम् । सोमम् । आयुषे । महे । श्रोत्राय । धत्तन ॥

२—(परि) सर्वतः (इमम्) (इन्द्रम्) परमैश्वर्यवन्तं पुरुषम् (आयुषे) जीवनाय (महे) महते (क्षत्राय) राज्याय (धत्तन) धारयत (यथा) येन प्रकारेण(एनम्) (जरसे) जॄ स्तुतौ—असुन् । जरतिरर्चतिकर्मा—निघ० ३ । १४ । स्तुत्यै (नयाम्) लेट् । प्रापयेयम् (ज्योक्) चिरकालम् (क्षत्रे) राज्ये (अधि) अधिकृत्य (जागरत्) लेट् । जागृयात् । सावधानो भवेत् ॥

यथा । एनम् । जरसे । नयाम् । ज्योक् । श्रोत्रे । अधि । जागरत् ॥ ३ ॥

भाषार्थ—[हे प्रजागणो !] (इमम्) इस (सोमम्) चन्द्रमा [समान शान्तिकारक पुरुष] को (महे) बड़े (आयुषे) जीवन के लिये और (श्रोत्राय) सुनवायी के लिये (परि) सब प्रकार (धत्तन) धारण करो। (यथा) जिस से (एनम्) इस [पुरुष] को (जरसे) स्तुति के लिये (नयाम्) मैं ले चलूं, और वह (ज्योक्) बहुत काल तक (श्रोत्रे) सुनवायी में (अधि) अधिकार पूर्वक (जागरत्) जागता रहे ॥ ३ ॥

भावार्थ—प्रजागणों को उचित है कि जिस पुरुष को राजा बनावें, उस से सदा प्रीति रक्खें जिस से वह स्तुति प्राप्त करके प्रजा के दुःखों को सदा सुने और दूर करे ॥ ३ ॥

परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय राज्ञे परिधातवा उ ॥४॥

परि । धत्त । धत्त । नः । वर्चसा । इमम् । जरा-मृत्युम् । कृणुत । दीर्घम् । आयुः ॥ बृहस्पतिः । प्र । अयच्छत् । वासः । एतत् । सोमाय । राज्ञे । परि-धातवै । ऊं इति ॥ ४ ॥

भाषार्थ—[हे विद्वानो !] (नः) हमारे लिये (इमम्) इस [पराक्रमी] को (परि धत्त) [वस्त्र] पहिराओ और (वर्चसा) तेज के साथ (धत्त) पुष्ट करो और (जरामृत्युम्) बुढ़ापे [अर्थात् निर्बलता] को मृत्यु समान त्याज्य मानने वाला [अथवा स्तुति के साथ मृत्यु वाला] (दीर्घम्) बड़ी (आयुः) आयु (कृणुत) करो। (बृहस्पतिः) बृहस्पति [बड़े बड़े विद्वानों

३—(सोमम्) चन्द्रसमानशान्तिप्रदं पुरुषम् (श्रोत्राय) श्रवणकरणाय (श्रोत्रे) श्रवणकरणे। अन्यत् पूर्ववत्—म० २ ॥

४—(जरामृत्युम्) जरा निर्बलता मृत्युर्दुःखमिव त्याज्यं यस्य तम् यद्वा जरया स्तुत्या मरणयुक्तम् (सोमाय) सोमः सूर्यः प्रसवनात्—निरु० १४।

के रक्षक पुरोहित] ने (एतत्) यह (वासः) वस्त्र (सोमाय) सूर्यसमान (राज्ञे) राजा को (उ) ही (परिधातवे) धारण करने के लिये (प्र अयच्छत्) दिया है ॥ ४ ॥

भावार्थ—सुनीतिज्ञ पुरुष को मनुष्य वस्त्र आदि पहिना कर राज-सिंहासन पर सुशोभित करें और सब विद्वान् लोग प्रतिष्ठा के साथ उसे राज्य करने के लिये उत्साह देवें ॥ ४ ॥

यह मन्त्र आ चुका है—अथर्व० २ । १३ । २ ॥

जरां सु गच्छ परि धत्स्व वासो भवा गृष्टीनामभिशस्तिपा उं । शतं च जीव शरदः पुरूची रायश्च पोषमुपसंव्ययस्व ॥५॥

जराम् । सु । गच्छ । परि । धत्स्व । वासः । भव । गृष्टी-नाम् । अभिशस्ति-पाः । ऊं इति । शतम् । च । जीव । शरदः । पुरूचीः । रायः । च । पोषम् । उप-संव्ययस्व ॥ ५ ॥

भाषार्थ—[हे राजन् !] (जराम्) स्तुति को (सु) अच्छे प्रकार (गच्छ) प्राप्त हो, (वासः) वस्त्र को (परि धत्स्व) पहिन, (उ) और (गृष्टीनाम्) ग्रहण करने योग्य गौओं की (अभिशस्तिपाः) हिंसा से रक्षा करने वाला (भव) हो। (च) और (पुरूचीः) बहुत पदार्थों से व्याप्त (शतम्) सौ (शरदः) शरद ऋतुओं तक (जीव) तू जीवित रह, (च) और

---

१२ । सूर्यवत्तेजस्विने । अन्यद् व्याख्यातम्—अ० २ । १३ । २ ॥

५—अयं मन्त्रो भेदेन गतः—अ० २ । १३ । ३ (जराम्) स्तुतिम् । जरा स्तुतिर्जरतेः स्तुतिकर्मणः—निरु० १० । ८ (सु) पूजायाम् (गच्छ) प्राप्नुहि (परि धत्स्व) परिधारय (वासः) वस्त्रम् (भव) (गृष्टीनाम्) ग्रह उपादाने क्तिच्, पृषोदरादिरूपम् । ग्राह्यानां गवाम् (अभिशस्तिपाः) हिंसाभयाद् रक्षकः (उ) च (शतम्) बह्वीः (जीव) प्राणान् धारय (शरदः) ऋतुविशेषान् । संवत्स-रान् (पुरूचीः) पुरु+अञ्चु गतिपूजनयोः—क्विन् । बहुविधान् पदार्थान् व्याप्नुवती

(रायः) धन की (पोषम्) पुष्टि [वृद्धि] को (उपसंव्ययस्व) अपने सब ओर धारण कर ॥ ५ ॥

भावार्थ—विद्वान् लोग राजा को अलङ्कृत करते हुये आशीर्वाद दें कि वह गौ आदि उपकारी जीवों की सदा रक्षा करे और धन धान्य बढ़ाकर पूर्ण आयु भोगे ॥ ५ ॥

यह मन्त्र कुछ भेद से आ चुका है—अथर्व० २ । १३ । ३ ॥

परीदं वासो अधिथाः स्वस्तयेऽभूर्वापीनामभिशस्तिपा उ ।
शतं च जीव शरदः पुरूचीर्वसूनि चारुर्वि भजासि जीवन् ॥६॥

परि । इदम् । वासः । अधिथाः । स्वस्तये । अभूः । वापी-नाम् । अभिशस्ति-पाः । ऊं इति ॥ शतम् । च । जीव । शरदः । पुरूचीः । वसूनि । चारुः । वि । भजासि । जीवन् ६॥

भाषार्थ—[हे राजन् !] (इदम्) इस (वासः) वस्त्र को (स्वस्तये) आनन्द बढ़ाने के लिये (परि अधिथाः) तू ने धारण किया है, (उ) और (वापीनाम्) बोने की भूमियों [खेती आदि अथवा बावड़ी, कूप आदि] का (अभिशस्तिपाः) खण्डन से बचाने वाला (अभूः) तू हुआ है । (च) और (पुरूचीः) बहुत पदार्थों से व्याप्त (शतम्) सौ (शरदः) शरद ऋतुओं तक (जीव) तू जीवित रह और (चारुः) शोभायमान होकर (जीवन्) जीता हुआ तू (वसूनि) धनों को (वि भजासि) बांटता रह ॥ ६॥

(रायः) धनस्य (पोषम्) पुष्टिम् । वृद्धिम् (उपसंव्ययस्व) व्येञ् आच्छादने । परिधत्स्व ॥

६—(इदम्) उपस्थितम् (वासः) वस्त्रम् (परि अधिथाः) आच्छादितवानसि (स्वस्तये) आनन्दवर्धनाय (अभूः) (वापीनाम्) वसिवपियजि० । उ० ४ । १२५ । डुवप बीजतन्तुसन्ताने—इञ् प्रत्ययः । वपन्ति बीजं विस्तारयन्ति यत्र तासां भूमीनाम् । कूपादिजलाशयभेदानाम् (अभिशस्तिपाः) खण्डनाद् रक्षकः (वसूनि) धनानि (चारुः) शोभनः (वि भजासि) भजतेर्लेटि आडागमः । विभक्तान् कुरु (जीवन्) प्राणान् धारयन् । अन्यत् पूर्ववत्—म० ५ ॥

भावार्थ—राजा शासनपद ग्रहण करके सब की भलाई का प्रयत्न करता हुआ प्रजा को धनी बना कर कीर्तिमान् होवे ॥ ६ ॥

यह मन्त्र कुछ भेद से आ चुका है—अ० २ । १३ । ३ ॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥ ७ ॥

योगे-योगे । तवः-तरम् । वाजे-वाजे । हवामहे ॥ सखायः । इन्द्रम् । ऊतये ॥ ७ ॥

भाषार्थ—(योगेयोगे) अवसर अवसर पर और (वाजेवाजे) सङ्ग्राम सङ्ग्राम के बीच (तवस्तरम्) अधिक बलवान् (इन्द्रम्) इन्द्र [परमैश्वर्यवान् पुरुष] को (ऊतये) रक्षा के लिये (सखायः) मित्र लोग हम (हवामहे) पुकारते हैं ॥ ७ ॥

भावार्थ—सब प्रजागण विद्वान् पुरुषार्थी राजा के साथ मित्रता करके शत्रु से अपनी रक्षा का उपाय करें ॥ ७ ॥

यह मन्त्र ऋग्वेद में है–१ । ३० । ७, यजु० ११ । १४ तथा साम० पू० २ । ७ । ६ और उ० । १ । २ । ११ और आगे है–अथर्व । २० । २६ । १ ॥

हिरण्यवर्णो अजरः सुवीरो जरामृत्युः प्रजया सं विशस्व । तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ॥ ८ ॥

हिरण्य-वर्णः । अजरः । सु-वीरः । जरा-मृत्युः । प्र-जया । सम् । विशस्व ॥ तत् । अग्निः । आह । तत् । ऊं इति । सोमः । आह । बृहस्पतिः । सविता । तत् । इन्द्रः ॥ ८ ॥

भाषार्थ—[हे पुरुषार्थी !] (हिरण्यवर्णः) कमनीय वा तेजस्वी रूप वाला, (अजरः) फुरतीला [वा अनिर्बल] (सुवीरः) बड़े वीरों

७—(योगेयोगे) प्रत्यवसरम् (तवस्तरम्) तव इति बलनाम–निघ० २ । ६ । अस्मायामेधास्रजो विनिः । पा० ५ । २ । १२१ । तवस्–विनि, ततस्तरप्, विनेश्छान्दसो लोपः । तवस्वितरम् । बलवत्तरम् (वाजेवाजे) प्रतिसंग्रामम् (हवामहे) आह्वयामः (सखायः) वयं सुहृदः सन्तः (इन्द्रम्) परमैश्वर्यवन्तं पुरुषम् (ऊतये) अवनाय । रक्षणाय ॥

८—(हिरण्यवर्णः) हिरण्यः कमनीयस्तेजोमयो वा वर्णो रूपं यस्य सः

वाला, (जरामृत्युः) बुढ़ापे [निर्बलता] को मृत्यु समान त्याज्य मानने वाला [महाबलवान्] तू (प्रजया) प्रजा के साथ (सम्) मिलकर (विशस्व) प्रवेश कर। (तत्) इस बात को (अग्निः) अग्नि [समान तेजस्वी पुरुष] (आह) कहता है, (तत् उ) उस को ही (सोमः) सोम [चन्द्रमा समान पोषक], (तत्) उसी को (बृहस्पतिः) बृहस्पति [बड़ी विद्याओं का स्वामी], (सविता) सब का प्रेरक, (इन्द्रः) इन्द्र [महाप्रतापी पुरुष] (आह) कहता है ॥ ८ ॥

भावार्थ—सब प्रतापी विद्वानों को यह सिद्धान्त मानना चाहिये कि पुरुषार्थी शूर पुरुष से मिलकर प्रजा की उन्नति करें ॥ ८ ॥

इस मन्त्र का दूसरा आधा आचुका है-अ० । ८ । ५ । ५ और तीसरा पाद आया है-अ० १६ । ४ । २ ॥

सूक्तम् २५ ॥

मन्त्रः १ ॥ शूरो देवता ॥ अनुष्टुप् छन्दः ॥

शूरलक्षणोपदेशः-शूरों के लक्षण का उपदेश ॥

अश्रान्तस्य त्वा मनसा युनज्मि प्रथमस्य च । उत्कूलमुद्वहो भवोदुह्य प्रति धावतात् ॥ १ ॥

अश्रान्तस्य । त्वा । मनसा । युनज्मि । प्रथमस्य । च ॥ उत्-कूलम् । उत्-वहः । भव । उत्-उह्य । प्रति । धावतात् ॥ १ ॥

भाषार्थ—[हे शूर !] (अश्रान्तस्य) अनथके (च) और (प्रथमस्य) पहिले पद वाले पुरुष के (मनसा) मन से (त्वा) तुझ को (युनज्मि) मैं संयुक्त

(अजरः) ऋच्छेररः । उ० ३ । १३१ । अज गतिक्षेपणयोः-अरप्रत्ययः । गतिशीलः । जरारहितः (सुवीरः) प्रशस्तवीरोपेतः (जरामृत्युः) जरा निर्बलता मृत्युरिवदुःखप्रदा यस्य सः । महाबलवान् (प्रजया) (सम्) सम्भूय (विशस्व) प्रविश (तत्) वचनम् (अग्निः) अग्निवत्तेजस्वी पुरुषः (आह) ब्रवीति (तदु) तदेव (सोमः) चन्द्रवत्पोषकः (बृहस्पतिः) बृहतीनां विद्यानां स्वामी (सविता) सर्वप्रेरकः (तत्) (इन्द्रः) महाप्रतापी पुरुषः ॥

१—(अश्रान्तस्य) श्रमरहितस्य (त्वा) त्वां पुरुषार्थिनम् (मनसा) अन्तःकरणेन । मननेन (युनज्मि) संयोजयामि (प्रथमस्य) प्रधानपदस्थस्य

करता हूं। (उत्कूलम्) ऊंचे तट की ओर चलकर (उद्वहः) ऊंचा ले चलने वाला (भव) हो, और [मनुष्यों को] (उद्दुह्य) ऊंचे ले जाकर (प्रति) प्रतीति से (धावतात्) दौड़ ॥ १ ॥

भावार्थ—परमेश्वर आज्ञा देता है कि हे मनुष्य तू निरालसी नेता पुरुषों के समान पुरुषार्थ कर, और जैसे चतुर नाविक सावधानी से धार को काटता हुआ जल प्रवाह के ऊपर की ओर यात्रियों को ठिकाने पर उतारता है, वैसे ही पराक्रमी पुरुष सब को कठिनायी से निकाल कर सुख पहुंचावे ॥ १ ॥

सूक्तम् २६ ॥

१–४ ॥ हिरण्यं देवता ॥ १ आर्षी त्रिष्टुप्; २ निचृदार्षी त्रिष्टुप्; ३ अनुष्टुप्; ४ पथ्या पङ्क्तिः ॥

सुवर्णादिधनप्राप्त्युपदेशः–सुवर्ण आदि धन की प्राप्ति का उपदेश ॥

अ॒ग्नेः प्रजा॑तं॒ परि॒ यद्धिर॑ण्यम॒मृतं॑ द॒ध्रे अधि॒ मर्त्ये॑षु । य ए॑नद् वेद॒ स इदे॑नमर्हति ज॒रामृ॑त्युर्भवति॒ यो बि॒भर्ति॑ ॥ १ ॥

अ॒ग्नेः । प्र-जा॑तम् । परि॑ । यत् । हिर॑ण्यम् । अ॒मृत॑म् । द॒ध्रे । अधि॑ । मर्त्ये॑षु ॥ यः । ए॒नत् । वेद॑ । सः । इत् । ए॒नम् । अर्ह॒ति॒ । ज॒रा-मृ॑त्युः । भ॒व॒ति॒ । यः । बि॒भर्ति॑ ॥ १ ॥

भाषार्थ—(यत्) जो (हिरण्यम्) कमनीय सुवर्ण (अग्नेः परि) अग्नि से [पार्थिव अग्नि यद्वा पराक्रम रूप तेज से] (प्रजातम्) उत्पन्न हुआ है, (अमृतम्) [उस] मृत्यु से बचाने वाले [जीवन के साधन] को (मनुष्येषु) मनुष्यों में (अधि) अधिकार पूर्वक (दध्रे) मैं ने धरा है। (यः) जो पुरुष (एनत्) इस [बात] को (वेद) जानता है, (सः) वह (इत्) ही (एनम्)

(च) (उत्कूलम्) यथा भवति तथा। ऊर्ध्वतटं प्रति गत्वा (उद्वहः) उद्वहति उर्ध्वं नयतीति, वह प्रापणे–अच्। उन्नेता। प्रधानः (भव) (उद्दुह्य) उन्नीय मनुष्यान् (प्रति) प्रतीत्या (धावतात्) धाव। शीघ्रं गच्छ ॥

१—(अग्नेः) पार्थिवाग्निसकाशात् पराक्रमरूपप्रकाशाद् वा (प्रजातम्) उत्पन्नं वर्तते (परि) (यत्) हिरण्यम्) हर्यतेः कन्यन् हिर् च। उ० ५। ४४। हर्य गतिकान्त्योः कन्यन्, हिरादेशः। कमनीयं सुवर्णादिधनम् (अमृतम्) न म्रियते यस्मात् तत्। जीवनसाधनं हिरण्यम् (दध्रे) धृञ् धारणे–लिट्। उत्तम–

इस [पदार्थ] के (अर्हति) योग्य होता है, और वह (जरामृत्युः) बुढ़ापे [निर्बलता] को मृत्यु समान [दुखदायी] मानने वाला महाप्रबल (भवति) होता है, (यः) जो [सुवर्ण को] (बिभर्त्ति) धारण करता है ॥ १ ॥

भावार्थ—पृथिवी के साथ सूर्य की किरणों का संयोग होने से सोना उत्पन्न होता है और उसको ईश्वर नियम से मनुष्यों में पराक्रमी ही पाते हैं। मनुष्य इस सिद्धान्त को निश्चय जान कर विद्या द्वारा योग्य होकर सुवर्ण आदि धन प्राप्त करें ॥ १ ॥

यद्धिरण्यं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्व ईषिरे । तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभर्ति ॥ २ ॥

यत् । हिरण्यम् । सूर्येण । सु-वर्णम् । प्रजा-वन्तः । मनवः । पूर्वे । ईषिरे ॥ तत् । त्वा । चन्द्रम् । वर्चसा । सम् । सृजति । आयुष्मान् । भवति । यः । बिभर्ति ॥ २ ॥

भाषार्थ—(सूर्येण) सूर्य द्वारा (सुवर्णम्) सुन्दर रूप वाले (यत्) जिस (हिरण्यम्) कामना योग्य सोने को (प्रजावन्तः) श्रेष्ठ प्रजाओं वाले (पूर्वे) पहिले (मनवः) विचारशील मनुष्यों ने (ईषिरे) पाया था। (तत्) वह (चन्द्रम्) आनन्द दायक सोना (वर्चसा) तेज के साथ (त्वा) तुझ से (संसृजति) संयोग करता है, वह (आयुष्मान्) उत्तम जीवन वाला (भवति) होता है, (यः) जो पुरुष [सोना] (बिभर्ति) रखता है ॥ २ ॥

पुरुषः। अहं धारितवानस्मि (मर्त्येषु) मनुष्येषु (यः) (एतत्) इदं वचनम् (वेद) जानाति (सः) (इति) एव (एनम्) इमं पदार्थम् (अर्हति) धारयितुं योग्यो भवति (जरामृत्युः) जरा निर्बलता मृत्युरिव दुःखप्रदा यस्य सः। महाप्रबलः (भवति) (यः) (बिभर्ति) दधाति हिरण्यम् ॥

२—(यत्) (हिरण्यम्) म० १। कमनीयं सुवर्णम् (सूर्येण) सूर्यकिरणद्वारा (सुवर्णम्) शोभनरूपम् (प्रजावन्तः) श्रेष्ठपुत्रादिप्रजायुक्ताः (मनवः) मननशीला मनुष्याः (पूर्वे) पूर्वजाः (ईषिरे) ईष गतौ—लिट्। प्राप्तवन्तः। (तत्) (त्वा) त्वाम् (चन्द्रम्) आह्लादकं सुवर्णम् (वर्चसा) तेजसा (सं सृजति) संयोजयति (आयुष्मान्) प्रशस्तजीवनयुक्तः (भवति) (यः) पुरुषः (बिभर्त्ति) धारयति हिरण्यम् ॥

भावार्थ—यह जो सोना सूर्य की किरणों द्वारा पृथिवी में उत्पन्न होता है, उसको विद्वानों ने अपने श्रेष्ठ पुत्रादि प्रजाओं के साथ प्रयत्न करके पाया है, वैसे ही सब मनुष्य पुरुषार्थ करके सुवर्ण आदि धन की प्राप्ति से सुखी होवें ॥ २ ॥

आयुषे त्वा वर्चसे त्वौजसे च बलाय च । यथा हिरण्यतेजसा विभासासि जनाँ अनु ॥ ३ ॥

आयुषे । त्वा । वर्चसे । त्वा । ओजसे । च । बलाय । च ॥ यथा । हिरण्य-तेजसा । वि-भासासि । जनान् । अनु ॥ ३ ॥

भाषार्थ—[हे मनुष्य !] (त्वा) तुझ से (आयुषे) जीवन के लिये और (वर्चसे) प्रताप के लिये (च) और (त्वा) तुझ से (बलाय) बल के लिये (च) और (ओजसे) पराक्रम के लिये [वह सोना संयोग करता है—म० २] । (यथा) जिस से कि (हिरण्यतेजसा) सुवर्ण के तेज से (जनान् अनु) मनुष्यों में (विभासासि) तू चमकता रहे ॥ ३ ॥

भावार्थ—मनुष्यों को योग्य है कि पुरुषार्थ से सुवर्ण आदि धन प्राप्त करके मनुष्यों में प्रतापी और यशस्वी होवें ॥ ३ ॥

यद् वेद राजा वरुणो वेद देवो बृहस्पतिः । इन्द्रो यद् वृत्रहा वेद तत् त आयुष्यं भुवत् तत् ते वर्चस्यं भुवत् ॥ ४ ॥

यत् । वेद । राजा । वरुणः । वेद । देवः । बृहस्पतिः ॥ इन्द्रः यत् । वृत्र-हा । वेद । तत् । ते । आयुष्यम् । भुवत् । तत् । ते । वर्चस्यम् । भुवत् ॥ ४ ॥

३—(आयुषे) जीवनाय (त्वा) त्वाम् । तच्चन्द्रं संसृजतीत्यनुवर्तते—म० २ (वर्चसे) प्रतापाय (त्वा) (ओजसे) पराक्रमाय (बलाय) (यथा) येन प्रकारेण (हिरण्यतेजसा) सुवर्णस्य प्रतापेन (विभासासि) भास दीप्तौ—लेट् आडागमः । विशेषेण भासेथाः । दीप्यस्व (जनान्) मनुष्यान् (अनु) प्रति ॥

भाषार्थ—(यत्) जिस [सुवर्ण] को (राजा) ऐश्वर्यवान् (वरुणः) श्रेष्ठ पुरुष (वेद) जानता है, और [जिसको] (देवः) विद्वान् (बृहस्पतिः) बृहस्पति [बड़े ज्ञानों का रक्षक पुरुष] (वेद) जानता है। (यत्) जिस को (वृत्रहा) शत्रुनाशक (इन्द्रः) इन्द्र [महाप्रतापी पुरुष] (वेद) जानता है, (तत्) वह (ते) तेरे लिये (आयुष्यम्) आयु बढ़ाने वाला (भुवत्) होवे, (तत्) वह (ते) तेरे लिये (वर्चस्यम्) तेज बढ़ाने वाला (भुवत्) होवे ॥४॥

भावार्थ—मनुष्य विद्वान् पराक्रमियों के समान सुवर्ण के प्रभाव को जानकर उसे यथावत् प्राप्त करे और धर्म के साथ उसका प्रयोग करके यशस्वी और तेजस्वी होवे ॥ ४ ॥

॥ इति तृतीयोऽनुवाकः ॥

अथ चतुर्थोऽनुवाकः ॥

सूक्तम् २७ ॥

१—१५ ॥ प्रजापतिर्देवता ॥ १, २, ५-८ अनुष्टुप्; ३, १० आर्ची त्रिष्टुप्; ४ आर्ची पङ्क्तिः; ९ त्रिष्टुप्; ११ निचृत् साम्नी त्रिष्टुप्; १२ भुरिक् साम्नी त्रिष्टुप्; १३ साम्नी त्रिष्टुप्; १४ निचृदनुष्टुप्; १५ अतिशक्वरी ॥

आशीर्वचनोपदेशः—आशीर्वाद देने का उपदेश ॥

गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः। वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रियैः ॥ १ ॥

गोभिः। त्वा। पातु। ऋषभः। वृषा। त्वा। पातु। वाजिभिः॥ वायुः। त्वा। ब्रह्मणा। पातु। इन्द्रः। त्वा। पातु। इन्द्रियैः ॥ १ ॥

४—(यत्) हिरण्यम् (वेद) जानाति (राजा) ऐश्वर्यवान् (वरुणः) श्रेष्ठपुरुषः (वेद) (देवः) विद्वान् (बृहस्पतिः) बृहतां ज्ञानानां रक्षकः (इन्द्रः) महाप्रतापी पुरुषः (यत्) (वृत्रहा) शत्रुनाशकः (वेद) (तत्) हिरण्यम् (ते) तुभ्यम् (आयुष्यम्) आयुषे चिरकालजीवनाय हितम्। आयुष्कारि (भुवत्) लेटि रूपम्। भवेत् (तत्) (ते) (वर्चस्यम्) वर्चसे हितम्। तेजस्कारि (भुवत्) ॥

भाषार्थ—[हे मनुष्य !] (ऋषभः) सर्वदर्शक परमेश्वर (गोभिः) गौओं के साथ (त्वा) तुझे (पातु) बचावे, (वृषा) वीर्यवान् [परमेश्वर] (वाजिभिः) फुरतीले घोड़ों के साथ (त्वा) तुझे (पातु) बचावे। (वायुः) सर्वत्रगामी [परमेश्वर] (ब्रह्मणा) बढ़ते हुये अन्न के साथ (त्वा) तुझे (पातु) बचावे, (इन्द्रः) परम ऐश्वर्यवान् [जगदीश्वर] (इन्द्रियैः) परम ऐश्वर्य के व्यवहारों के साथ (त्वा) तुझे (पातु) बचावे ॥ १ ॥

भावार्थ—मनुष्य परमात्मा के श्रेष्ठ गुणों का चिन्तन करके अनेक पुरुषार्थों के साथ रक्षा करें ॥ १ ॥

सोमस्त्वा पात्वोषधीभिर्नक्षत्रैः पातु सूर्यः। माद्भ्यस्त्वा चन्द्रो वृत्रहा वातः प्राणेन रक्षतु ॥ २ ॥

सोमः। त्वा। पातु। ओषधीभिः। नक्षत्रैः। पातु। सूर्यः। मात्-भ्यः। त्वा। चन्द्रः। वृत्र-हा। वातः। प्राणेन। रक्षतु ॥ २ ॥

भाषार्थ—(सोमः) सोम रस (ओषधीभिः) ओषधियों के साथ (त्वा) तुझे (पातु) बचावे, (सूर्यः) सब का चलाने वाला सूर्य (नक्षत्रैः) नक्षत्रों के साथ (पातु) बचावे। (वृत्रहा) अन्धकार नाशक (चन्द्रः) आनन्द प्रद चन्द्रमा (माद्भ्यः) महीनों के लिये और (वातः) पवन (प्राणेन) प्राण [जीवन सामर्थ्य] के साथ (त्वा) तुझे (पातु) बचावे ॥ २ ॥

१—(गोभिः) धेनुभिः (त्वा) (पातु) (ऋषभः) ऋषिवृषिभ्यां कित्। उ० ३। १२३। ऋष गतौ दर्शने च—अभच्, कित्। ऋषिर्दर्शनात्—निरु० २। ११। सर्वदर्शकः परमेश्वरः (वृषा) वीर्यवान् (त्वा) (पातु) (वाजिभिः) वेगवद्भिरश्वैः (वायुः) सर्वत्रगामी परमेश्वरः (त्वा) (ब्रह्मणा) प्रवृद्धेनान्नेन—निघ० २। ७ (पातु) (इन्द्रः) परमैश्वर्यवान्। जगदीश्वरः (पातु) (इन्द्रियैः) परमैश्वर्यव्यवहारैः ॥

२—(सोमः) सोमरसः (त्वा) (पातु) (ओषधीभिः) (नक्षत्रैः) (पातु) (सूर्यः) लोकानां प्रेरक आदित्यः (माद्भ्यः) मासानां हिताय (त्वा) (चन्द्रः) आह्लादकश्चन्द्रमाः (वृत्रहा) शत्रुनाशकः (वातः) पवनः (प्राणेन) जीवनसामर्थ्येन (रक्षतु) ॥

भावार्थ—मनुष्य ओषधि आदि संसार के सब पदार्थों से उपकार लेकर सुखी होवें ॥ २ ॥

तिस्रो दिव॑स्तिस्रः पृ॑थि॒वीस्त्रीण्य॒न्तरि॑क्षाणि च॒तुरः॑ समु॒द्रान्। त्रि॒वृत॑ं॒ स्तोम॑ं त्रि॒वृत॒ आप॑ आहु॒स्तास्त्वा॑ रक्षन्तु त्रि॒वृता॑ त्रि॒वृद्भिः॑ ॥ ३ ॥

ति॒स्रः। दिवः॑। ति॒स्रः। पृ॒थि॒वीः। त्रीणि॑। अ॒न्तरि॑क्षाणि। च॒तुरः॑। स॒मु॒द्रान्॥ त्रि॒-वृत॑म्। स्तोम॑म्। त्रि॒-वृतः॑। आपः॑। आ॒हुः॒। ताः। त्वा॒। र॒क्ष॒न्तु॒। त्रि॒-वृता॑। त्रि॒वृत्-भिः॑ ॥ ३ ॥

भाषार्थ—[उत्कृष्ट, निकृष्ट, मध्यम होने से] (दिवः) प्रकाशमान पदार्थों को (तिस्रः) तीन, (पृथिवीः) पृथिवी के देशों को (तिस्रः) तीन, (अन्तरिक्षाणि) अन्तरिक्ष लोकों को (त्रीणि) तीन, और (समुद्रान्) आत्माओं को [धर्म, अर्थ, काम, मोक्ष के लिये पुरुषार्थी होने से] (चतुरः) चार, (स्तोमम्) स्तुति योग्य वेद को (त्रिवृतम्) तीन [कर्म, उपासना, ज्ञान] में वर्तमान, (त्रिवृतः) तीन [कर्म उपासना, ज्ञान में वर्तमान रहने वाले (आपः) आप्त प्रजा लोग (आहुः) बताते हैं, (त्रिवृता) तीन [कर्म, उपासना, ज्ञान] में वर्तमान (ताः) वे [प्रजायें] (त्वा) तुझ को (त्रिवृद्भिः) तीन [कर्म, उपासना और ज्ञानरूप] वृत्तियों के साथ (रक्षन्तु) बचावें ॥ ३ ॥

३—(तिस्रः) उत्कृष्टनिकृष्टमध्यमभेदेन त्रिसंख्याकाः (दिवः) प्रकाशमान् पदार्थान् (तिस्रः) त्रिसंख्याकाः (पृथिवीः) पृथिवीदेशान् (त्रीणि) त्रिसंख्याकानि (अन्तरिक्षाणि) अन्तरिक्षस्थलोकान् (चतुरः) धर्मार्थकाममोक्षेभ्यः पुरुषार्थकरणात् चतुःसंख्याकान् (समुद्रान्) समुद्र आत्मा—निरु० १४। १६। जीवात्मनः (त्रिवृतम्) वृतु वर्तने—क्विप्। त्रिषु कर्मोपासनाज्ञानेषु वर्त्तमानम् (स्तोमम्) स्तुत्यं वेदम् (त्रिवृतः) त्रिषु कर्मोपासनाज्ञानेषु वर्तमानाः (आपः) आप्ताः प्रजाः—दयानन्दभाष्ये, यजु० ६। २७ (आहुः) कथयन्ति (ताः) प्रजाः (त्वा) (रक्षन्तु) (त्रिवृता) सुपां सुलुक्० । पा० ७। १। ३९। प्रथमाविभक्तेराकारादेशः । त्रिवृतः। त्रिषु कर्मोपासनाज्ञानेषु वर्तमानाः (त्रिवृद्भिः) तिसृभिः कर्मोपासनाज्ञानरूपाभिर्वृत्तिभिः सह ॥

भावार्थ—जो मनुष्य संसार के पदार्थों के तत्त्वों को जानकर पुरुषार्थ करते हैं वे सदा सुरक्षित रहते हैं ॥ ३ ॥

त्रीन्नाकांस्त्रीन् समुद्रांस्त्रीन् ब्रध्नांस्त्रीन् वैष्टपान् । त्रीन् मातरिश्वनस्त्रीन्त्सूर्यान् गोप्तॄन् कल्पयामि ते ॥ ४ ॥

त्रीन् । नाकान् । त्रीन् । समुद्रान् । त्रीन् । ब्रध्नान् । त्रीन् । वैष्टपान् ॥ त्रीन् । मातरिश्वनः । त्रीन् । सूर्यान् । गोप्तॄन् । कल्पयामि । ते ॥ ४ ॥

भाषार्थ—[हे मनुष्य !] (त्रीन्) तीन [आत्मा, मन और शरीर सम्बन्धी] (नाकान्) सुखों को, (त्रीन्) तीन [ऊपर, नीचे और मध्य में वर्तमान] (समुद्रान्) अन्तरिक्षों को, (त्रीन्) तीन [कर्म, उपासना और ज्ञान] (ब्रध्नान्) बड़े व्यवहारों को, (त्रीन्) तीन [स्थान, नाम और जन्म वा जाति वाले] (वैष्टपान्) संसार निवासियों को, (त्रीन्) तीन [ऊपर नीचे और तिरछे चलने वाले] (मातरिश्वनः) आकाशगामी पवनों को, और (त्रीन्) तीन [वृष्टि, अन्नोत्पत्ति और पुष्टि करने वाले] (सूर्यान्) सूर्य [के तापों] को (ते) तेरे (गोप्तॄन्) रक्षक (कल्पयामि) मैं बनाता हूं ॥ ४ ॥

भावार्थ—जो मनुष्य पदार्थों के तत्त्वों को यथावत् समझकर उपयोग में लाते हैं, वे उन्नति करते हैं ॥ ४ ॥

मन्त्र ३, ४ का मिलान करो—अ० ५ । २८ । १४, १५ ॥

४—(त्रीन्) आत्ममनःशरीरसम्बन्धिनः (नाकान्) आनन्दान् (त्रीन्) ऊर्ध्वाधोमध्यवर्तमानान् (समुद्रान्) अन्तरिक्षदेशान् (त्रीन्) कर्मोपासनाज्ञानाख्यान् (ब्रध्नान्) बन्धेर्ब्रधिबुधी च । उ० ३ । ५ । बन्ध बन्धने-नक्, ब्रधादेशः। ब्रध्नो महन्नाम—निघ० ३ । ३ । महतो व्यवहारान् (त्रीन्) स्थाननामजन्माख्याकान् (वैष्टपान्) विटपविष्टपविशिपोलपाः । उ० ३ । १४५ । विश प्रवेशने—कपप्रत्ययः, तुडागमः । विष्टप—अण् । विष्टपेषु भुवनेषु निवासकान् (त्रीन्) ऊर्ध्वाधस्तिर्यग्गतीन् (मातरिश्वनः) मातरि आकाशे श्वयन्ति गच्छन्ति ये तान् पवनान् (त्रीन्) वृष्ट्यन्नोत्पत्तिपुष्टिकारकान् (सूर्यान्) सूर्यप्रदेशान् (गोप्तॄन्) रक्षकान् (कल्पयामि) रचयामि (ते) तव ॥

घृतेनं त्वा समुंक्षाम्यग्न आज्येन वर्धयंन्। अग्नेश्चन्द्रस्य सूर्यस्य मा प्राणं मायिनों दभन् ॥ ५ ॥

घृतेन । त्वा । सम् । उक्षामि । अग्ने । आज्येन । वर्धयंन् ॥ अग्नेः । चन्द्रस्यं । सूर्यस्य । मा । प्राणम् । मायिनः । दभन् ॥५

भाषार्थ—(अग्ने) हे अग्नि [के समान तेजस्वी विद्वान् !] [जैसे अग्नि को] (आज्येन) घृत से (वर्धयन्) बढ़ाता हुआ मैं (त्वा) तुझे (घृतेन) ज्ञान प्रकाश से (सम्) यथावत् (उक्षामि) बढ़ाता हूं। (अग्नेः) अग्नि के, (चन्द्रस्य) चन्द्रमा के और (सूर्यस्य) सूर्य के (प्राणम्) प्राण [जीवन सामर्थ्य] को (मायिनः) छली लोग (मा दभन्) नहीं नाश करें ॥५॥

भावार्थ—सब मनुष्य विद्या से पूर्ण होकर और अग्नि, चन्द्रमा और सूर्य आदि की जीवन शक्तियों से यथावत् उपकार लेकर शत्रुओं को वश में करें ॥ ५ ॥

मा वः प्राणं मा वोऽपानं मा हरों मायिनों दभन् । भ्राजन्तो विश्ववेदसो देवा दैव्येन धावत ॥ ६ ॥

मा । वः। प्राणम् । मा । वः । अपानम् । मा । हरः। मायिनः। दभन् ॥ भ्राजन्तः। विश्व-वेदसः। देवाः। दैव्येन । धावत ॥६॥

भाषार्थ—[हे मनुष्यो !] (मा) न तो (वः) तुम्हारे (प्राणम्) श्वास को, (मा) न (वः) तुम्हारे (अपानम्) प्रश्वास को, और (मा)

५—(घृतेन) ज्ञानप्रकाशेन (त्वा) त्वाम् (सम्) सम्यक् (उक्षामि) उक्षण उक्षतेर्वृद्धिकर्मणः—निरु० १२ । ६ । वर्धयामि (अग्ने) हे अग्निवत्तेजस्विन् विद्वन् (आज्येन) सर्पिषा । होमद्रव्येण (वर्धयन्) प्रवृद्धं कुर्वन्—अग्निं यथा (अग्नेः) पावकस्य (चन्द्रस्य) चन्द्रलोकस्य (सूर्यस्य) भास्करस्य (प्राणम्) जीवनसामर्थ्यम् (मायिनः) छलिनः (मा दभन्) दम्भु दम्भे—लुङ्। मा हिंसन्तु नाशयन्तु ॥

६—(मा) निषेधे (वः) युष्माकम् (प्राणम्) श्वासम् (मा) (वः)

न (हरः) तेज को (मायिनः) छली लोग (दभन्) नष्ट करें। (भ्राजन्तः) चमकते हुये, (विश्ववेदसः) सब प्रकार धन वाले, (देवाः) विद्वानो तुम (दैव्येन) विद्वानों के योग्य कर्म के साथ (धावत) धावा करो ॥ ६ ॥

भावार्थ—मनुष्यों को विद्वानों के समान दूरदर्शी होकर शत्रु लोग रोकने चाहियें कि जिससे वे किसी प्रकार हानि न पहुंचावें ॥ ६ ॥

प्राणेनाग्निं सं सृजति वातः प्राणेन संहितः ।
प्राणेन विश्वतोमुखं सूर्यं देवा अजनयन् ॥ ७ ॥

प्राणेन । अग्निम् । सम् । सृजति । वातः । प्राणेन । सम्-हितः ॥
प्राणेन । विश्वतः-मुखम् । सूर्यम् । देवाः । अजनयन् ॥ ७ ॥

भाषार्थ—वह [परमात्मा] (प्राणेन) प्राण [जीवन सामर्थ्य] के साथ (अग्निम्) अग्नि को (सं सृजति) संयुक्त करता है, (वातः) वायु (प्राणेन) प्राण [जीवन सामर्थ्य] के साथ (संहितः) मिला हुआ है। (प्राणेन) प्राण [जीवन सामर्थ्य] के साथ (विश्वतोमुखम्) सब ओर मुख वाले (सूर्यम्) सूर्य को (देवाः) दिव्य नियमों ने (अजनयन्) उत्पन्न किया है ॥ ७ ॥

भावार्थ—जैसे परमात्मा ने अग्नि आदि में प्राण वा जीवन सामर्थ्य देकर उपयोगी बनाया है, वैसे ही मनुष्य अपनी आत्मिक और शारीरिक शक्तियों द्वारा जीवन को उपयोगी बनावें ॥ ७ ॥

(अपानम्) प्रश्वासम् (हरः) तेजः (मायिनः) छलिनः (मा दभन्) मा नाशयन्तु (भ्राजन्तः) दीप्यमानाः (विश्ववेदसः) सर्वधनाः (देवाः) विद्वांसः (दैव्येन) देव—यज्ञ । विद्वद्योग्यकर्मणा (धावत) शीघ्रं गच्छत ॥

७—(प्राणेन) जीवनसामर्थ्येन (अग्निम्) पावकम् (सं सृजति) संयोजयति स परमेश्वरः (वातः) वायुः (प्राणेन) जीवनसामर्थ्येन (संहितः) संघीकृतः (प्राणेन) (विश्वतोमुखम्) सर्वतो मुखमिवद्रष्टारम् (सूर्यम्) (देवाः) दिव्यानियमाः (अजनयन्) उदपादयन् ॥

आयुषायुःकृतां जीवायुष्मान् जीव मा मृथाः । प्राणेनात्मन्वतां जीव मा मृत्योरुदगा वशम् ॥ ८ ॥

आयुषा । आयुः-कृताम् । जीव । आयुष्मान् । जीव । मा । मृथाः ॥ प्राणेन । आत्मन्-वताम् । जीव । मा । मृत्योः । उत् । अगाः । वशम् ॥ ८ ॥

भाषार्थ—(आयुःकृताम्) जीवन बनाने वाले [विद्वानों] के (आयुषा) जीवन के साथ (जीव) तू जीवित रह, (आयुष्मान्) उत्तम जीवन वाला होकर (जीव) तू जीवित रह, (मा मृथाः) तू मत मरे । (आत्मन्वताम्) आत्मा वालों के (प्राणेन) प्राण [जीवन सामर्थ्य] से (जीव) तू जीवित रह (मृत्योः) मृत्यु के (वशम्) वश में (मा उत् अगाः) मत जा ॥ ८ ॥

भावार्थ—मनुष्यों को योग्य है कि बड़े जितेन्द्रिय पुरुषार्थी महात्माओं के समान अपने जीवन को पुरुषार्थी बनाकर यशस्वी होवें ॥ ८ ॥

देवानां निहितं निधिं यमिन्द्रोऽन्वविन्दत् पथिभिर्देवयानैः । आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ॥ ९ ॥

देवानाम् । नि-हितम् । नि-धिम् । यम् । इन्द्रः । अनु-अविन्दत् । पथि-भिः । देव-यानैः ॥ आपः । हिरण्यम् । जुगुपुः । त्रिवृत्-भिः । ताः । त्वा । रक्षन्तु । त्रि-वृता । त्रिवृत्-भिः ॥ ९ ॥

८—(आयुषा) जीवनेन (आयुःकृताम्) ब्रह्मचर्यादितपसा आयुषोऽलङ्कुर्वताम् (जीव) प्राणान् धारय (आयुष्मान्) उत्तमजीवनयुक्तः सन् (जीव) (मा मृथाः) प्राणान् मा त्यज (प्राणेन) जीवनसामर्थ्येन (आत्मन्वताम्) अ० ४ । १० । ७ । आत्मन्—मतुप्, नुडागमः । सात्मकानां दृढजीवनवताम् (मृत्योः) मरणस्य (मा उत् अगाः) इण् गतौ—लुङ् । मा प्राप्नुहि (वशम्) अधीनत्वम् ॥

भाषार्थ—(देवानाम्) विद्वानों के (निहितम्) धरे हुये (यम्) जिस (निधिम्) निधि [रत्नों के कोश] को (इन्द्रः) इन्द्र [बड़े ऐश्वर्यवान् पुरुष] ने (देवयानैः) विद्वानों के चलने योग्य (पथिभिः) मार्गों से (अन्वविन्दत) खोज कर पाया है। (आपः) आप्त प्रजाओं ने (हिरण्यम्) उस तेज [वा सुवर्ण] को (त्रिवृद्भिः) तीन [कर्म, उपासना ज्ञानरूप] वृत्तियों के साथ (जुगुपुः) रक्षित किया है, (त्रिवृता) तीन [कर्म, उपासना ज्ञान] में वर्तमान (ताः) वे [प्रजायें] (त्वा) तुझ को (त्रिवृद्भिः) तीन [कर्म, उपासना, ज्ञानरूप] वृत्तियों के साथ (रक्षतु) बचावें ॥ ९ ॥

भावार्थ—जो पुरुष शूर महात्माओं के समान वेदोक्त मार्ग पर चलकर धर्म के साथ तेज वा सुवर्ण आदि धन प्राप्त करते हैं, प्रजागण उन धीर वीरों को प्रिय जानकर सदा उन की रक्षा करते रहें ॥ ९ ॥

त्रयस्त्रिंशद् देवतास्त्रीणि च वीर्याणि प्रियायमाणा जुगुपुरप्स्व-न्तः। अस्मिंश्चन्द्रे अधि यद्धिरण्यं तेनायं कृणवद् वीर्याणि ॥ १० ॥

त्रयः-त्रिंशत्। देवताः। त्रीणि। च। वीर्याणि। प्रिय-यमाणाः। जुगुपुः। अप्-सु। अन्तः॥ अस्मिन्। चन्द्रे। अधि। यत्। हिरण्यम्। तेन। अयम्। कृणवत्। वीर्याणि ॥ १० ॥

भाषार्थ—(प्रियायमाणाः) प्रिय मानते हुये (त्रयस्त्रिंशत्) तेतीस [८ वसु अर्थात् अग्नि, पृथिवी, वायु, अन्तरिक्ष, आदित्य, द्यौः वा प्रकाश, चन्द्रमा और नक्षत्र—११ रुद्र अर्थात् प्राण, अपान, व्यान, समान, उदान, नाग,

---

९—(देवानाम्) विदुषाम् (निहितम्) स्थापितम् (निधिम्) रत्नसंग्रहम् (यम्) (इन्द्रः) परमैश्वर्यवान् पुरुषः (अन्वविन्दत) अन्विष्य लब्धवान् (पथिभिः) मार्गैः (देवयानैः) विद्वद्भिर्गन्तव्यैः (आपः) म० ३। आप्ताः प्रजाः (हिरण्यम्) तत्तेजः सुवर्णं वा (जुगुपुः) ररक्षुः। अन्यद् पूर्ववत् म० ३॥

१०—(त्रयस्त्रिंशत्) अथर्व० ६। १३९। १। अष्टौ वसवो यथा, अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चेति,

कूर्म, कृकल, देवदत्त, धनञ्जय यह दस प्राण और ग्यारहवां जीवात्मा,—१२ महीने-१ इन्द्र अर्थात् बिजुली-एक प्रजापति वा यज्ञ] (देवताः) देवताओं (च) और (त्रीणि) तीन [कायिक, वाचिक और मानसिक] (वीर्याणि) वीर कर्मों ने (अप्सु अन्तः) आप्त प्रजाओं के बीच (अस्मिन्) इस (चन्द्रे) आनन्द देने वाले [जीवात्मा] में (अधि) अधिकार पूर्वक (यत्) जिस (हिरण्यम्) कमनीय तेज को (जुगुपुः) रक्षित किया है, (तेन) उसी [तेज] से (अयम्) यह [जीवात्मा] (वीर्याणि) वीर कर्मों को (कृणवत्) करे ॥ १० ॥

भावार्थ—परमात्मा ने वसु आदि तेतीस देवताओं शारीरिक आदि शक्तियों और पूर्व संस्कारों द्वारा मनुष्यों में जो तेज स्थापित किया है, मनुष्य उस तेज को विद्या आदि द्वारा प्रकाशित करके पराक्रम करता रहे ॥ १० ॥

ये दे॑वा दि॒व्ये॑का॑दश॒ स्थ ते दे॑वासो ह॒विरि॒दं जु॑षध्वम् ॥११॥

ये । दे॒वाः । दि॒वि । एका॑दश । स्थ । ते । दे॒वा॒सः । ह॒विः । इ॒दम् । जु॒ष॒ध्व॒म् ॥ ११ ॥

ये दे॑वा अ॒न्तरि॑क्ष॒ एका॑दश॒ स्थ ते दे॑वासो ह॒विरि॒दं जु॑षध्वम्॥१२

ये । दे॒वाः । अ॒न्तरि॑क्षे । एका॑दश । स्थ । ते । दे॒वा॒सः । ह॒विः । इ॒दम् । जु॒ष॒ध्व॒म् ॥ १२ ॥

ये दे॑वाः पृ॒थि॒व्यामेका॑दश॒ स्थ ते दे॑वासो ह॒विरि॒दं जु॑षध्वम्॥१३

एकादश रुद्रा यथा प्राणापानव्यानसमानोदाननागकूर्मकृकलदेवदत्तधनञ्जया इति दश प्राणा आत्मैकादशः,द्वादश मासाः, इन्द्रश्च प्रजापतिश्चेति (देवताः) देवाः (त्रीणि) कायिकवाचिकमानसानि (वीर्याणि) वीरकर्माणि । सामर्थ्यानि (प्रियायमाणाः) कर्तुः क्यङ् सलोपश्च । पा०३ । १ । ११ । प्रिय—क्यङ् । प्रिय इवाचरतीति प्रियायते, शानच् । प्रिया इवाचरन्त्यः (जुगुपुः) ररक्षुः (अप्सु) म० ३ । आप्तासु प्रजासु (अन्तः) मध्ये (अस्मिन्) समीपवर्तिनि (चन्द्रे) आह्लादके जीवात्मनि (अधि) अधिकारपूर्वकम् (यत्) (हिरण्यम्) कमनीयं तेजः (तेन) तेजसा (अयम्) जीवात्मा (वीर्याणि) ॥

ये । देवाः । पृथिव्याम् । एकादश । स्थ । ते । देवासः । हविः । इदम् । जुषध्वम् ॥ १३ ॥

भाषार्थ—(देवाः) हे विद्वानो ! (ये) जो तुम (दिवि) सूर्य लोक में (एकादश) ग्यारह [प्राण, अपान, व्यान, समान, उदान, नाग, कूर्म, कृकल, देवदत्त, धनञ्जय, दस प्राण और ग्यारहवें जीवात्मा के समान] (स्थ) हो, (देवासः) हे विद्वानो ! (ते) वे तुम (इदम्) इस (हविः) ग्रहण योग्य वस्तु [वचन] को (जुषध्वम्) सेवन करो ॥ ११ ॥

भावार्थ—(देवाः) हे विद्वानो ! (ये) जो तुम (अन्तरिक्षे) अन्तरिक्ष में (एकादश) ग्यारह [श्रोत्र, त्वचा, चक्षु, जिह्वा, नासिका, वाणी, हाथ, पांव, गुदा, लिङ्ग और मन—इन ग्यारह के समान] (स्थ) हो, (देवासः) हे विद्वानो ! (ते) वे तुम (इदम्) इस (हविः) ग्रहण योग्य वस्तु [वचन] को (जुषध्वम्) सेवन करो ॥ १२ ॥

भाषार्थ—(देवाः) हे विद्वानो ! (ये) जो तुम (पृथिव्याम्) पृथिवी पर (एकादश) ग्यारह [पृथिवी, जल, अग्नि, पवन आकाश, आदित्य, चन्द्रमा, नक्षत्र, अहङ्कार, महत्तत्त्व और प्रकृति—इन ग्यारह के समान] (स्थ) हो, (देवासः) हे विद्वानो ! (ते) वे तुम (इदम्) इस (हविः) ग्रहण योग्य वस्तु [वचन] को (जुषध्वम्) सेवन करो ॥ १३ ॥

भावार्थ—जैसे सूर्यादि लोकों में सब पदार्थ स्थित रहकर अपना अपना कर्तव्य कर रहे हैं, वैसे ही मनुष्यों को ईश्वर और वेद में दृढ़ रहकर अपने कर्तव्य में परम निष्ठा रखनी चाहिये ॥ ११—१३ ॥

११—(ये) ये यूयम् (देवाः) हे विद्वांसः (दिवि) सूर्यलोके (एकादश) दयानन्दभाष्ये, यजु० ७।१६। प्राणापानव्यानसमानोदाननागकूर्मकृकलदेवदत्तधनञ्जया इति दश प्राणा आत्मैकादश—इत्येतैः समानाः (स्थ) भवथ (ते) ते यूयम् (देवासः) हे विद्वांसः (हविः) ग्राह्यं वस्तु । वचनम् (इदम्) (जुषध्वम्) सेवध्वम् ॥

१२—(अन्तरिक्षे) मध्यलोके (एकादश) यजु० ७।१६। श्रोत्रत्वक्चक्षूरसनाघ्राणवाक्पाणिपादपायूपस्थमनांसि—इत्येभिः समानाः । अन्यत् पूर्ववत् ॥

१३—(पृथिव्याम्) भूम्याम् (एकादश) यजु० ७।१६। पृथिव्यप्तेजोवाय्वाकाशादित्यचन्द्रनक्षत्राहङ्कारमहत्तत्त्वप्रकृतय इत्येभिः समानाः । अन्यत् पूर्ववत् ॥

मन्त्र ११—१३ कुछ भेद से ऋग्वेद में हैं—१ । १३९ । ११ और यजुर्वेद ७ । १९ ॥

असुपत्नं पुरस्तात् पुश्चान्नो अभयं कृतम् ।
सविता मा दक्षिणत उत्तुरान्मा शचीपतिः ॥ १४ ॥

असुपत्नम् । पुरस्तात् । पुश्चात् । नः । अभयम् । कृतम् ॥
सविता । मा । दक्षिणतः । उत्तुरात् । मा । शची-पतिः ॥१४॥

भाषार्थ—(नः) हमारे लिये (मा) मुझ को (पुरस्तात्) सामने से [वा पूर्व दिशा से], (पश्चात्) पीछे से [वा पश्चिम से], (दक्षिणतः) दाहिनी ओर [वा दक्खिन]से और (मा) मुझको (उत्तरात्) बाईं ओर से [वा उत्तर से] (सविता) सर्वप्रेरक राजा और (शचीपतिः) वाणियों वा कर्मों का पालने वाला [मन्त्री], तुम दोनों (असपत्नम्) शत्रुरहित और (अभयम्) निर्भय (कृतम्) करो ॥ १४ ॥

भावार्थ—जहां पर राजा और मन्त्री, अपनी वाणी और कर्म में पक्के होते हैं, उस राज्य में प्रजागण शत्रुओं से सुरक्षित रहते हैं ॥ १४ ॥

यह मन्त्र पहिले आ चुका है अथ० १९ । १६ । १ ॥

दिवो मादित्या रक्षन्तु भूम्या रक्षान्त्वग्नयः ।
इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् ।
तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म॥१५

दिवः । मा । आदित्याः । रक्षन्तु । भूम्याः । रक्षन्तु । अग्नयः ॥
इन्द्राग्नी इति । रक्षताम् । मा । पुरस्तात् । अश्विनौ । अभितः । शर्म । यच्छताम् ॥ तिरश्चीन् । अघ्न्या । रक्षतु । जात-वेदाः । भूत-कृतः । मे । सर्वतः । सन्तु । वर्म ॥ १५ ॥

१४—अयं मन्त्रो व्याख्यातः—अ० १९ । १६ । १ ॥

भाषार्थ—(आदित्याः) अखण्डव्रती शूर (मा) मुझे (दिवः) आकाश से (रक्षन्तु) बचावें, (अग्नयः) ज्ञानी पुरुष (भूम्याः) भूमि से (रक्षन्तु) बचावें। (इन्द्राग्नी) बिजुली और अग्नि [के समान तेजस्वी और व्यापक राजा और मन्त्री दोनों] (मा) मुझे (पुरस्तात्) सामने से (रक्षताम्) बचावें, (अश्विना) सूर्य और चन्द्रमा [के समान ठीक मार्ग चलने वाले वे दोनों] (अभितः) सब ओर से (शर्म) सुख (यच्छताम्) देवें। (जातवेदाः) बहुत धन वाली (अघ्न्या) अटूट [राजनीति] (तिरश्चीन्=तिरश्चिभ्यः) आड़े चलने वाले [बैरियों] से [मुझे] (रक्षतु) बचावे, (भूतकृतः) उचित कर्म करने वाले पुरुष (मे) मेरे लिये (सर्वतः) सब ओर से (वर्म) कवच (सन्तु) होवें ॥ १५ ॥

भावार्थ—जो राजा और राजपुरुष आकाश में वायुयान द्वारा चलने वाले वीरों से और पृथिवी पर अश्ववार आदि से अस्त्र शस्त्र द्वारा शत्रुओं का नाश करते हैं, वही प्रजा की रक्षा कर सकते हैं ॥ १५ ॥

यह मन्त्र ऊपर आ चुका है—अ० १६। १६। २ ॥

सूक्तम् २८ ॥

१—१० ॥ दर्भो देवता ॥ १, ४—१० अनुष्टुप्; २, ३ भुरिगनुष्टुप् ॥

सेनापतिलक्षणोपदेशः—सेनापति के लक्षणों का उपदेश ॥

इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे ।

दर्भं सपत्नदम्भनं द्विषतस्तपनं हृदः ॥ १ ॥

इमम् । बध्नामि । ते । मणिम् । दीर्घायु-त्वाय । तेजसे ॥

दर्भम् । सपत्न-दम्भनम् । द्विषतः । तपनम् । हृदः ॥ १ ॥

भाषार्थ—[हे प्रजागण !] (ते) तेरे (दीर्घायुत्वाय) दीर्घ जीवन और (तेजसे) तेज के लिये (इमम्) इस (मणिम्) मणिरूप [अति प्रशंसनीय],

---

१५—अयं मन्त्रो व्याख्यातः—अ० १६। १६। २॥

१—(इमम्) प्रसिद्धम् (बध्नामि) नियोजयामि (ते) तव (मणिम्) अ० १। २६। १। मण कूजे—इन्। रत्नम्। प्रशंसनीयम् (दीर्घायुत्वाय) चिर-जीवनाय (तेजसे) प्रतापाय (दर्भम्) अ० ६। ४३। १। दृदलिभ्यां भः।

(सपत्नदम्भनम्) शत्रुओं के दबाने वाले, (द्विषतः) विरोधी के (हृदः) हृदय के (तपनम्) तपाने वाले (दर्भम्) दर्भ [शत्रुविदारक सेनापति] को (बध्नामि) मैं नियुक्त करता हूं ॥ १ ॥

भावार्थ—राजा प्रजा की रक्षा और उन्नति के लिये बलवान् नीतिज्ञ सेनापति को नियुक्त करे ॥ १ ॥

दर्भ एक घास औषध विशेष भी है जो वात पित्त कफ त्रिदोष आदि रोग नाश करता है ॥

इस मन्त्र का मिलान करो—अ० ६ । ४३ । १२ ॥

द्विषतस्तापयन् हृदः शत्रूणां तापयन् मनः ।

दुर्हार्दः सर्वांस्त्वं दर्भ घर्म इवाभीन्त्संतापयन् ॥ २ ॥

द्विषतः । तापयन् । हृदः । शत्रूणाम् । तापयन् । मनः ॥

दुः-हार्दः । सर्वान् । त्वम् । दर्भ । घर्मः-इव । अभीन् । सम्-तापयन् ॥ २ ॥

भाषार्थ—(द्विषतः) विरोधी के (हृदः) हृदयों को (तापयन्) तपाता हुआ, और (शत्रूणाम्) शत्रुओं के (मनः) मन को (तापयन्) तपाता हुआ,(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति](सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वाले (अभीन्) अमङ्गलकारियों को (घर्मः इव) ग्रीष्म ऋतु के समान (सन्तापयन्) सर्वथा तपाता हुआ (त्वम्) तू [वर्तमान हो] ॥२ ॥

उ० ३ । १५१ ।दॄ विदारणे—भ । शत्रुविदारकं सेनापतिम् । कुशादितृणविशेषम् (सपत्नदम्भनम्) शत्रूणां हिंसकम् (द्विषतः) विरोधिनः पुरुषस्य (तपनम्) तापकम् (हृदः) हृदयस्य ॥

२—(द्विषतः) द्वेषं कुर्वतः शत्रोः (तापयन्) सन्तप्तं कुर्वन् (हृदः) हृदयानि (शत्रूणाम्) (तापयन्) (मनः) चित्तम् (दुर्हार्दः)अ० २ । ७ । ५ । हार्दं करोति हार्दयततीति, हार्दयतेः क्विपि णिलोपे रूपम् । दुष्टहृदयान्(सर्वान्) (त्वम्) (दर्भः) म० १ । हे शत्रुविदारक सेनापते (घर्मः) ग्रीष्मः (इव) यथा (अभीन्) वातेर्डिच्च । उ० ४ । १३४।नञ्+भद भदी कल्याणकरणे—इण, स च डित् । अमङ्गलकारिणः शत्रून् (सन्तापयन्)सन्तापं कुर्वन्-वर्तस्वेति शेषः॥

भावार्थ—शूर वीर सेनापति शत्रुओं को सदा कष्ट देकर नाश करे, जैसे ग्रीष्म का ताप घास आदि को सुखाकर नष्ट कर देता है ॥ २ ॥

घर्म इवाभितपन् दर्भ द्विषतो नितपन् मणे ।
हृदः सपत्नानां भिन्द्धीन्द्र इव विरुजं बलम् ॥ ३ ॥

घर्मः-इव । अभि-तपन् । दर्भ । द्विषतः । नि-तपन् । मणे ॥ हृदः । स-पत्नानाम् । भिन्द्धि । इन्द्रः-इव । वि-रुजन् । बलम् ॥ ३ ॥

भाषार्थ—(मणे) हे प्रशंसनीय (दर्भ) दर्भ ! [शत्रुविदारक सेनापति] (घर्मः इव) ग्रीष्म के समान (अभितपन्) सर्वथा तपता हुआ (द्विषतः) विरोधियों को (नितपन्) सन्ताप देता हुआ तू, (बलम्) हिंसक को (विरुजन्) नाश करते हुये (इन्द्रः इव) इन्द्र [बड़े ऐश्वर्यवान् पुरुष] के समान, (सपत्नानाम्) बैरियों के (हृदः) हृदयों को (भिन्द्धि) तोड़ दे ॥ ३ ॥

भावार्थ—सेनापति महाप्रतापी शूरों के समान पराक्रम करके शत्रुओं को हरावे ॥ ३ ॥

भिन्द्धि दर्भ सपत्नानां हृदयं द्विषतां मणे ।
उद्यन् त्वचमिव भूम्याः शिर एषां वि पातय ॥ ४ ॥

भिन्द्धि । दर्भ । स-पत्नानाम् । हृदयम् । द्विषताम् । मणे ॥ उत्-यन् । त्वचम्-इव । भूम्याः । शिरः । एषाम् । वि । पातय ४

भाषार्थ—(मणे) हे प्रशंसनीय (दर्भ) दर्भ ! [शत्रुविदारक सेनापति]

३—(घर्मः) ग्रीष्मः (इव) यथा (अभितपन्) अभितः सन्तापं कुर्वन् (दर्भ) हे शत्रुविदारक (द्विषतः) विरोधिनः पुरुषान् (नितपन्) सन्तापयन् (मणे) हे प्रशंसनीय (हृदः) हृदयानि (सपत्नानाम्) शत्रूणाम् (भिन्द्धि) विदारय (इन्द्रः) परमैश्वर्यवान् पुरुषः (इव) यथा (विरुजन्) नाशयन् (बलम्) बल वधे—अच् । हिंसकं दैत्यम् ॥

४—(भिन्द्धि) विदारय (दर्भ) हे शत्रुविदारक (सपत्नानाम्) शत्रू-

(सपत्नानाम्) बैरियों और (द्विषताम्) विरोधियों के (हृदयम्) हृदय को (भिन्द्धि) तोड़ दे। (उद्यन्) उठता हुआ तू, (भूम्याः) भूमि की (त्वचम् इव) त्वचा [तृण आदि] के समान (एषाम्) इन शत्रुओं का (शिरः) शिर (वि पातय) गिरा दे ॥ ४ ॥

भावार्थ—पराक्रमी सेनापति शत्रुओं में फूट डालकर घास फूंस के समान नाश करे ॥ ४ ॥

भिन्द्धि दर्भ सपत्नान् मे भिन्द्धि मे पृतनायतः ।
भिन्द्धि मे सर्वान् दुर्हार्दो भिन्द्धि मे द्विषतो मणे ॥ ५ ॥

भिन्द्धि । दर्भ । स-पत्नान् । मे । भिन्द्धि । मे । पृतना-यतः ॥ भिन्द्धि । मे । सर्वान् । दुः-हार्दः । भिन्द्धि । मे । द्विषतः । मणे ॥ ५ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) बैरियों को (भिन्द्धि) तोड़ दे, (मे) मेरे लिये (पृतनायतः) सेना चढ़ाने वालों को (भिन्द्धि) तोड़ दे। (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (भिन्द्धि) तोड़ दे, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) बैरियों को (भिन्द्धि) तोड़ दे ॥ ५ ॥

भावार्थ—स्पष्ट है ॥ ५ ॥

णाम् (हृदयम्) द्विषताम्) वैरिणाम् (मणे) हे प्रशस्त (उद्यन्) ऊर्ध्वं गच्छन्। उन्नतः सन् (त्वचम्) उपरिदेशं तृणादिकम् (इव) यथा (भूम्याः) पृथिव्याः (शिरः) मस्तकम् (एषाम्) शत्रूणाम् (विपातय) विविधं पातय विनाशय ॥

५—(भिन्द्धि) विदारय (दर्भ) म० १। हे शत्रुविदारक सेनापते (सपत्नान्) शत्रून् (मे) मम (भिन्द्धि) (मे) मह्यम् (पृतनायतः) अ० १। २१। २। सुप आत्मनः क्यच्। पा० ३। १। ८। पृतना-क्यच्, आकारलोपाभावश्छान्दसः। ततः शतृ। पृतन्यतः। पृतनां सेनामात्मन इच्छतः शत्रून् (भिन्द्धि) (मे) मम (सर्वान्) (दुर्हार्दः) म० २। दुष्टहृदयान् (भिन्द्धि) (मे) मम (द्विषतः) विरोधकान् (मणे) हे प्रशंसनीय ॥

छिन्द्धि दर्भ सपत्नान् मे छिन्द्धि मे पृतनायतः ।
छिन्द्धि मे सर्वान् दुर्हार्दान् छिन्द्धि मे द्विषतो मणे ॥६॥

छिन्द्धि । दर्भ । स-पत्नान् । मे । छिन्द्धि । मे । पृतना-यतः ॥
छिन्द्धि । मे । सर्वान् । दुः-हार्दान् । छिन्द्धि । मे । द्विषतः । मणे ॥ ६ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (छिन्द्धि) छेद डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (छिन्द्धि) छेद डाल (मे) मेरे (सर्वान्) सब (दुर्हार्दान्) दुष्ट हृदय वालों को (छिन्द्धि) छेद डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (छिन्द्धि) छेद डाल ॥ ६ ॥

वृश्च दर्भ सपत्नान् मे वृश्च मे पृतनायतः ।
वृश्च मे सर्वान् दुर्हार्दो वृश्च मे द्विषतो मणे ॥ ७ ॥

वृश्च । दर्भ । स-पत्नान् । मे । वृश्च । मे । पृतना-यतः ॥
वृश्च । मे । सर्वान् । दुः-हार्दः । वृश्च । मे । द्विषतः । मणे ॥७॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (वृश्च) काट डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (वृश्च) काट डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (वृश्च) काट डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (वृश्च) काट डाल ॥ ७ ॥

कृन्त दर्भ सपत्नान् मे कृन्त मे पृतनायतः ।
कृन्त मे सर्वान् दुर्हार्दो कृन्त मे द्विषतो मणे ॥ ८ ॥

६—(छिन्द्धि) छिदिर् द्वैधीकरणे । द्वैधीकुरु (दुर्हार्दान्) दुष्टहृदयान् । शिष्टं समानं सर्वत्र ॥ ७ ॥

७—(वृश्च) ओ व्रश्चू छेदने । छिन्द्धि ॥

कृन्त । दर्भ । स-पत्नान् । मे । कृन्त । मे । पृतना-यतः ॥
कृन्त । मे । सर्वान् । दुः-हार्दान् । कृन्त । मे । द्विषतः ।
मणे ॥ ८ ॥

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) बैरियों को (कृन्त) कतर डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (कृन्त) कतर डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दान्) दुष्ट हृदय वालों को (कृन्त) कतर डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) बैरियों को (कृन्त) कतर डाल ॥ ८ ॥

पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः ।
पिंश मे सर्वान् दुर्हार्दः पिंश मे द्विषतो मणे ॥ ९ ॥

पिंश । दर्भ । स-पत्नान् । मे । पिंश । मे । पृतना-यतः ॥
पिंश । मे । सर्वान् । दुः-हार्दः । पिंश । मे । द्विषतः । मणे ॥ ९

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) बैरियों को (पिंश) बोटी बोटी कर, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (पिंश) बोटी बोटी कर । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (पिंश) बोटी बोटी कर, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) बैरियों को (पिंश) बोटी बोटी कर ॥ ९ ॥

विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः ।
विध्य मे सर्वान् दुर्हार्दो विध्य मे द्विषतो मणे ॥ १० ॥

विध्य । दर्भ । स-पत्नान् । मे । विध्य । मे । पृतना-यतः ॥
विध्य । मे । सर्वान् । दुः-हार्दः । विध्य । मे । द्विषतः ।
मणे ॥ १० ॥

८—(कृन्त) कृती छेदने मुचादित्वाद् नुम् । छिन्धि ॥

९—(पिंश) पिश अवयवे, मुचा० नुम् । अनेकावयवीकुरु ॥

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (विध्य) बेध डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (विध्य) बेध डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (विध्य) बेध डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) बैरियों को (विध्य) बेध डाल ॥ १० ॥

सूक्तम् २८ ॥

१—६ ॥ दर्भो देवता ॥ अनुष्टुप्छन्दः ॥

सेनापतिलक्षणोपदेशः—सेनापति के लक्षण का उपदेश ॥

निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः ।
निक्ष मे सर्वान् दुर्हार्दो निक्ष मे द्विषतो मणे ॥ १ ॥

निक्ष । दर्भ । स-पत्नान् । मे । निक्ष । मे । पृतना-यतः ॥
निक्ष । मे । सर्वान् । दुः-हार्दः । निक्ष । मे । द्विषतः ।
मणे ॥ १ ॥

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (निक्ष) कोंच डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (निक्ष) कोंच डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (निक्ष) कोंच डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) बैरियों को (निक्ष) कोंच डाल ॥ १ ॥

तृन्द्धि दर्भ सपत्नान् मे तृन्द्धि मे पृतनायतः ।
तृन्द्धि मे सर्वान् दुर्हार्दस्तृन्द्धि मे द्विषतो मणे ॥ २ ॥

तृन्द्धि । दर्भ । स-पत्नान् । मे । तृन्द्धि । मे । पृतना-यतः ॥
तृन्द्धि । मे । सर्वान् । दुः-हार्दः । तृन्द्धि । मे । द्विषतः ।
मणे ॥ २ ॥

१०—(विध्य) व्यध ताडने । ताडय ॥

१—(निक्ष) णिक्ष चुम्बने, अत्र पीडने । पीडय ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (तृन्द्धि) चीर डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (तृन्द्धि) चीर डाल। (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (तृन्द्धि) चीर डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (तृन्द्धि) चीर डाल ॥ २ ॥

रुन्द्धि दर्भ सपत्नान् मे रुन्द्धि मे पृतनायतः ।
रुन्द्धि मे सर्वान् दुर्हार्दो रुन्द्धि मे द्विषतो मणे ॥ ३ ॥

रुन्द्धि । दर्भ । स-पत्नान् । मे । रुन्द्धि । मे । पृतना-यतः ॥
रुन्द्धि । मे । सर्वान् । दुः-हार्दः । रुन्द्धि । मे । द्विषतः । मणे ॥ ३ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (रुन्द्धि) रोक दे, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (रुन्द्धि) रोक दे। (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (रुन्द्धि) रोक दे, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (रुन्द्धि) रोक दे ॥ ३ ॥

मृण दर्भ सपत्नान् मे मृण मे पृतनायतः ।
मृण मे सर्वान् दुर्हार्दो मृण मे द्विषतो मणे ॥ ४ ॥

मृण । दर्भ । स-पत्नान् । मे । मृण । मे । पृतना-यतः ॥
मृण । मे । सर्वान् । दुः-हार्दः । मृण । मे । द्विषतः । मणे ॥ ४

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (मृण) मार डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (मृण) मार डाल । (मे) मेरे (सर्वान्) सब

२—(तृन्द्धि) उ तृदिर् हिंसानादरयोः । विनाशय ॥

३—(रुन्द्धि) रुधिर् आवरणे । आवृणु । निरोधं कुरु ॥

४—(मृण) मृण हिंसायाम् । मारय ॥

(दुर्हार्दः) दुष्ट हृदय वालों को (मृण) मार डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (मृण) मार डाल ॥ ४ ॥

मन्थ॑ दर्भ स॒पत्ना॑न् मे॒ मन्थ॑ मे पृतनाय॒तः ।
मन्थ॑ मे॒ सर्वा॑न् दु॒र्हार्दो॒ मन्थ॑ मे द्विष॒तो म॑णे ॥ ५ ॥

मन्थ॑ । द॒र्भ॒ । स॒-पत्ना॑न् । मे॒ । मन्थ॑ । मे॒ । पृ॒त॒ना-य॒तः ॥
मन्थ॑ । मे॒ । सर्वा॑न् । दुः॒-हार्दः॑ । मन्थ॑ । मे॒ । द्वि॒ष॒तः । म॒णे॒ ॥ ५ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (मन्थ) मथ डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (मन्थ) मथ डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (मन्थ) मथ डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (मन्थ) मथ डाल ॥ ५ ॥

पि॒ण्ड्ढि द॑र्भ स॒पत्ना॑न् मे पि॒ण्ड्ढि मे॑ पृतनाय॒तः ।
पि॒ण्ड्ढि मे॒ सर्वा॑न् दु॒र्हार्दः॑ पि॒ण्ड्ढि मे॑ द्विष॒तो म॑णे ॥ ६ ॥

पि॒ण्ड्ढि । द॒र्भ॒ । स॒-पत्ना॑न् । मे॒ । पि॒ण्ड्ढि । मे॒ । पृ॒त॒ना-य॒तः ॥ पि॒ण्ड्ढि । मे॒ । सर्वा॑न् । दुः॒-हार्दः॑ । पि॒ण्ड्ढि । मे॒ । द्वि॒ष॒तः । म॒णे॒ ॥ ६ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (पिण्ड्ढि) पीस डाल, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (पिण्ड्ढि) पीस डाल । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (पिण्ड्ढि) पीस डाल, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (पिण्ड्ढि) पीस डाल ॥ ६ ॥

५—(मन्थ) मन्थ विलोडने । विलोडय ॥

६—(पिण्ड्ढि) पिष्लृ संचूर्णने । चूर्णीकुरु ॥

ओषं दर्भ सपत्नान् मे ओषं मे पृतनायतः ।
ओषं मे सर्वान् दुर्हार्दं ओषं मे द्विषतो मणे ॥ ७ ॥

ओषं । दर्भ । स-पत्नान् । मे । ओषं । मे । पृतना-यतः ॥
ओषं । मे । सर्वान् । दुः-हार्दः । ओषं । मे । द्विषतः ।
मणे ॥ ७ ॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (ओष) जला दे, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (ओष) जला दे । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (ओष) जला दे, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (ओष) जला दे ॥ ७ ॥

दहं दर्भ सपत्नान् मे दहं मे पृतनायतः ।
दहं मे सर्वान् दुर्हार्दो दहं मे द्विषतो मणे ॥ ८ ॥

दहं । दर्भ । स-पत्नान् । मे । दहं । मे । पृतना-यतः ॥ दहं ।
मे । सर्वान् । दुः-हार्दः । दहं । मे । द्विषतः । मणे ॥८॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (दह) दाह कर दे, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (दह) दाह कर दे । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (दह) दाह कर दे, (मणे) हे प्रशंसनीय ! (मे) मेरे (द्विषतः) वैरियों को (दह) दाह कर दे ॥ ८ ॥

जहि दर्भ सपत्नान् मे जहि मे पृतनायतः ।
जहि मे सर्वां दुर्हार्दो जहि मे द्विषतो मणे ॥ ९ ॥

७—(ओष) उष दाहे । भस्मीकुरु ॥
८—(दह) भस्मसात्कुरु ॥

जहि । दर्भ । स-पत्नान् । मे । जहि । मे । पृतना-यतः ॥ जहि । मे । सर्वान् । दुः-हार्दः । जहि । मे । द्विषतः । मणे ॥ ६ ॥

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (मे) मेरे (सपत्नान्) वैरियों को (जहि) नाश कर दे, (मे) मेरे लिये (पृतनायतः) सेना चढ़ा लाने वालों को (जहि) नाश करदे । (मे) मेरे (सर्वान्) सब (दुर्हार्दः) दुष्ट हृदय वालों को (जहि) नाश कर दे, (मणे) हे प्रशंसनीय ! (में) मेरे (द्विषतः) वैरियों को (जहि) नाश कर दे ॥ ६ ॥

सूक्तम् ३० ॥

१—५ ॥ दर्भो देवता ॥ १,२ निचृदनुष्टुप्; ३ भुरिगुष्णिक्; ४, ५ अनुष्टुप् ॥

सेनापतिलक्षणोपदेशः—सेनापति के लक्षणों का उपदेश ॥

यत् ते दर्भ जरामृत्युः शतं वर्मसु वर्म ते ।
तेनेमं वर्मिणं कृत्वा सपत्नां जहि वीर्यैः ॥ १ ॥

यत् । ते । दर्भ । जरा-मृत्युः । शतम् । वर्म-सु । वर्म । ते ॥ तेन । इमम् । वर्मिणम् । कृत्वा । स-पत्नान् । जहि । वीर्यैः ॥ १ ॥

भावार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (यत्) जो (ते) तेरा (जरामृत्युः) जरा [निर्बलता] को मृत्यु [के समान दुःखदायी] समझना है, और [जो] (वर्मसु) कवचों के बीच (ते) तेरा (वर्म) कवच (शतम्) सौ प्रकार का है । (तेन) उसी [कारण] से (इमम्) इस [शूर]

६—(जहि) हन हिंसागत्योः । नाशय ॥

१—(यत्) यः (ते) तव (दर्भ) हे शत्रुविदारक सेनापते (जरामृत्युः) जरा निर्बलता मृत्युरिव दुःखदायिनी यस्मिन् स व्यवहारः (शतम्) बहुप्रकारम् (वर्मसु) कवचेषु (वर्म) कवचम् । रक्षासाधनम् (ते) तव (तेन) कारणेन

को (वर्मिणम्) कवच धारी (कृत्वा) करके (सपत्नान्) बैरियों को (वीर्यैः) वीर कर्मों से (जहि) नाश कर ॥ १ ॥

भावार्थ—पराक्रमी शूर सेनापति अपने दृष्टान्त से अन्य पुरुषों को वीर बनाकर शत्रुओं का नाश करे ॥ १ ॥

शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते ।

तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः ॥ २ ॥

शतम् । ते । दर्भ । वर्माणि । सहस्रम् । वीर्याणि । ते ॥ तम् । अस्मै । विश्वे । त्वाम् । देवाः । जरसे । भर्तवै । अदुः ॥२॥

भाषार्थ—(दर्भ) हे दर्भ ! [शत्रुविदारक सेनापति] (ते) तेरे (वर्माणि) कवच (शतम्) सौ और (ते) तेरे (वीर्याणि) वीर कर्म (सहस्रम्) सहस्र हैं । (तम्) उस (त्वाम्) तुझे (विश्वे) सब (देवाः) विद्वानों ने (अस्मै) इस [पुरुष] को (जरसे) स्तुति के लिये और (भर्तवै) पालन करने के लिये (अदुः) दिया है ॥ २ ॥

आ॒रोह॒न् वर्च॑सा स॒ह म॒णिर्दु॑र्णाम॒चात॑नः ॥ १ ॥

श॒त-वा॑रः । अ॒नी॒न॒श॒त् । यक्ष्मा॑न् । रक्षां॑सि । तेज॑सा ॥
आ॒-रोह॑न् । वर्च॑सा । स॒ह । म॒णिः । दु॒र्ना॒म॒-चात॑नः ॥ १ ॥

भाषार्थ—(दुर्णामचातनः) दुर्नामों [बुरे नाम वाले बवासीर आदि रोगों] को नाश करने वाले (मणिः) प्रशंसनीय (शतवारः) शतवार [सैकड़ों

५—(ये) (ऋष्णवः) ग्लाजिस्थश्च ग्स्नुः । पा० ३ । २ । १३९ । ऋ हिंसायाम्—ग्स्नु । हिंसकव्यवहाराः (देवकृताः) दिवु क्रीडाविजिगीषामदादिषु-पचाद्यच् । देवै रुन्मत्तैः कृताः सम्पादिताः (यः) (उतो) अपि च (ववृते) वृतु वर्तने—लिट् । वर्तमानो बभूव (अन्यः) इतरो दुष्टव्यवहारः (सर्वान्) (तान्) (विश्वभेषजः) सर्वौषधः (अरसान्) निष्प्रभावान् (जङ्गिडः) (करत्) कुर्यात् ॥

१—(शतवारः) शत+वृञ् वरणे—घञ् । बहुभिर्वरणीयः स्वीकरणीयः । विश्ववारः—अ० ५ । २७ । ३ । औषधविशेषः (अनीनशत्) नाशितवान्

से स्वीकार करने योग्य औषध विशेष] ने (वर्चसा सह) प्रकाश के साथ (आरोहन्) ऊंचे होते हुये (तेजसा) अपनी तीक्ष्णता से (यक्ष्मान्) राजरोगों [क्षयी आदि] और (रक्षांसि) राक्षसों [रोगजन्तुओं] को (अनीनशत्) नष्ट कर दिया है ॥ १ ॥

भावार्थ—शतवार औषध के सेवन से क्षयी, बवासीर आदि रोग नष्ट होते हैं, और वे रोगजन्तु भी नष्ट होते हैं जो शरीर में दाद बवासीर आदि के कारण हैं ॥ १ ॥

शतवार और शतावरी एक ही औषध जान पड़ते हैं जिसके नाम शतमूली आदि हैं ॥

शृङ्गाभ्यां रक्षो नुदते मूलेन यातुधान्यः ।
मध्येन यक्ष्मं बाधते नैनं पाप्माति तत्रति ॥ २ ॥

शृङ्गाभ्याम् । रक्षः । नुदते । मूलेन । यातु-धान्यः ॥ मध्येन । यक्ष्मम् । बाधते । न । एनम् । पाप्मा । अति । तत्रति ॥२॥

भाषार्थ—वह [शतवार] (शृङ्गाभ्याम्) अपने दोनों सींगों [अगले भागों] से (रक्षः) राक्षस और (मूलेन) जड़ से (यातुधान्यः) दुःखदायिनी पीड़ाओं को (नुदते) ढकेलता है । (मध्येन) मध्य भाग से (यक्ष्मम्) राजरोग को (बाधते) हटाता है, (एनम्) इसको (पाप्मा) [कोई] अनहित (न) नहीं (अति तत्रति) दबा सकता है ॥ २ ॥

(यक्ष्मान्) अ० २ । १० । ५ राजरोगान् । क्षयरोगान् (तेजसा) प्रभावेण (आरोहन्) अधितिष्ठन् (वर्चसा) प्रकाशेन (सः) (मणिः) प्रशस्तः (दुर्णामचातनः) अ० ८ । ६ । ३ । दुर्णाम्नामर्शआदिरोगाणां नाशकः ॥

२—(शृङ्गाभ्याम्) शृङ्गवदग्रभागाभ्याम् (रक्षः) राक्षसम् । रोगजन्तुम् (नुदते) प्रेरयति (मूलेन) अधः प्रदेशेन (यातुधान्यः) यातुधानीः । दुःखप्रदाः पीडाः (मध्येन) मध्यभागेन (यक्ष्मम्) राजरोगम् (बाधते) विलोडयति (न) निषेधे (एनम्) शतवारम् (पाप्मा) दुष्टव्यवहारः (अति) अतीत्य (तत्रति) तॄ प्लवनतरणयोः—श्लुः शश्चेति विकरणद्वयम् । तरति । अभिभवति ॥

भावार्थ—इस सर्वौषध का प्रत्येक अङ्ग प्रत्येक रोग को हरता है ॥२॥

ये यक्ष्मासो अर्भका महान्तो ये च शब्दिनः ।
सर्वां दुर्णामहा मणिः शतवारो अनीनशत् ॥ ३ ॥

ये । यक्ष्मासः । अर्भकाः । महान्तः । ये । च । शब्दिनः ॥
सर्वान् । दुर्नाम-हा । मणिः । शत-वारः । अनीनशत् ॥ ३ ॥

भाषार्थ—(ये) जो (यक्ष्मासः) राजरोग (अर्भकाः) छोटे और [जो] (महान्तः) बड़े हैं, (च) और (ये) जो (शब्दिनः) महाशब्दकारी हैं। (सर्वान्) उन सब को (दुर्णामहा) दुर्नामों [बुरे नाम वाले बवासीर दाद आदि] के मिटाने हारे, (मणिः) प्रशंसनीय (शतवारः) शतवार [मन्त्र १] ने (अनीनशत्) नष्ट कर दिया है ॥ ३ ॥

भावार्थ—छोटे बड़े राजरोग आदि और वे रोग जिनसे शरीर में खुजली वा चरचराहट शब्द होता है, शतवार औषध से सब नष्ट हो जाते हैं ॥ ३ ॥

शतं वीरानजनयच्छतं यक्ष्मानपावपत् ।
दुर्णाम्नः सर्वान् हत्वाव रक्षांसि धूनुते ॥ ४ ॥

शतम् । वीरान् । अजनयत् । शतम् । यक्ष्मान् । अप । अव-पत् ॥ दुः-नाम्नः । सर्वान् । हत्वा । अव । रक्षांसि । धूनुते ४

भाषार्थ—उस [शतवार] ने (शतम्) सौ [अनेक] (वीरान्) वीर (अजनयत्) उत्पन्न किये हैं, (शतम्) सौ [अनेक] (यक्ष्मान्) राजरोग

३—(ये) (यक्ष्मासः) यक्ष्माः । राजरोगाः (अर्भकाः) क्षुद्राः (महान्तः) वृद्धिं गताः (ये) (च) (शब्दिनः) महाशब्दकारकाः (सर्वान्) (दुर्णामहा) दुर्णाम्नामर्शआदिरोगाणां हन्ता (मणिः) प्रशस्तः (शतवारः) म० १ । औषधविशेषः (अनीनशत्) नाशितवान् ॥

४—(शतम्) अनेकान् (वीरान्) शूरान् (अजनयत्) उदपादयत् (शतम्) बहून् (यक्ष्मान्) राजरोगान् (अपावपत्) सर्वथा विक्षिप्तवान्

(अप अवपत्) इतर वितर किये हैं। वह (सर्वान्) सब (दुर्णाम्नः) दुर्नामों [बुरे नाम वाले बवासीर आदि] को (हत्वा) मारकर (रक्षांसि) राक्षसों [रोगजन्तुओं] को (अव धूनुते) हिला डालता है ॥ ४ ॥

भावार्थ—शतवार महौषध के सेवन से वीर्य पुष्ट होकर सब वीर सन्तान उत्पन्न होते हैं, और सब दुष्ट रोग नष्ट होते हैं ॥ ४ ॥

हिरण्यशृङ्ग ऋषभः शातवारो अयं मणिः ।

दुर्णाम्नः सर्वांस्तृड्ढ्वाव रक्षांस्यक्रमीत् ॥ ५ ॥

हिरण्य-शृङ्गः । ऋषभः । शात-वारः । अयम् । मणिः ॥

दुः-नाम्नः। सर्वान् । तृड्ढ्वा । अव । रक्षांसि । अक्रमीत् ॥५॥

भाषार्थ—हिरण्यशृङ्गः) सोने के समान सींग [अगले भाग] वाला, (ऋषभः) ऋषभ [औषध विशेष के समान] (अयम्) इस (मणिः) प्रशंसनीय (शातवारः) शतवार ने (सर्वान्) सब (दुर्णाम्नः) दुर्नामों [बुरे नाम वाले बवासीर आदि] को (तृड्ढ्वा) मार कर (रक्षांसि) राक्षसों [रोगजन्तुओं] को (अव अक्रमीत्) खूंद डाला है ॥ ५ ॥

भावार्थ—जैसे ऋषभ औषध बहुत बलकारी और अनेक रोगनाशक है, वैसे ही यह शतवार औषध है ॥ ५ ॥

शतमहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम् ।

शतं शश्वन्वतीनां शतवारेण वारये ॥ ६ ॥

शतम् । अहम् । दुः-नाम्नीनाम् । गन्धर्व-अप्सरसाम् । शतम्॥

(दुर्णाम्नः) अर्शआदिरोगान् (सर्वान्) (हत्वा) नाशयित्वा (रक्षांसि) रोगजन्तून् (अव धूनुते) सर्वथा कम्पयति ॥

५—(हिरण्यशृङ्गः) सुवर्णसमानशृङ्गमग्रभागो यस्य सः (ऋषभः) ऋषभौषधितुल्यः (पुष्टिकरः) (शातवारः) स्वार्थे—अण् । शतवारः—म० १ । (अयम्) (मणिः) प्रशस्तः (दुर्णाम्नः) अर्शआदिरोगान् (सर्वान्)(तृड्ढ्वा) तृह हिंसायाम्—क्त्वा । हिंसित्वा (रक्षांसि) राक्षसान् । रोगजन्तून् (अवाक्रमीत्) पादेन यथा विक्षिप्तवान् ॥

शतम् । शश्वन्-वतीनाम् । शत-वारेण । वारये ॥ ६ ॥

भाषार्थ—(अहम्) मैं (दुर्णाम्नीनां शतम्) सौ दुर्णाम्नी [बवासीर आदि पीड़ाओं] को और (गन्धर्वाप्सरसां शतम्) सौ गन्धर्वों [पृथिवी पर धरे हुये] और अप्सराओं [आकाश में चलने वाले रोगों] को और (शश्वन्वतीनां शतम्) सौ उछलती हुयी [पीड़ाओं] को (शतवारेण) शतवार [औषध] से (वारये) हटाता हूं ॥ ६ ॥

भावार्थ—जो रोग शरीर की मलीनता से पृथिवी और आकाश में जल वायु की मलीनता से और जो रोग एक दूसरे के लगाव से उत्पन्न होते हैं, वैद्य लोग उनको शतवार औषध से नाश करें ॥ ६ ॥

सूक्तम् ३७ ॥

१—४ ॥ अग्निर्देवता ॥ १ भुरिगार्षी पङ्क्तिः; २ विराडार्षी पङ्क्तिः; ३ विराडार्षी बृहती; ४ स्वराडार्ष्युष्णिक् ॥

बलप्राप्त्युपदेशः—बल की प्राप्ति का उपदेश ॥

इदं वर्चो अग्निना दत्तमागन् भर्गो यशः सह ओजो वयो बलम् । त्रयस्त्रिंशद् यानि च वीर्याणि तान्यग्निः प्र ददातु मे १

इदम् । वर्चः । अग्निना । दत्तम् । आ । अगन् । भर्गः ।

६—(शतम्) अनेकान् (अहम्) वैद्यः (दुर्णाम्नीनाम्) अनउपधालोपिनोऽन्यतरस्याम् । पा० ४ । १ । २८ । इति ङीप् । अर्शआदिरोगपीडानाम् (गन्धर्वाप्सरसाम्) अ० ८ । ८ । १५ । कॄगॄशॄदृभ्यो वः । उ० १ । १५५ । गो+धृञ् धारणे-वप्रत्ययः, गो शब्दस्य गमादेशः+सरतेरप् पूर्वाद्सिः । उ० ४ । २३७ । अप+सृ गतौ—असि । गवि पृथिव्यां ध्रियन्ते ते गन्धर्वाः । अप्सु आकाशे सरन्ति गच्छन्तीति अप्सरसः । तादृशानां रोगाणाम् (शतम्) बहून् (शतम्) (शश्वन्वतीनाम्) स्नामदिपद्यर्ति० । उ० । ४ । ११३ । शश प्लुतगतौ—वनिप् । शश्वन्-मतुप् । मादुपधायाश्च० । पा० ८ । २ । ६ । इति वत्वम् । अनोनुट् । पा० ८ । २ । १६ । इति नुट्, ङीप् । प्लुतगतियुक्तानां पीडानाम् (शतवारेण) म० १ । औषधविशेषेण (वारये) निवारयामि ॥

यशः । सहः । ओजः । वयः । बलम् ॥ त्रयः-त्रिंशत् । यानि । च । वीर्याणि । तानि । अग्निः । प्र । ददातु । मे ॥ १ ॥

भाषार्थ—(अग्निना) अग्नि [प्रकाशस्वरूप परमेश्वर] करके (दत्तम्) दिया गया (इदम्) यह (वर्चः) प्रताप, (भर्गः) प्रकाश, (यशः) यश, (सहः) उत्साह, (ओजः) पराक्रम, (वयः) पौरुष और (बलम्) बल (आ अगन्) आया है। (च) और (यानि) जो (त्रयस्त्रिंशत्) तेतीस (वीर्याणि) वीर कर्म हैं, (तानि) उनको (अग्निः) अग्नि [प्रकाशस्वरूप परमात्मा] (मे) मुझे (प्र ददातु) देता रहे ॥ १ ॥

भावार्थ—मनुष्य परमेश्वर के दिये साधनों से अनेक प्रकार का बल प्राप्त करें और तेतीस जो आठ वसु आदि देवता हैं [देखो अथर्व० १९। २७। १०], उनसे भी सदा उपकार लेते रहें ॥ १ ॥

वर्च आ धेहि मे तन्वां३ सह ओजो वयो बलम् ।
इन्द्रियाय त्वा कर्मणे वीर्याय प्रति गृह्णामि शतशारदाय ॥२॥

वर्चः । आ । धेहि । मे । तन्वाम् । सहः । ओजः । वयः । बलम् ॥ इन्द्रियाय । त्वा । कर्मणे । वीर्याय । प्रति । गृह्णामि । शत-शारदाय ॥ २ ॥

भाषार्थ—[हे परमात्मन् !] (मे) मेरे (तन्वाम्) शरीर में (वर्चः) प्रताप, (सहः) उत्साह, (ओजः) पराक्रम, (वयः) पौरुष और (बलम्)

१—(इदम्) दृश्यमानम् (वर्चः) प्रतापः (अग्निना) प्रकाशस्वरूपेण परमात्मना (दत्तम्) समर्पितम् (आ अगन्) आगमत् (भर्गः) प्रकाशः (यशः) कीर्तिः (सहः) उत्साहः (ओजः) पराक्रमः (वयः) पौरुषम् (बलम्) सामर्थ्यम् (त्रयस्त्रिंशत्) त्रयस्त्रिंशद्वस्वादिदेवतासम्बन्धीनि (यानि) (च) (वीर्याणि) वीरकर्माणि (तानि) (अग्निः) प्रकाशस्वरूपः परमेश्वरः (प्र ददातु) प्रयच्छतु (मे) मह्यम् ॥

२—(वर्चः) प्रतापम् (आ) समन्तात् (धेहि) देहि (मे) मम (तन्वाम्) शरीरे (सहः) उत्साहम् (ओजः) पराक्रमम् (वयः) पौरुषम्

बल (आ धेहि) धारण कर दे । (इन्द्रियाय) इन्द्र [परम ऐश्वर्य्यवान् पुरुष] के योग्य (कर्मणे) कर्म के लिये, (वीर्याय) वीरता के लिये और (शतशारदाय) सौ शरद् ऋतुओं वाले [जीवन] के लिये (त्वा) तुझ को (प्रति गृह्णामि) मैं अङ्गीकार करता हूं ॥ २ ॥

भावार्थ—मनुष्य विद्या की प्राप्ति से परमेश्वरीय नियमों पर चलकर अपना यश बढ़ावें ॥ २ ॥

ऊ॒र्जे त्वा॒ बला॑य॒ त्वौज॑से॒ सह॑से त्वा ।

अ॒भि॒भू॒याय॑ त्वा राष्ट्र॒भृ॑त्याय॒ पर्यू॑हामि श॒तशा॑रदाय ॥ ३ ॥

ऊ॒र्जे । त्वा॒ । बला॑य । त्वा॒ । ओज॑से । सह॑से । त्वा॒ ॥ अ॒भि॒ऽभू॒याय॑ । त्वा॒ । रा॒ष्ट्र॒ऽभृ॑त्याय । परि॑ । ऊ॒हा॒मि॒ । श॒तऽशा॑रदाय ३

भाषार्थ—[हे परमात्मन् !] (त्वा) तुझे (ऊर्जे) अन्न के लिये, (बलाय) बल के लिये, (त्वा) तुझे (ओजसे) पराक्रम के लिये, (त्वा) तुझे (सहसे) उत्साह के लिये, (त्वा) तुझे (अभिभूयाय) विजय के लिये, और (राष्ट्रभृत्याय) राज्य के पोषण के लिये और (शतशारदाय) सौ वर्ष वाले [जीवन] के लिये (परि) अच्छे प्रकार [ऊहामि] तर्क से निश्चय करता हूं ॥ ३ ॥

भावार्थ—जो मनुष्य परमात्मा में श्रद्धा करते हैं, वे सब प्रकार का बल प्राप्त करके आनन्द भोगते हैं ॥ ३ ॥

ऋ॒तुभ्य॑ष्ट्वार्त॒वेभ्यो॑ मा॒द्भ्यः सं॑वत्स॒रेभ्यः॑ ।

(बलम्) सामर्थ्यम् (इन्द्रियाय) इन्द्रस्य परमैश्वर्यवतः पुरुषस्य योग्याय (त्वा) त्वाम् (कर्मणे) (वीर्याय) वीरत्वाय (प्रतिगृह्णामि) स्वीकरोमि (शतशारदाय) शतशरदृतुयुक्ताय जीवनाय ॥

३—(ऊर्जे) अन्नलाभाय (त्वा) त्वाम् (बलाय) सामर्थ्याय (त्वा) (ओजसे) पराक्रमाय (सहसे) उत्साहाय (त्वा) (अभिभूयाय) अभि+भू सत्तायां प्राप्तौ च—क्यप् । अभिभवनाय विजयाय (त्वा) (राष्ट्रभृत्याय) डु भृञ् धारणपोषणयोः—क्यप्; तुक् । राज्यपोषणाय (परि) सर्वतः (ऊहामि) तर्केण निश्चिनोमि (शतशारदाय) शतवर्षयुक्ताय जीवनाय ॥

धात्रे विधात्रे समृधे भूतस्य पतये यजे ॥ ४ ॥

ऋतु-भ्यः । त्वा । आर्तवेभ्यः । मात्-भ्यः । सम्-वत्सरेभ्यः ॥
धात्रे । वि-धात्रे । सम्-ऋधे । भूतस्य । पतये । यजे ॥ ४ ॥

भाषार्थ—[हे परमात्मन् !] (ऋतुभ्यः) ऋतुओं के लिये, (आर्तवेभ्यः) ऋतुओं में उत्पन्न पदार्थों के लिये, (माद्भ्यः) महीनों के लिये, (संवत्सरेभ्यः) वर्षों के लिये, (धात्रे) पोषक पुरुष के लिये, (विधात्रे) बुद्धिमान् जन के लिये, (समृधे) बढ़ती करने वाले के लिये और (भूतस्य) प्राणी मात्र के (पतये) रक्षक पुरुष के लिये (त्वा) तुझे (यजे) मैं पूजता हूं ॥४॥

भावार्थ—मनुष्यों को योग्य है कि अपने समस्त समय और समस्त पदार्थों को संसार के हित में लगाकर परमात्मा की उपासना करते रहें ॥ ४ ॥

सूक्तम् ३८ ॥

१—३ ॥ गुल्गुलुर्देवता ॥ १ अनुष्टुप्; २ निचृदनुष्टुप्; ३ प्राजापत्याऽनुष्टुप् ॥

रोगनाशनोपदेशः—रोग नाश करने का उपदेश ॥

न तं यक्ष्मा अरुन्धते नैनं शपथो अश्नुते ।
यं भेषजस्य गुल्गुलोः सुरभिर्गन्धो अश्नुते ॥ १ ॥

न । तम् । यक्ष्माः । अरुन्धते । न । एनम् । शपथः । अश्नुते ॥ यम् । भेषजस्य । गुल्गुलोः । सुरभिः । गन्धः । अश्नुते ॥ १ ॥

भाषार्थ—(न) न तो (तम्) उस [पुरुष] को (यक्ष्माः) राजरोग

४—(ऋतुभ्यः) ऋतूनां हिताय (त्वा) (आर्तवेभ्यः) ऋतुषु भवेभ्यः पदार्थेभ्यः (माद्भ्यः) मासेभ्यः (संवत्सरेभ्यः) वर्षेभ्यः (धात्रे) पोषकाय (विधात्रे) मेधाविने—निघ० ३ । १५ (समृधे) समर्धयित्रे । वर्धयित्रे (भूतस्य) प्राणिमात्रस्य (पतये) पालकाय (यजे) पूजयामि ॥

१—(न) निषेधे (तम्) पुरुषम् (यक्ष्माः) राजरोगाः (अरुन्धते)

(अरुन्धते=आरुन्धते) रोकते हैं, और (न) (एनम्) उसको (शपथः) शाप [क्रोध वचन] (अश्नुते) व्यापता है, । (यम्) जिस [पुरुष] को (गुल्गुलोः) गुल्गुलु [गुग्गुल] (भेषजस्य) औषध का (सुरभिः) सुगन्धित (गन्धः) गन्ध (अश्नुते) व्यापता है ॥ १ ॥

भावार्थ—जिस घर में गुग्गुल आदि सुगन्धित द्रव्यों का गन्ध किया जाता है, वहां रोग नहीं होता ॥ १ ॥

(गुल्गुलु) शब्द पहिले आ चुका है—अ० २ । ३६ । ७ ॥

विष्वञ्चस्तस्माद् यक्ष्मा मृगा अश्वा इवेरते ।

यद् गुल्गुलु सैन्धवं यद् वाप्यासि समुद्रियम् ॥ २ ॥

विष्वञ्चः । तस्मात् । यक्ष्माः। मृगाः। अश्वाः-इव । ईरते ॥ यत् । गुल्गुलु । सैन्धवम् । यत् । वा । अपि । असि । समुद्रियम् ॥ २ ॥

उभयोरग्रभं नामास्मा अरिष्टतातये ॥ ३ ॥

उभयोः । अग्रभम् । नाम । अस्मै । अरिष्ट-तातये ॥ ३ ॥

भाषार्थ—(तस्मात्) उस [पुरुष] से (विष्वञ्चः) सब ओर फैले हुये (यक्ष्माः) राजरोग, (मृगाः) हरिण [वा] (अश्वा इव) घोड़ों के समान (ईरते) दौड़ जाते हैं । (यत्) जहां पर तू (सैन्धवम्) नदी से उत्पन्न,

---

छान्दसो ह्रस्वः । आरुन्धते । समन्ताद् रोधं कुर्वन्ति (न) (एनम्) (शपथः) शापः । क्रोधवचनम् (अश्नुते) व्याप्नोति (यम्) पुरुषम् (भेषजस्य) औषधस्य (गुल्गुलोः) अ० २ । ३६ । ७ । गुड रक्षणे—क्विप्+गुड रक्षणे—कु, डस्य लत्वम् । गुड्यते रक्ष्यतेऽस्मादिति गुड्रोगः, तस्माद् गुडति रक्षतीति गुल्गुलुः। गुल्गुलुरेव गुग्गुलुः । सुगन्धौषधविशेषस्तस्यौषधस्य (सुरभिः) सुगन्धितः (गन्धः) घ्राणग्राह्यो गुणः (अश्नुते) व्याप्नोति ॥

२—(विष्वञ्चः) विष्वगञ्चनाः । नाना देशव्याप्ताः (तस्मात्) पुरुषात् (यक्ष्माः) राजरोगाः (मृगाः) जन्तुविशेषाः (अश्वाः) तुरङ्गाः (इव) यथा (ईरते) धावन्ति (यत्) यत्र (गुल्गुलु) म० १ । गुग्गुलु (सैन्धवम्) नदी-

(वा) अथवा (यत्) जहां पर (समुद्रियम्) समुद्र से उत्पन्न हुआ (अपि) ही (गुल्गुलु) गुल्गुलु [गुग्गुल] (असि) होता है ॥ २ ॥ (उभयोः) दोनों के (नाम) नाम को (अस्मै) इस [पुरुष] के लिये (अरिष्टतातये) कुशल करने को (अग्रभम्) मैं ने लिया है ॥ ३ ॥

भावार्थ—गुग्गुल नदी वा समुद्र के पास के वृक्ष विशेष का निर्यास अर्थात् गोंद होता है, उसको अग्नि पर जलाने से सुगन्ध उठता है जिससे अनेक रोग नष्ट होते हैं ॥ २, ३ ॥

सूक्तम् ३८ ॥

१—१० ॥ कुष्ठो देवता ॥ १, ९, १० अनुष्टुप्; २, ३ पथ्या पङ्क्तिः; ४ षट्-पदा जगती; ५ शक्वरी; ६–८ अष्टिः ॥

रोगनाशनोपदेशः—रोगनाश करने का उपदेश ॥

ऐतु॑ दे॒वस्त्राय॑माणः॒ कुष्ठो॑ हि॒मव॑त॒स्परि॑ ।
त॒क्मानं॒ सर्वं॑ नाशय॒ सर्वा॑श्च यातुधा॒न्यः॑ ॥ १ ॥

आ । ए॒तु॒ । दे॒वः । त्राय॑माणः । कुष्ठः॑ । हि॒म-व॑तः । परि॑ ॥
त॒क्मान॑म् । सर्व॑म् । ना॒श॒य॒ । सर्वाः॑ । च॒ । या॒तु॒-धा॒न्यः॑ ॥१॥

भाषार्थ—(देवः) दिव्य गुण वाला, (त्रायमाणः) रक्षा करता हुआ (कुष्ठः) कुष्ठ [रोग बाहर करने वाला औषध विशेष] (हिमवतः परि) हिम वाले देश से (आ एतु) आवे । तू (सर्वम्) सब (तक्मानम्) जीवन के

प्रदेशजम् (यत्) यत्र (वा) अथवा (अपि) एव (असि) अस्ति (समुद्रियम्) समुद्रभवम् ॥

३—(उभयोः) द्वयोः (अग्रभम्) अग्रहीषम् (नाम) संज्ञाम् (अस्मै) पुरुषाय (अरिष्टतातये) अ० ३ । ५ । ५ । शिवशमरिष्टस्य करे । पा० ४ । ४ । १४३ । इति अरिष्ट-तातिल् करोत्यर्थे । क्षेमकरणाय ॥

१—(ऐतु) आगच्छतु (देवः) दिव्यगुणः (त्रायमाणः) पालयमानः (कुष्ठः) अ० ५ । ४ । १ । हनिकुषिनी० । उ० २ । २ । कुष निष्कर्षे—क्थन् । रोगाणां निष्कर्षको बहिष्कर्ता । औषधविशेषः (हिमवतः) हिमदेशात् (परि)

कष्ट देने वाले ज्वर को (च) और (सर्वाः) सब (यातुधान्यः) दुःखदायिनी पीड़ाओं को (नाशय) नाश कर दे ॥ १ ॥

भावार्थ—कुष्ठ वा कूट औषध ठंढे देशों में होता है, उसको प्राप्त करके ज्वर आदि रोगों का नाश करें ॥ १ ॥

इस सूक्त का मिलान करो—अथर्व० ४ । ५ तथा ६ । ६५ ॥

त्रीणि ते कुष्ठ नामानि नद्यमारो नद्यारिषः । नद्यायं पुरुषो रिषत् । यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥ २ ॥

त्रीणि । ते । कुष्ठ । नामानि । नद्य-मारः । नद्य-रिषः ॥ नद्य । अयम् । पुरुषः । रिषत् ॥ यस्मै । परि-ब्रवीमि । त्वा । सायम्-प्रातः । अथो इति । दिवा ॥ २ ॥

भाषार्थ—(कुष्ठ) हे कुष्ठ ! [मन्त्र १] (ते) तेरे (त्रीणि) तीन (नामानि) नाम हैं-(नद्यमारः) नद्यमार [नदी में उत्पन्न रोगों का मारने वाला], और (नद्यरिषः) नद्यरिष [नदी में उत्पन्न रोगों का हानि करने वाला] । (नद्य) हे नद्य ! [नदी में उत्पन्न कुष्ठ] (अयम्) वह (पुरुषः) पुरुष [रोगों को] (रिषत्) मिटावे । (यस्मै) जिस को (त्वा) तुझे (सायं-प्रातः) सायंकाल और प्रातः काल (अथो) और भी (दिवा) दिन में (परि-ब्रवीमि) मैं बतलाऊं ॥ २ ॥

भावार्थ—इस औषध के तीन नाम हैं—कुष्ठ, नद्यमार और नद्यरिष । मनुष्य उसके सेवन से सब रोगों का नाश करें ॥ २ ॥

सर्वतः (तक्मानम्) जीवनस्य क्लेशकारिणं ज्वरम् (सर्वम्) (नाशय) दूरी-कुरु (सर्वाः) (च) (यातुधान्यः) दुःखदायिनीः पीडाः ॥

२—(त्रीणि) (ते) तव (कुष्ठ) म० १ । हे औषधविशेष (नामानि) (नद्यमारः) नदी-यत् । नद्यां भवानां रोगाणां मारकः (नद्यरिषः) नद्यां भवानां रोगाणां हन्ता (नद्य) हे नद्यां भव (अयम्) सः (पुरुषः) (रिषत्) रोगान् नाशयेत् (यस्मै) रोगिणे (परिब्रवीमि) औषधप्रयोगेण कथयामि (त्वा) कुष्ठम् (सायंप्रातः) सायं प्रातश्च (अथो) अपि च (दिवा) दिवसकाले ॥

जीवला नाम ते माता जीवन्तो नाम ते पिता। नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥३

जीवला। नाम। ते। माता। जीवन्तः। नाम। ते। पिता॥ नद्य। अयम्। पुरुषः। रिषत्॥ यस्मै। परि-ब्रवीमि। त्वा। सायम्-प्रातः। अथो इति। दिवा ॥ ३ ॥

भाषार्थ—[हे कुष्ठ!] (जीवला) जीवला [जीवन देने वाली] (नाम) नाम (ते) तेरी (माता) माता [बनाने वाली पृथिवी] है, (जीवन्तः) जीवन्त [जिलाने वाला] (नाम) नाम (ते) तेरा (पिता) पिता [पालने वाला सूर्य वा मेघ] है। (नद्य) हे नद्य! [नदी में उत्पन्न कुष्ठ] (अयम्) वह······[मन्त्र २]॥ ३॥

भावार्थ—कुष्ठ औषध पृथिवी और सूर्य वा मेघ के सम्बन्ध से उत्पन्न होकर अनेक कठिन रोगों का नाश करता है॥ ३॥

इस मन्त्र का मिलान करो—अ० १। २४। ३। तथा ८। २। ६॥

उत्तमो अस्योषधीनामनड्वान् जगतामिव व्याघ्रः श्वपदामिव। नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा सायंप्रातरथो दिवा ॥ ४ ॥

उत्-तमः। असि। ओषधीनाम्। अनड्वान्। जगताम्-इव॥ व्याघ्रः। श्वपदाम्-इव। नद्य। अयम्। पुरुषः। रिषत्॥ यस्मै। परि-ब्रवीमि। त्वा। सायम्-प्रातः। अथो इति। दिवा ॥ ४ ॥

३—(जीवला) अ० ८। २। ६। जीव+ला दाने—क, टाप्। जीवनप्रदा (नाम) (ते) तव (माता) निर्मात्री पृथिवी (जीवन्तः) तॄभूवहिवसि०। उ० ३। १२८। जीव प्राणधारणे—झच्। जीवयिता (नाम) (ते) तव (पिता) पालकः सूर्यो मेघो वा। अन्यत् पूर्ववत्॥

भाषार्थ—[हे कुष्ठ !] तू (ओषधीनाम्) ओषधियों में (उत्तमः) उत्तम (असि) है, (इव) जैसे (जगताम्) गतिशीलों [गौ आदि पशुओं] में (अनड्वान्) रथ ले चलने वाला बैल और (इव) जैसे (श्वपदाम्) कुत्ते के समान पैर वाले हिंसक जन्तुओं में (व्याघ्रः) बाघ [है] । (नद्य) हे नद्य [नदी में उत्पन्न कुष्ठ] (अयम्) वह......[म० २] ॥ ४ ॥

भावार्थ—स्पष्ट है ॥ ४ ॥

इस मन्त्र का प्रथम भाग आ चुका है—अ० ८ । ५ । ११ ॥

त्रिः शाम्बुभ्यो अङ्गिरेभ्यस्त्रिरादित्येभ्यस्परि । त्रिर्जातो विश्वदेवेभ्यः । स कुष्ठो विश्वभेषजः । साकं सोमेन । तिष्ठति । तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥ ५ ॥

त्रिः । शाम्बु-भ्यः । अङ्गिरेभ्यः । त्रिः । आदित्येभ्यः । परि । त्रिः । जातः । विश्व-देवेभ्यः ॥ सः । कुष्ठः । विश्व-भेषजः ॥ साकम् । सोमेन । तिष्ठति ॥ तक्मानम् । सर्वम् । नाशय । सर्वाः । च । यातु-धान्यः ॥ ५ ॥

भाषार्थ—(शाम्बुभ्यः) उपाय करने वाले (अङ्गिरेभ्यः) ज्ञानियों के लिये (त्रिः) तीन बार [बालकपन, यौवन और बुढ़ापे में], (आदित्येभ्यः) अखण्ड ब्रह्मचारियों के लिये (त्रिः) तीनबार [बालकपन आदि में] और (विश्वदेवेभ्यः) सब विद्वानों के लिये (त्रिः) तीन बार [बालकपन आदि में]

४—(उत्तमः) श्रेष्ठः (असि) भवसि (ओषधीनाम्) ओषधीनां मध्ये (अनड्वान्) रथवाहको वृषभः (जगताम्) गतिशीलानां गवादिपशूनां मध्ये (इव) (व्याघ्रः) हिंस्रजन्तुविशेषः (श्वपदाम्) शुन इव पदानि येषां तेषां हिंस्रपशूनां मध्ये (इव) । अन्यत् पूर्ववत् ॥

५—(त्रिः) त्रिवारम्, बाल्ययौवनवार्धकेषु (शाम्बुभ्यः) कृवापा० । उ० १ । १ । शम्ब सम्बन्धने गतौ च—उण् । उपायशीलेभ्यः (अङ्गिरेभ्यः) अशेर्नित् । उ० १ । ५२ । अगि गतौ-किरच् नित् । विज्ञानिभ्यः (त्रिः) (आदित्येभ्यः) अखण्डव्रतिभ्यः (परि) सर्वतः (त्रिः) (जातः) प्रकटीभूतः (विश्वदेवेभ्यः)

(परि) सब प्रकार (जातः) प्रकट हुआ (सः) वह (विश्वभेषजः) सर्वौषध (कुष्ठः) कुष्ठ [मन्त्र १] (सोमेन साकम्) सोमरस के साथ (तिष्ठति) ठहरता है [सोम के समान गुणकारी है] । तू (सर्वम्) सब (तक्मानम्) जीवन के कष्ट देने वाले ज्वर को (च) और (सर्वाः) सब (यातुधान्यः) दुःखदायिनी पीड़ाओं को (नाशय) नाश करदे ॥ ५ ॥

भावार्थ—यह कुष्ठ महौषध विद्वानों के लिये बालकपन, यौवन और बुढ़ापे तीनों पनों में सोमरस के समान स्वास्थ्य वर्द्धक है ॥ ५ ॥

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति ।
तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥ ६ ॥

अश्वत्थः । देव-सदनः । तृतीयस्याम् । इतः । दिवि ॥
तत्र । अमृतस्य । चक्षणम् । ततः । कुष्ठः । अजायत ॥
सः । कुष्ठः । विश्व-भेषजः । साकम् । सोमेन । तिष्ठति ॥
तक्मानम् । सर्वम् । नाशय । सर्वाः । च । यातु-धान्यः ॥६॥

भाषार्थ—(देवसदनः) विद्वानों के बैठने योग्य (अश्वत्थः) वीरों के ठहरने का देश (तृतीयस्याम्) तीसरी [निकृष्ट और मध्य अवस्था से परे, श्रेष्ठ] (दिवि) अवस्था में (इतः) प्राप्त होता है । (तत्र) उस में (अमृतस्य) अमृत [अमरपन] का (चक्षणम्) दर्शन है, (ततः) उस से (कुष्ठः) कुष्ठ

सर्वविद्वद्भ्यः (सः) (कुष्ठः) म० १ । औषधविशेषः (विश्वभेषजः) सर्वरोगौषधः (सोमेन साकम्) सोमसमानप्रभावेण सह (तिष्ठति) वर्तते । अन्यत् पूर्ववत्—म० १ ॥

६—(अश्वत्थः—अजायत) इति व्याख्यातः—अ० ५ । ४ । ३ तथा ६ । ९५ । १, पुनरपि शब्दार्थः क्रियते (अश्वत्थः) अ० ३ । ६ । १ । अश्वानां कर्मसु व्यापनशीलानां वीराणां स्थितिदेशः (देवसदनः) महात्मनां स्थितियोग्यः (तृतीयस्याम्) निकृष्टमध्यमाभ्यां तृतीयस्यां श्रेष्ठायाम् (इतः) इण गतौ-क्त । प्राप्तः (दिवि) गतौ । अवस्थायाम् (तत्र) तस्मिन् स्थाने (अमृतस्य) अमर-

[मन्त्र १] (अजायत) प्रकट हुआ है। (सः) वह (विश्वभेषजः) सर्वौषध (कुष्ठः) कुष्ठ... [म० ५] ॥ ६ ॥

भावार्थ—जहां पर विद्वान् वीरों का निवास होता है, वहां कुष्ठ महौषध के उपयोग से आनन्द बढ़ता है ॥ ६ ॥

इस मन्त्र के पहिले दो भाग कुछ भेद से आचुके हैं—अ० ५। ४। ३। और ६। ९५। १ ॥

हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि ।
तत्रामृतस्य चक्षणं ततः । कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति ।
तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥ ७ ॥

हिरण्ययी । नौः । अचरत् । हिरण्य-बन्धना । दिवि ॥
तत्र । अमृतस्य । चक्षणम् । ततः । कुष्ठः । अजायत ॥
सः । कुष्ठः । विश्व-भेषजः । साकम् । सोमेन । तिष्ठति ॥
तक्मानम् । सर्वम् । नाशय । सर्वाः । च । यातु-धान्यः ॥७॥

भाषार्थ—(हिरण्ययी) तेज वाली [अग्नि वा बिजुली वा सूर्य से चलने वाली], (हिरण्यबन्धना) तेजोमय बन्धनों वाली (नौः) नाव (दिवि) व्यवहार में (अचरत्) चलती थी। (तत्र) उस में (अमृतस्य) अमृत [अमरपन] का (चक्षणम्) दर्शन है, (ततः) उससे (कुष्ठः) कुष्ठ [मन्त्र १] (अजायत) प्रकट हुआ है। (सः) वह (विश्वभेषजः) सर्वौषध (कुष्ठः) कुष्ठ......[म० ५] ॥

भावार्थ—जहां पर विद्वान् लोग विज्ञान प्राप्त करके नाव आदि यानों को अग्नि आदि से चलाते हैं, वहां कुष्ठ महौषधि बड़ा उपकारी होता है ॥ ७ ॥

णस्य। चिरजीवनस्य (चक्षणम्) दर्शनम् (ततः) तस्मात् स्थानात् (कुष्ठः) म० १। औषधविशेषः (अजायत) प्रादुरभवत्। अन्यत् पूर्ववत्—म० ५ ॥

७—(हिरण्ययी) हिरण्यमयी। तेजोमयी। अग्निना विद्युता सूर्येण वा प्रयुक्ता (नौः) तरणिः (अचरत्) अगमत् (हिरण्यबन्धना) तेजोमयबन्धनयुक्ता। अन्यत् पूर्ववत्—म० ६ ॥

इस मन्त्रके पहिले दो भाग कुछ भेद से आ चुके हैं—अ० ५ । ४ । ४। तथा ६ । ९५ । २ ॥

यत्र नावप्रभ्रंशनं यत्र हिमवतः शिरः ।
तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ।
स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति ।
तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ॥ ८ ॥

यत्र । न । अव-प्रभ्रंशनम् । यत्र । हिम-वतः । शिरः ॥
तत्र । अमृतस्य । चक्षणम् । ततः । कुष्ठः । अजायत ॥
सः । कुष्ठः । विश्व-भेषजः । साकम् । सोमेन । तिष्ठति ॥
तक्मानम् । सर्वम् । नाशय । सर्वाः । च । यातु-धान्यः ॥८॥

भाषार्थ—(यत्र) जहां (अवप्रभ्रंशनम्) नीचे गिर जाना (न) नहीं है, और (यत्र) जहां (हिमवतः) हिम वाले स्थान का (शिरः) शिर है । (तत्र) उस में (अमृतस्य) अमृत [अमरपन] का (चक्षणम्) दर्शन है, (ततः) उससे (कुष्ठः) कुष्ठ [मन्त्र १] (अजायत) प्रकट हुआ है। (सः) वह (विश्व-भेषजः) सर्वौषध (कुष्ठः) कुष्ठ......[म० ५] ॥ ८ ॥

भावार्थ—हिम पृथिवी से ऊंचे स्थान पर गिरता है। जहां पर जो मार्ग में बिना फिसले ऊंचा चढ़ जाता है,वहां वह कुष्ठ महौषध को पाकर प्रसन्नहोता है॥८

यं त्वा वेद पूर्व इक्ष्वाको यं वा त्वा कुष्ठ काम्यः ।
यं वा वसो यमात्स्यस्तेनासि विश्वभेषजः ॥ ९ ॥

यम् । त्वा । वेद । पूर्वः । इक्ष्वाकः । यम् । वा । त्वा । कुष्ठ। काम्यः ॥ यम् । वा । वसः । यम् । आत्स्यः । तेन । असि । विश्व-भेषजः ॥ ९ ॥

८—(यत्र) यस्मिन् स्थाने (न) निषेधे (अवप्रभ्रंशनम्) भ्रंशु अधः-पतने। इतस्ततोऽधः पतनम् (यत्र) (हिमवतः) हिमयुक्तदेशस्य (शिरः) शिखरम्। अन्यत् पूर्ववत् ॥

भाषार्थ—(कुष्ठ) हे कुष्ठ ! [मन्त्र १] (यम् त्वा) जिस तुझ को (पूर्वः) पहिला [मुख्य] (इक्ष्वाकुः) ज्ञान को प्राप्त होने वाला, (वा) अथवा (यम् त्वा) जिस तुझ को (काम्यः) कामनायुक्त, (वा) अथवा (यम्) जिस को (वसः) निवास देने वाला,[वा] (यम्) जिस को (आत्स्यः) सब ओर को सदा चलने वाला [पुरुष] (वेद) जानता है, (तेन) उस [कारण] से तू (विश्वभेषजः) सर्वौषध (असि) है ॥ ९ ॥

भावार्थ—बड़े बड़े विद्वान्, पुरुषार्थी लोग परीक्षा करके कुष्ठ को सर्वौषध जानते हैं ॥ ९ ॥

शीर्ष॒लो॒कं तृ॒तीय॑कं सद॒न्दिर्य॑श्च हाय॒नः ।

त॒क्मानं॑ विश्वधावीर्याधराञ्चं॒ परा॑ सुव ॥ १० ॥

शी॒र्ष॒-लो॒कम् । तृ॒तीय॑कम् । स॒द॒म्-दिः । यः । च॒ । हा॒य॒नः ॥

त॒क्मान॑म् । वि॒श्व॒धा॒-वी॒र्य॒ । अ॒ध॒राञ्च॑म् । परा॑ । सु॒व॒ ॥१०॥

भाषार्थ—(शीर्षलोकम्) शिर में स्थान वाले [शिर में पीड़ा करने वाले], (तृतीयकम्) तिजारी, और (यः) जो (सदन्दिः) सदा फूटन करने वाला (च) और (हायनः) प्रतिवर्ष होने वाला [ज्वर] है । (विश्वधावीर्य)

९—(यम्) (त्वा) त्वां कुष्ठम् (वेद) वेत्ति (इक्ष्वाकुः) इषेः क्सुः । उ० ३ । १५७ । इष गतौ—क्सु+अक गतौ— अण् । इक्षु ज्ञानम् अकति गच्छति प्राप्नोतीति सः । ज्ञानप्राप्तः पुरुषः (यम्)(वा) (त्वा) (कुष्ठ) म० १ । हे औषधविशेष (काम्यः) कामनायुक्तः (यम्) (वा) (वसः) वस निवासे—अच् । निवासयिता (यम्) (आत्स्यः) ऋतन्यञ्जिवन्यञ्ज० । उ० ४ । २ । आङ्+अत सातत्यगमने—स्यन्प्रत्ययः । समन्तात्सदागतिशीलः (तेन) कारणेन (असि) (विश्वभेषजः) सर्वौषधः ॥

१०—(शीर्षलोकम) शिरसि स्थानयुक्तम् । मस्तकपीडकम् (तृतीयकम्) अ० १ । २५ । ४ । स्वार्थे कन् । तृतीयदिने आगच्छन्तम् (सदन्दिः) अ० ५ । २२ । १३ । सदम्+दाप् छेदने दो अवखण्डने वा—कि । सदा खण्डकम् । पीडकम् (यः) (च) (हायनः) अ० ६ । १४ । ३ । हायन-अर्श आद्यच् । प्रतिवर्षभवः (तक्मानम्) कृच्छ्रजीवनकरं ज्वरम् (विश्व-

हे सब प्रकार सामर्थ्य वाले [कुष्ठ !] (तक्मानम्) उस दुःखित जीवन करने वाले ज्वर को (अधराञ्चम्) नीचे स्थान में (परा सुव) दूर गिरा दे ॥ १० ॥

भावार्थ—कुष्ठ महौषध के सेवन से सब प्रकार के ज्वर नष्ट होते हैं१०

इस मन्त्र का उत्तरार्द्ध आचुका है—अ० ५ । २२ । ३ ॥

सूक्तम् ४० ॥

१-४ ॥ १ बृहस्पतिः; २ आपः; ३, ४ अश्विनौ देवते॥१ परानुष्टुप् त्रिष्टुप्; २ विराडार्षी बृहती; ३ अनुष्टुप्; ४ गायत्री ॥

बुद्धिवर्धनोपदेशः—बुद्धि बढ़ाने का उपदेश ॥

यन्मे छिद्रं मनसो यच्च वाचः सरस्वती मन्युमन्तं जगाम ।
विश्वैस्तद् देवैः सह संविदानः सं दधातु बृहस्पतिः ॥ १ ॥

यत् । मे । छिद्रम् । मनसः । यत् । च । वाचः । सरस्वती । मन्यु-मन्तम् । जगाम ॥ विश्वैः । तत् । देवैः । सह । सम्-विदानः । सम् । दधातु । बृहस्पतिः ॥ १ ॥

भाषार्थ—(यत्) जो (मे) मेरे (मनसः) मन का (च) और (यत्) जो (वाचः) वाणी का (छिद्रम्) दोष है, [जिससे] (सरस्वती) सरस्वती [उत्तम वेदविद्या] (मन्युमन्तम्) क्रोधयुक्त [व्यवहार] को (जगाम) प्राप्त हुयी है । (तत्) उस [दोष] को (विश्वैः) सब (देवैः सह) उत्तम गुणों के साथ (संविदानः) मिलता हुआ (बृहस्पतिः) बड़े आकाश आदि का पालक परमेश्वर (सं दधातु) सन्धि युक्त करे ॥ १ ॥

धात्वीर्य) हे सर्वथा सामर्थ्योपेत (अधराञ्चम्) अ० ५ । २२ । ३ । निम्नदेशम् (परा) दूरे (सुव) प्रेरय ॥

१-(यत्) (मे) मम (छिद्रम्) दोषम् (मनसः) हृदयस्य (यत्) (च) (वाचः) वाण्याः (सरस्वती) विज्ञानवती वेदविद्या (मन्युमन्तम्) क्रोधवन्तं व्यवहारम् (जगाम) प्राप (विश्वैः) सर्वैः (तत्) छिद्रम् (देवैः) उत्तमगुणैः (सह) (संविदानः) संगच्छमानः (सं दधातु) सन्धानं करोतु (बृहस्पतिः) बृहतामाकाशादीनां पालक ईश्वरः ॥

भावार्थ—जब मनुष्य मानसिक वा वाचिक दोष से विद्या देवी को क्रोधित कर देवे, वह परमात्मा की शरण लेकर अपनी न्यूनतायें पूरी करे ॥ १॥

इस मन्त्र का मिलान करो-यजु० ३६ । २ ॥

मा न॒ आपो॑ मे॒धां मा ब्रह्म॒ प्र म॑थिष्टन ।

सु॒ष्य॒दा यू॒यं स्य॑न्दध्व॒मुप॑हूतो॒ऽहं सु॒मेधा॑ वर्च॒स्वी ॥ २ ॥

मा । नः॒ । आपः॑ । मे॒धाम् । मा । ब्रह्म॑ । प्र । म॒थि॒ष्ट॒न॒ ॥ सु॒-स्य॒दाः । यू॒यम् । स्य॒न्द॒ध्व॒म् । उप॑-हूतः । अ॒हम् । सु॒-मेधाः॑ । व॒र्च॒स्वी ॥ २ ॥

भाषार्थ—(आपः) जल [के समान शान्त स्वरूप प्रजाओ] तुम (मा) न (नः) हमारी (मेधाम्) धारणावती बुद्धि को और (मा) न (ब्रह्म) वेदज्ञान को (प्र मथिष्टन) नष्ट करो । (सुष्यदाः) सहज में बहने वाले (यूयम्) तुम (स्यन्दध्वम्) बहते जाओ । (उपहूतः) आवाहन किया हुआ (अहम्) मैं (सुमेधाः) सुन्दर बुद्धि वाला और (वर्चस्वी) बड़ा प्रतापी [हो जाऊं] २

भावार्थ—जैसे प्रभूत जल बे रोक टोक सहज में बहता चला जाता है, वैसे ही मनुष्य सब विघ्नों को हटाकर अपने सन्तान आदि को बुद्धिमान् और प्रतापी बनावें ॥ २ ॥

मा नो॑ मे॒धां मा नो॑ दी॒क्षां मा नो॑ हिंसिष्टं॒ यत् तपः॑ ।

शि॒वा नः॒ शं स॒न्त्वायु॑षे शि॒वा भ॑वन्तु मा॒तरः॑ ॥ ३ ॥

मा । नः॒ । मे॒धाम् । मा । नः॒ । दी॒क्षाम् । मा । नः॒ । हिं॒सि॒-

---

२—(मा) निषेधे (नः) अस्माकम् (आपः) जलानीव शान्तस्वभावाः प्रजाः (मेधाम्) धारणावतीं बुद्धिम् (मा) निषेधे (ब्रह्म) वेदज्ञानम् (प्र मथिष्टन) मथे विलोडने—लाटि छान्दसं रूपम् । प्रमथत । प्रध्वंशं कुरुत (सुष्यदाः) सु + स्यन्दू प्रस्रवणे—क, टाप् । सहजस्रवणशीलाः (यूयम्) (स्यन्दध्वम्) प्रवहत (उपहूतः) आहूतः (अहम्) (सुमेधाः) अ० ५ । ११ । १ । सु + मेधा-असिच् । सुबुद्धियुक्तः (वर्चस्वी) प्रतापी, भूयासमिति शेषः ॥

ष्टम् । यत् । तपः ॥ शिवाः । नः । शम् । सन्तु । आयुषे ।
शिवाः । भवन्तु । मातरः ॥ ३ ॥

भाषार्थ—[हे माता पिता ! म० ४] तुम दोनों (न) न तौ (नः) हमारी (मेधाम्) धारणावती बुद्धि को, (मा) न (नः) हमारी (दीक्षाम्) दीक्षा [नियम और व्रत की शिक्षा] को और (मा) न (नः) हमारा (यत्) जो कुछ (तपः) तप [ब्रह्मचर्यादि] है, [उसको] (हिंसिष्टम्) नष्ट करो । (नः) हमारे (आयुषे) जीवन के लिये [वे प्रजायें] (शिवाः) कल्याण-कारिणी और (शम्) शान्तिदायिनी (सन्तु) होवें, और (शिवाः) कल्याण-कारिणी (मातरः) माताओं [के समान] (भवन्तु) होवें ॥ ३ ॥

भावार्थ—माता पिता ऐसा प्रयत्न करें कि उनके सन्तान बुद्धिमान्, धर्मात्मा और सर्वहितैषी होवें, जिससे उन से सब लोग माता के समान प्रीति करें ॥ ३ ॥

यह मन्त्र कुछ भेद से महर्षि दयानन्दकृतसंस्कारविधि वानप्रस्थप्रक-रण में व्याख्यात है ॥

या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः ।
तामस्मे रासतामिषम् ॥ ४ ॥
या । नः । पीपरत् । अश्विना । ज्योतिष्मती । तमः । तिरः ॥
ताम् । अस्मे । रासताम् । इषम् ॥ ४ ॥

भाषार्थ—(या) जो (ज्योतिष्मती) उत्तम ज्योति वाली [अन्न सामग्री] (तमः) अन्धकार का (तिरः) तिरस्कार करके (नः) हमें (पीप-

---

३—(मा) निषेधे (नः) अस्माकम् (मेधाम्) धारणावतीं बुद्धिम् (मा) (नः) (दीक्षाम्) नियमव्रतयोः शिक्षाम् (मा) (नः) (हिंसिष्टम्) नाशयतं युवाम् (यत्) (तपः) ब्रह्मचर्यादि तपश्चरणम् (शिवाः) मङ्गलकारिण्यः प्रजाः (नः) अस्माकम् (शम्) शान्तिदायिन्यः (सन्तु) (आयुषे) जीव-नाय (शिवाः) मङ्गलप्रदाः (भवन्तु) (मातरः) जननीवद्धितकारिण्यः ॥

४—(या) इट् । अन्नसामग्री (नः) अस्मान् (पीपरत्) पूरयेत् (अश्विना) व्यवहारेषु व्यापकौ मातापितरौ (ज्योतिष्मती) प्रकाशवती (तमः) अन्धकारम्

रत्) पूर्ण करे, (अश्विना) व्यवहारों में व्यापक दोनों [माता पिता] (ताम्) उस (इषम्) अन्न सामग्री को (अस्मे) हमें (रासताम्) दिया करें ॥४॥

भावार्थ—माता पिता सन्तानों को ऐसा विद्वान् और बलवान् बनावें कि जिससे उत्तम अन्न के भोगने से नेत्रों में कभी अन्धकार न छाये, किन्तु सदा ज्योति बनी रहे ॥ ४ ॥

यह मन्त्र कुछ भेद से ऋग्वेद में है-१ । ४६ । ६ ॥

सूक्तम् ४१ ॥

मन्त्रः १ ॥ ऋषयो देवताः ॥ त्रिष्टुप् छन्दः ॥

कल्याणप्राप्त्युपदेशः—कल्याण की प्राप्ति का उपदेश ॥

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ॥ १ ॥

भद्रम् । इच्छन्तः । ऋषयः । स्वः-विदः । तपः । दीक्षाम् । उप-निसेदुः । अग्रे ॥ ततः । राष्ट्रम् । बलम् । ओजः । च । जातम् । तत् । अस्मै । देवाः । उप-संनमन्तु ॥ १ ॥

भाषार्थ—(भद्रम्) कल्याण [श्रेष्ठ वस्तु] (इच्छन्तः) चाहते हुये, (स्वर्विदः) सुख को प्राप्त होने वाले (ऋषयः) ऋषियों [वेदार्थ जानने वालों] ने (तपः) तप [ब्रह्मचर्य अर्थात् वेदाध्ययन जितेन्द्रियतादि] और (दीक्षाम्) दीक्षा [नियम और व्रत की शिक्षा] का (अग्रे) पहिले (उपनिषेदुः) अनुष्ठान किया है । (ततः) उस से (राष्ट्रम्) राज्य, (बलम्) बल [सामर्थ्य]

(तिरः) तिरस्कृत्य (ताम्) तादृशीम् (अस्मे) अस्मभ्यम् (रासताम्) प्रयच्छतां तौ (इषम्) इषम्, अन्ननाम–निघ० २ । ७ । इष्यमानामन्नसामग्रीम् ॥

१—(भद्रम्) कल्याणम् (इच्छन्तः) कामयमानाः (ऋषयः) वेदार्थज्ञानिनः (स्वर्विदः) सुखं लभमानाः (तपः) ब्रह्मचर्यादि तपश्चरणम् (दीक्षाम्) नियमव्रतयोः शिक्षाम् (उपनिषेदुः) षद्लृ गतौ–लिट् । अनुष्ठितवन्तः । सेवितवन्तः (अग्रे) आदौ (ततः) तस्मात् कारणात् (राष्ट्रम्) राज्यम् (बलम्) सामर्थ्यम् (ओजः) पराक्रमः (च) (जातम्) निष्पन्नम् (तत्) भद्रम्

(च) और (ओजः) पराक्रम (जातम्) सिद्ध हुआ है, (तत्) उस [कल्याण] को (अस्मै) इस पुरुष के लिये (देवाः) विद्वान् लोग (उपसंनमन्तु) झुका देवें ॥ १ ॥

भावार्थ—विद्वान् लोगों ने पराक्रम से पहिले वेदाध्ययन, जितेन्द्रियता आदि तप का अभ्यास करके महासुख पाया है, इस लिये ऋषि लोग प्रयत्न करें कि सब मनुष्य विद्वान् होकर महासुख को प्राप्त होवें ॥ १ ॥

यह मन्त्र महर्षि दयानन्दकृत संस्कारविधि, वानप्रस्थाश्रम तथा संन्यासाश्रम प्रकरण में व्याख्यात है ॥

सूक्तम् ४२ ॥

१-४ ॥ ब्रह्म देवता ॥ १ अनुष्टुप्; २ विराट् पथ्या पङ्क्तिः; ३ निचृत् त्रिष्टुप्; ४ विराडार्षी जगती ॥

ब्रह्मस्तुत्युपदेशः—वेद की स्तुति का उपदेश ॥

ब्रह्म होता ब्रह्म युज्ञा ब्रह्मणा स्वरवो मिताः ।
अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोऽन्तर्हितं हविः ॥ १ ॥

ब्रह्म । होता । ब्रह्म । युज्ञाः । ब्रह्मणा । स्वरवः । मिताः ॥
अध्वर्युः । ब्रह्मणः । जातः । ब्रह्मणः । अन्तः-हितम् । हविः १

भाषार्थ—(ब्रह्म = ब्रह्मणा) वेद द्वारा (होता) होता [हवनकर्ता], (ब्रह्म) वेद द्वारा (यज्ञाः) अनेक यज्ञ होते हैं, (ब्रह्मणा) वेद द्वारा (स्वरवः) यज्ञस्तम्भ (मिताः) खड़े किये जाते हैं। (ब्रह्मणः) वेद से (अध्वर्युः) यज्ञ कर्ता (जातः) प्रसिद्ध होता है, (ब्रह्मणः) वेद के (अन्तर्हितम्) भीतर

(अस्मै) पुरुषाय (देवाः) विद्वांसः (उपसंनमन्तु) आदरेण नमयन्तु । प्रापयन्तु ॥

१—(ब्रह्म) तृतीयार्थे प्रथमा । ब्रह्मणा । वेदद्वारा (होता) हवनकर्ता (ब्रह्म) वेदद्वारा (यज्ञाः) यज्ञव्यवहाराः (ब्रह्मणा) वेदद्वारा (स्वरवः) यूपाः । यज्ञस्तम्भाः (मिताः) डु मिञ् प्रक्षेपणे—क्त । प्रक्षिप्ताः । स्थापिताः (अध्वर्युः) ऋत्विक् (ब्रह्मणः) वेदात् (जातः) प्रसिद्धो भवति (ब्रह्मणः)

रक्खा हुआ (हविः) हवि [हवन विधान] है ॥ १ ॥

भावार्थ—वेद द्वारा ही याजक, यज्ञव्यवहार और यज्ञविधान निश्चित होते हैं ॥ १ ॥

यह सूक्त कुछ भेद से महर्षि दयानन्दकृत संस्कारविधि संन्यासाश्रम प्रकरण में उद्धृत है ॥

ब्रह्म स्रुचो घृतवतीर्ब्रह्मणा वेदिरुद्धिता । ब्रह्म यज्ञस्य तत्त्वं च ऋत्विजो ये हविष्कृतः । शमिताय स्वाहा ॥ २ ॥

ब्रह्म । स्रुचः । घृत-वतीः । ब्रह्मणा । वेदिः । उत्-हिता ॥ ब्रह्म । यज्ञस्य । तत्त्वम् । च । ऋत्विजः । ये । हविः-कृतः ॥ शमिताय । स्वाहा ॥ २ ॥

भाषार्थ—(ब्रह्म=ब्रह्मणा) वेद द्वारा (घृतवतीः) घी वाली (स्रुचः) स्रुचायें [चमचे], (ब्रह्मणा) वेद द्वारा (वेदिः) वेदी (उद्धिता) स्थिर की गयी है । (ब्रह्म) वेद द्वारा (यज्ञस्य) यज्ञ का (तत्त्वम्) तत्त्व (च) और (ये) जो (हविष्कृतः) हवन करने वाले (ऋत्विजः) ऋत्विज हैं [वे भी स्थिर किये हैं] । (शमिताय) शान्तिकारक [वेद] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] है ॥ २ ॥

भावार्थ—वेद से ही यज्ञ के साधनों और यज्ञकर्ताओं का विधान किया जाता है ॥ २ ॥

वेदस्य (अन्तर्हितम्) मध्ये धृतम् । प्रणीतम् (हविः) हवनविधानम् ॥

२—(ब्रह्म) ब्रह्मणा । वेदद्वारा (स्रुचः) यज्ञपात्राणि । चमसाः (घृतवतीः) घृतवत्यः । घृतेन पूर्णाः (ब्रह्मणा) वेदद्वारा (वेदिः) यज्ञभूमिः (उद्धिता) सम्पादिता (ब्रह्म) ब्रह्मणा । वेदद्वारा (यज्ञस्य) यागस्य (तत्त्वम्) स्वरूपम् । याथातथ्यम् (च) (ऋत्विजः) होतारः (ये) (हविष्कृतः) यज्ञकर्तारः (शमिताय) हृश्याभ्यामितन् । उ० ३ । ९३ । शमु उपशमे-इतन् । शान्तिकारकाय वेदाय (स्वाहा) सुवाणी ॥

अं॒हो॒मुचे॒ प्र भ॑रे मनी॒षामा सु॑त्रा॒व्णे॑ सुम॒तिमा॑वृणा॒नः ।
इ॒दमि॑न्द्र॒ प्रति॑ ह॒व्यं गृ॑भाय स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामाः॑॥३

अं॒हः॒ऽमुचे॑ । प्र । भ॒रे॒ । म॒नी॒षाम् । आ । सु॒ऽत्राव्णे॑ । सु॒ऽम॒तिम् । आ॒ऽवृ॒णा॒नः ॥ इ॒मम् । इ॒न्द्र॒ । प्रति॑ । ह॒व्यम् । गृ॒भा॒य॒ । स॒त्याः । स॒न्तु॒ । यज॑मानस्य । कामाः॑ ॥ ३ ॥

भाषार्थ—(सुमतिम्) सुमति (आवृणानः) मांगता हुआ मैं (अंहोमुचे) कष्ट से छुड़ाने हारे, (सुत्राव्णे) बड़े रक्षक [परमात्मा] के लिये (मनीषाम्) अपनी मनन शक्ति को (आ) सब ओर से (प्र भरे) समर्पण करता हूं । (इन्द्र) हे इन्द्र ! [परम ऐश्वर्य वाले परमात्मन्] (इमम्) इस (हव्यम्) ग्राह्य स्तुति को (प्रति गृभाय) स्वीकार कर,(यजमानस्य) यजमान के (कामाः) मनोरथ (सत्याः) सत्य [पूर्ण] (सन्तु) होवें ॥ ३ ॥

भावार्थ—मनुष्य को योग्य है कि परमात्मा को आत्मसमर्पण करके सुमति के साथ अपने उत्तम मनोरथ सिद्ध करे ॥ ३ ॥

अं॒हो॒मुचं॑ वृष॒भं य॒ज्ञिया॑नां वि॒राज॑न्तं प्रथ॒मम॑ध्व॒राणा॑म् ।
अ॒पां नपा॑तम॒श्विना॑ हुवे॒ धिय॑ इन्द्रि॒येण॑ त इन्द्रि॒यं द॑त्त॒मोजः॑॥४

अं॒हः॒ऽमुच॑म् । वृ॒ष॒भम् । य॒ज्ञिया॑नाम् । वि॒ऽराज॑न्तम् । प्र॒थ॒मम् । अ॒ध्व॒राणा॑म् ॥ अ॒पाम् । नपा॑तम् । अ॒श्विना॑ । हु॒वे॒ । धियः॑ । इ॒न्द्रि॒येण॑ । ते॒ । इ॒न्द्रि॒यम् । द॒त्त॒म् । ओजः॑ ॥ ४ ॥

३—(अंहोमुचे) कष्टाद् मोचयित्रे (प्रभरे) समर्पयामि (मनीषाम्) अ० ५ । ६ । ८ । कृतॄभ्यामीषन् । उ० ४ । २६ । मनु अवबोधने-ईषन्, टाप् । मननशक्तिम् । प्रज्ञाम् (आ) समन्तात् (सुत्राव्णे) सु+त्रैङ् पालने-वनिप् । महारक्षकाय परमेश्वराय (सुमतिम्) कल्याणबुद्धिम् (आवृणानः) याचमानः (इमम्) (इन्द्र) हे परमैश्वर्यवन् परमात्मन् (हव्यम्) ग्राह्यं स्तोमम् (प्रति गृभाय) प्रतिगृहाण । स्वीकुरु (सत्याः) यथार्थाः । पूर्णाः (सन्तु) (यजमानस्य) (कामाः) मनोरथाः ॥

भाषार्थ—(अंहोमुचम्) कष्ट से छुड़ाने हारे, (यज्ञियानाम्) पूजा योग्यों में (वृषभम्) श्रेष्ठ, (अध्वराणाम्) हिंसा रहित यज्ञों के (विराजन्तम्) विशेष शोभायमान (प्रथमम्) मुख्य, (अपाम्) प्रजाओं के (नपातम्) न गिराने वाले [बड़े रक्षक, परमात्मा] को (हुवे) मैं बुलाता हूं। [हे उपासक !] (अश्विना) व्यवहारों में व्यापक माता पिता दोनों (इन्द्रियेण) परम ऐश्वर्यवान् पुरुष के पराक्रम से (ते) तुझ को (धियः) बुद्धियां, (इन्द्रियम्) ऐश्वर्य और (ओजः) पराक्रम (दत्तम् = दत्ताम्) देवें ॥ ४ ॥

भावार्थ—मनुष्य माता पिता आचार्य आदि की शिक्षा से बुद्धिमान्, ऐश्वर्यवान् और पराक्रमी होकर परमात्मा की भक्ति करके उन्नति करें ॥ ४ ॥

सूक्तम् ४३ ॥

१—८ ॥ ब्रह्म देवता ॥ भुरिग् ब्राह्मी गायत्री ॥

ब्रह्मप्राप्त्युपदेशः—ब्रह्म की प्राप्ति का उपदेश ॥

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह । अग्निर्मा तत्र नयत्वग्निर्मेधा दधातु मे । अग्नये स्वाहा ॥ १ ॥

यत्र । ब्रह्म-विदः । यान्ति । दीक्षया । तपसा । सह ॥ अग्निः । मा । तत्र । नयतु । अग्निः । मेधाः । दधातु । मे ॥ अग्नये । स्वाहा ॥ १ ॥

भाषार्थ—(यत्र) जहां [सुख में] (ब्रह्मविदः) ब्रह्मज्ञानी [ईश्वर वा वेद के जानने वाले लोग] (दीक्षया) दीक्षा [नियम और व्रत की शिक्षा]

४—(अंहोमुचम्) पापाद् मोचयितारम् (वृषभम्) श्रेष्ठम् (यज्ञियानाम्) पूजनीयानाम् (विराजन्तम) विशेषेण शोभायमानम् (प्रथमम्) मुख्यम् (अध्वराणाम्) हिंसारहितानां यज्ञानाम् (अपाम्) प्रजानाम् (नपातम्) न पातयितारम् । महारक्षकम् (अश्विना) हे कर्मसु व्यापकौ मातापितरौ (हुवे) आह्वयामि (धियः) बुद्धीः (इन्द्रियेण) इन्द्रयोग्यपराक्रमेण (ते) तुभ्यम् (इन्द्रियम्) परमैश्वर्यम् (दत्तम्) दत्ताम् । प्रयच्छताम् (ओजः) पराक्रमम् ॥

१—(यत्र) यस्मिन् सुखे (ब्रह्म विदः) ईश्वरस्य वेदस्य वा वेत्तारः (यान्ति) गच्छन्ति (दीक्षया) नियमव्रतयोः शिक्षया (तपसा) ब्रह्मचर्यादित-

और (तपसा सह) तप [वेदाध्ययन, जितेन्द्रियता] के साथ (यान्ति) पहुंचते हैं। (अग्निः) अग्नि [अग्नि समान सर्वव्यापक परमात्मा] (मा) मुझे (तत्र) वहां [सुख में] (नयतु) पहुंचावे, (अग्निः) अग्नि [व्यापक परमात्मा] (मेधाः) धारणावती बुद्धियां (मे) मुझ को (दधातु) देवे। (अग्नये) अग्नि [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ १ ॥

भावार्थ—मनुष्य योगी महात्माओं के समान दीक्षा और ब्रह्मचर्य आदि व्रत से परमेश्वर और शारीरिक और आत्मिक बल में दृढ़ रहकर अनेक प्रकार बुद्धियों को बढ़ाते हुये सुख प्राप्त करें ॥ १ ॥

यह सूक्त कुछ भेद से महर्षि दयानन्दकृत संस्कारविधि संन्यासाश्रम प्रकरण में उद्धृत है ॥

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह। वायुर्मा तत्र नयतु वायुः प्राणान् दधातु मे। वायवे स्वाहा ॥ २ ॥

यत्र। ब्रह्म-विदः। यान्ति। दीक्षया। तपसा। सह ॥ वायुः। मा। तत्र। नयतु। वायुः। प्राणान्। दधातु। मे ॥ वायवे। स्वाहा ॥ २ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी ...... [मन्त्र १]। (वायुः) वायु [पवन के समान शीघ्रगामी परमात्मा] (मा) मुझ को (तत्र) वहां (नयतु) पहुंचावे, (वायुः) वायु [परमात्मा] (मे) मुझे (प्राणान्) प्राणों को (दधातु) देवे, (वायवे) वायु [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ २ ॥

पश्चरणेन (सह) (अग्निः) अग्निवत् सर्वव्यापकः परमात्मा (मा) माम् (तत्र) सुखे (नयतु) प्रापयतु (अग्निः) व्यापकः परमेश्वरः (मेधाः) धारणावतीबुद्धीः (दधातु) ददातु (मे) मह्यम् (अग्नये) परमात्मने (स्वाहा) सुवाणी ॥

२—(वायुः) वायुसमानशीघ्रगामी परमात्मा (वायुः) (प्राणान्) जीवनसाधनानि (दधातु) ददातु (मे) मह्यम् (वायवे) शीघ्रगामिने परमात्मने (स्वाहा) सुवाणी। अन्यत् पूर्ववत् ॥

भावार्थ—मन्त्र १ के समान है ॥ २ ॥

यत्र॑ ब्र॒ह्म॒विदो॒ यान्ति॑ दी॒क्षया॒ तप॑सा स॒ह ।
सूर्यो॑ मा॒ तत्र॑ नयतु॒ चक्षुः॒ सूर्यो॑ दधातु मे । सूर्या॑य॒ स्वाहा॑ ॥३॥

यत्र॑ । ब्र॒ह्म॒-विदः॑ । यान्ति॑ । दी॒क्षया॑ । तप॑सा । स॒ह ॥ सूर्यः॑ । मा॒ । तत्र॑ । न॒य॒तु॒ । चक्षुः॑ । सूर्यः॑ । द॒धा॒तु॒ । मे॒ ॥ सूर्या॑य । स्वाहा॑ ॥ ३ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी······ [मन्त्र १]। (सूर्यः) सूर्य [सूर्य के समान प्रकाशमान परमात्मा] (मा) मुझे (तत्र) वहां (नयतु) पहुंचावे, (सूर्यः) सूर्य [परमात्मा] (मा) मुझ को (चक्षुः) दर्शन सामर्थ्य (दधातु) देवे (सूर्याय) सूर्य [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ३ ॥

भावार्थ—मन्त्र १ के समान ॥ ३ ॥

यत्र॑ ब्र॒ह्म॒विदो॒ यान्ति॑ दी॒क्षया॒ तप॑सा स॒ह ।
च॒न्द्रो मा॒ तत्र॑ नयतु॒ मन॑श्च॒न्द्रो द॑धातु मे । च॒न्द्राय॒ स्वाहा॑ ४

यत्र॑ । ब्र॒ह्म॒-विदः॑ । यान्ति॑ । दी॒क्षया॑ । तप॑सा । स॒ह ॥ च॒न्द्रः । मा॒ । तत्र॑ । न॒य॒तु॒ । मनः॑ । च॒न्द्रः । द॒धा॒तु॒ । मे॒ ॥ च॒न्द्राय॑ । स्वाहा॑ ॥ ४ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी······ [मन्त्र १]। (चन्द्रः) चन्द्र [चन्द्र समान आनन्द देने वाला परमात्मा] (मा) मुझे (तत्र) वहां (नयतु) पहुंचावे, (चन्द्रः) चन्द्र [परमात्मा]

३—(सूर्यः) सूर्यवत्प्रकाशमानः परमात्मा (चक्षुः) दर्शनसामर्थ्यम् (सूर्यः) (सूर्याय) प्रकाशमानाय परमात्मने । अन्यत् पूर्ववत् ॥

४—(चन्द्रः) चन्द्र इवाह्लादकः परमात्मा (मनः) मननसामर्थ्यम

(मे) मुझको (मनः) मननसामर्थ्य (दधातु) देवे । (चन्द्राय) चन्द्र [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ४ ॥

भावार्थ—मन्त्र १ के समान है ॥ ४ ॥

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह । सोमो मा तत्र नयतु पयः सोमो दधातु मे । सोमाय स्वाहा ॥ ५ ॥

यत्र । ब्रह्म-विदः । यान्ति । दीक्षया । तपसा । सह ॥ सोमः मा । तत्र । नयतु । पयः । सोमः । दधातु । मे ॥ सोमाय स्वाहा ॥ ५ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी····[मन्त्र १] । (सोमः) सोम [सर्वोत्पादक परमेश्वर] (मा) मुझे (तत्र वहां (नयतु) पहुंचावे, (सोमः) सोम [परमात्मा] (मे) मुझ के (पयः) अन्न (दधातु) देवे । (सोमाय) सोम [परमात्मा] के लि (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ५ ॥

भावार्थ—मन्त्र १ के समान है ॥ ५ ॥

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह ।
इन्द्रो मा तत्र नयतु बलमिन्द्रो दधातु मे । इन्द्राय स्वाहा ६

यत्र । ब्रह्म-विदः । यान्ति । दीक्षया । तपसा । सह ॥ इन्द्र मा । तत्र । नयतु । बलम् । इन्द्रः । दधातु । मे ॥ इन्द्राय स्वाहा ॥ ६ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी···

(चन्द्रः) (चन्द्राय) आह्लादकाय परमात्मने । अन्यत् पूर्ववत् ॥

५—(सोमः) सर्वोत्पादकः परमात्मा (पयः) अन्नम्—निघ० २ । (सोमः) (सोमाय) परमात्मने । अन्यत् पूर्ववत् ॥

६—(इन्द्रः) परमैश्वर्यवान् परमात्मा (बलम्) सामर्थ्यम् (इन्द्र

[मन्त्र १] । (इन्द्रः) इन्द्र [परम ऐश्वर्यवान् परमात्मा] (मा) मुझे (तत्र) वहां (नयतु) पहुंचावे, (इन्द्रः) इन्द्र [परमात्मा] (मे) मुझको (बलम्) बल (दधातु) देवे । (इन्द्राय) इन्द्र [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ६ ॥

भावार्थ—मन्त्र १ के समान है ॥ ६ ॥

यत्र॑ ब्रह्म॒विदो॒ यान्ति॑ दी॒क्षया॒ तप॑सा स॒ह ।

आपो॑ मा॒ तत्र॑ नयत्व॒मृतं॒ मोप॑ तिष्ठतु । अ॒द्भ्यः स्वाहा॑ ॥७॥

यत्र॑ । ब्र॒ह्म॒-विदः॑ । यान्ति॑ । दी॒क्षया॑ । तप॑सा । स॒ह ॥ आप॑ः । मा॒ । तत्र॑ । न॒य॒तु॒ । अ॒मृत॑म् । मा॒ । उप॑ । ति॒ष्ठ॒तु॒ ॥ अ॒त्-भ्यः । स्वाहा॑ ॥ ७ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी...... [मन्त्र १] । (आपः) आप [जल के समान व्यापक परमात्मा] (मा) मुझे (तत्र) वहां (नयतु=नयन्तु) पहुंचावे, (अमृतम्) अमृत [अमरपन, दुःख रहित सुख] (मा) मुझ को (उप तिष्ठतु) प्राप्त होवे। (अद्भ्यः) आप [व्यापक परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ७ ॥

भावार्थ—मन्त्र १ के समान है ॥ ७ ॥

यत्र॑ ब्रह्म॒विदो॒ यान्ति॑ दी॒क्षया॒ तप॑सा स॒ह । ब्र॒ह्मा मा॒ तत्र॑ नयतु ब्र॒ह्मा ब्रह्म॑ दधातु मे । ब्र॒ह्मणे॒ स्वाहा॑ ॥ ८ ॥

यत्र॑ । ब्र॒ह्म॒-विदः॑ । यान्ति॑ । दी॒क्षया॑ । तप॑सा । स॒ह ॥ ब्र॒ह्मा ।

(इन्द्राय) परमैश्वर्यवते परमेश्वराय । अन्यत् पूर्ववत् ॥

७—(आपः) जलानीव व्यापकः परमात्मा (नयतु) नयन्तु (अमृतम्) अमरणम् । दुःखरहितं सुखम् (मा) माम् (उपतिष्ठतु) प्राप्नोतु (अद्भ्यः) सर्वव्यापकाय परमेश्वराय । अन्यत् पूर्ववत् ॥

मा । तत्रं । नयतु । ब्रह्मा । ब्रह्मं । दुधातु । मे ॥ ब्रह्मणें । स्वाहा ॥ ८ ॥

भाषार्थ—(यत्र) जिस [सुख] में (ब्रह्मविदः) ब्रह्मज्ञानी [ईश्वर वा वेद के जानने वाले लोग] (दीक्षया) दीक्षा [नियम और व्रत की शिक्षा] और (तपसा सह) तप [वेदाध्ययन, जितेन्द्रियता] के साथ (यान्ति) पहुंचते हैं। (ब्रह्मा) ब्रह्मा [सब से बड़ा जगत्स्रष्टा परमात्मा] (मा) मुझे (तत्र) वहां (नयतु) पहुंचावे, (ब्रह्मा) ब्रह्मा [परमात्मा] (मे) मुझ को (ब्रह्म) वेदज्ञान (दधातु) देवे । (ब्रह्मणे) ब्रह्म [परमात्मा] के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] होवे ॥ ८ ॥

भावार्थ—जो मनुष्य ब्रह्मज्ञानियों के समान दीक्षा और तप के साथ परमात्मा की प्राप्ति का उपाय करते हैं, वे ही ब्रह्मानन्द भोगते हैं ॥ ८ ॥

सूक्तम् ४४ ॥

१—१० ॥ आञ्जनं देवता ॥ १—३, ६—१० अनुष्टुप्; ४ विराडार्ष्युष्णिक्; ५ निचृदार्षी गायत्री ॥

ब्रह्मोपासनोपदेशः—ब्रह्म की उपासना का उपदेश ॥

आयुषोऽसि प्रतरणं विप्रं भेषजमुच्यसे ।
तदाञ्जन त्वं शंताते शमापो अभयं कृतम् ॥ १ ॥

आयुषः । असि । प्र-तरणम् । विप्रम् । भेषजम् । उच्यसे ॥ तत् । आ-अञ्जन । त्वम् । शम्-ताते । शम् । आपः । अभयम् । कृतम् ॥ १ ॥

भाषार्थ—[हे ब्रह्म !] तू (आयुषः) जीवन का (प्रतरणम्) बढ़ाने वाला (असि) है, तू (विप्रम्) परिपूर्ण (भेषजम्) औषध (उच्यसे) कहा

८—(ब्रह्मा) सर्ववृद्धः । जगत्स्रष्टा परमेश्वरः (ब्रह्म) (ब्रह्म) वेदज्ञानम् (ब्रह्मणे) जगदुत्पादकाय परमेश्वराय । अन्यत् पूर्ववत् ॥

१—(आयुषः) जीवनस्य (असि) (प्रतरणम्) प्रवर्धकम् (विप्रम्) वि+प्रा पूरणे—क । परिपूर्णम् (भेषजम्) औषधम् (उच्यसे) कथ्यसे (तत्)

जाता है। (तत्) सो, (शन्ताते) हे शान्तिकारक ! (आञ्जन) आञ्जन [संसार प्रकट करने वाले ब्रह्म], (त्वम्) तू (आपः) हे सुकर्म ! [तुम दोनों] (शम्) शान्ति और (अभयम्) अभय (कृतम्) करो ॥ १ ॥

भावार्थ—जो प्राणी परमात्मा के नियम पर चलकर सुकर्म करते हैं, वे सदा सुखी और निर्भय रहते हैं ॥ १ ॥

इस सूक्त का मिलान करो—अ० ४ । ६ ॥

आञ्जन शब्द का अर्थ लेप औषध भी है ॥

यो ह॑रि॒मा जा॒यान्यो॑ऽङ्गभे॒दो वि॑स॒ल्पकः॑ ।
सर्वं॑ ते॒ यक्ष्म॒मङ्गे॑भ्यो ब॒हिर्नि॑र्ह॒न्त्वाञ्ज॑नम् ॥ २ ॥

यः । ह॒रि॒मा । जा॒यान्यः॑ । अ॒ङ्ग॒ऽभे॒दः । वि॒ऽस॒ल्पकः॑ ॥ सर्व॑म् । ते॒ । यक्ष्म॑म् । अङ्गे॑भ्यः । ब॒हिः । निः । ह॒न्तु॒ । आ॒ऽअ॒ञ्जन॑म् २

भाषार्थ—[हे मनुष्य !] (यः) जो (हरिमा) पीलिया रोग (जायान्यः) क्षय रोग, और (अङ्गभेदः) अङ्गों का तोड़ने वाला (विसल्पकः) विसल्पक [शरीर में फूटने वाली हड़फूटन] है। (सर्वम्) सब (यक्ष्मम्) राजरोग को

तस्मात् कारणात् (आञ्जन) अ० ४ । ६ । ३ । आङ्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु—ल्युट् । हे यथावत् संसारस्य व्यक्तिकारक ब्रह्म । हे प्रलेप (त्वम्) (शन्ताते) अ० ४ । १३ । ५ । शिवशमरिष्टस्य करे । पा० ४ । ४ । १४३ । तातिल् प्रत्ययः करणेऽर्थे । हे शान्तिकारक (शम्) शान्तिम् (आपः) आपः कर्माख्यायां ह्रस्वो नुट् च वा । उ० ४ । २०८ । आप्लृ व्याप्तौ—असुन् । हे सुकर्म (अभयम्) भयराहित्यम् (कृतम्) कुरुतं युवाम् ॥

२—(यः) (हरिमा) अ० १ । २२ । १ । हरित्—इमनिच् भावे । पाण्डुरोगः (जायान्यः) अ० ७ । ७६ । ३ । वदेरान्यः । उ० ३ । १०४ । जै क्षये—आन्य । क्षयरोगः (अङ्गभेदः) अङ्गानां भेदकः (विसल्पकः) अ० ६ । १२७ । १ । वि+सृप सर्पणे-अच्, कन्, रस्य लः । शरीरे विसर्पणशीलो विसर्परोगः (सर्वम्) (ते) तव (यक्ष्मम्) राजरोगम् (अङ्गेभ्यः) शरीरावयवसकाशात् (बहिः)

(ते) तेरे (अङ्गेभ्यः) अङ्गों से (आञ्जनम्) आञ्जन [संसार का प्रकट करने वाला ब्रह्म] (बहिः) बाहिर (निः हन्तु) निकाल मारे ॥ २ ॥

भावार्थ—परमेश्वर के नियम पर चलने वाला धर्मात्मा पुरुष शारीरिक और आत्मिक रोगों से ज्ञान द्वारा पृथक् रहे ॥ २ ॥

आञ्जनं पृथिव्यां जातं भद्रं पुरुषजीवनम् ।

कृणोत्वप्रमायुकं रथजूतिमनागसम् ॥ ३ ॥

आ-अञ्जनम् । पृथिव्याम् । जातम् । भद्रम् । पुरुष-जीवनम् ॥

कृणोतु । अप्र-मायुकम् । रथ-जूतिम् । अनागसम् ॥ ३ ॥

भाषार्थ—(पृथिव्याम्) पृथिवी पर (जातम्) प्रसिद्ध, (भद्रम्) कल्याण कारक, (पुरुषजीवनम्) पुरुषों का जीवन (आञ्जनम्) आञ्जन [संसार का प्रकट करने वाला ब्रह्म, वा लेप विशेष] [मुझको] (अप्रमायुकम्) मृत्यु रहित, (रथजूतिम्) रथ [शरीर] का वेग रखने वाला, और (अनागसम्) निर्दोष (कृणोतु) करे ॥ ३ ॥

भावार्थ—जो परमात्मा पृथिवी आदि में प्रसिद्ध है, उस की भक्ति से मनुष्य मोक्ष सुख पाकर अपने शरीर और आत्मा को वेगवान् करके शुद्ध निष्पाप रहें ॥ ३ ॥

प्राण प्राणं त्रायस्वासो असवे मृड ।

निर्ऋते निर्ऋत्या नः पाशेभ्यो मुञ्च ॥ ४ ॥

पृथक् (निः) नितराम् (हन्तु) नाशयतु (आञ्जनम्) म० १ । संसारस्य व्यक्तिकारकं ब्रह्म । प्रलेपः ॥

३—(आञ्जनम्) म० १ । संसारस्य व्यक्तिकारकं ब्रह्म । प्रलेपविशेषः (पृथिव्याम्) भूमौ (जातम्) प्रसिद्धम् (भद्रम्) कल्याणकरम् (पुरुषजीवनम्) पुरुषाणां जीवयितृ (कृणोतु) करोतु—मामिति शेषः (अप्रमायुकम्) पचिनशोर्णुकन्कनुमौ च । उ० २ । ३० । मीञ् हिंसायां मरणे च—णुकन् । मृत्युरहितम् (रथजूतिम्) रथस्य शरीरस्य जूतिर्वेगो यस्मात्तम् (अनागसम्) निर्दोषम् ॥

प्राण॑ । प्राणम् । त्रा॒यस्व॒ । असो॒ इति॑ । अस॑वे । मृ॒ड ॥
निः-ऋ॑ते । निः-ऋ॑त्याः । नः॒ । पाशे॑भ्यः । मु॒ञ्च॒ ॥ ४ ॥

भाषार्थ—(प्राण) हे प्राण ! [जीवन दाता परमेश्वर] [मेरे] (प्राणम्) प्राण [जीवन] को (त्रायस्व) बचा, (असो) हे बुद्धिरूप ! (असवे) [मेरी] बुद्धि के लिये (मृड) प्रसन्न हो । (निर्ऋते) हे नित्य व्यापक ! (निर्ऋत्याः) महाविपत्ति के (पाशेभ्यः) फन्दों से (नः) हमें (मुञ्च) छुड़ा ॥ ४ ॥

भावार्थ—जो मनुष्य परमात्मा की आज्ञा में प्रवृत्त रहकर अपनी बुद्धि बढ़ाते हैं वे क्लेशों में नहीं पड़ते ॥ ४ ॥

सिन्धो॒र्गर्भो॑ऽसि वि॒द्युतां॒ पुष्प॑म् ।
वातः॑ प्रा॒णः सूर्य॒श्चक्षु॑र्दि॒वस्पयः॑ ॥ ५ ॥

सिन्धोः॑ । गर्भः॑ । अ॒सि॒ । वि॒-द्युता॑म् । पुष्प॑म् ॥
वातः॑ । प्रा॒णः । सूर्यः॑ । चक्षुः॑ । दि॒वः । पयः॑ ॥ ५ ॥

भाषार्थ—[हे परमात्मन् !] तू (सिन्धोः) समुद्र का (गर्भः) गर्भ [उदर समान आधार] और (विद्युताम्) प्रकाश वालों का (पुष्पम्) विकाश [फैलाव रूप] (असि) है। (वातः) पवन (प्राणः) [तेरा] प्राण [श्वास], (सूर्यः) सूर्य (चक्षुः) [तेरा] नेत्र है, और (दिवः) आकाश (पयः) [तेरा] अन्न है ॥ ५ ॥

४-(प्राण) हे जीवनप्रद परमेश्वर (प्राणम्) मम जीवनम् (त्रायस्व) पालय (असो) असुरिति प्रज्ञानाम-निरु० १० । ३४ । हे प्रज्ञारूप (असवे) प्रज्ञायै (निर्ऋते) निः + ऋ गतौ—क्तिन् । हे नित्यव्यापक (निर्ऋत्याः) अ० २ । १० । १ । निः+ऋ हिंसायाम्—क्तिन् । महाविपत्तेः (नः) अस्मान् (पाशेभ्यः) बन्धनेभ्यः (मुञ्च) मोचय ॥

५—(सिन्धोः) समुद्रस्य (गर्भः) उदारसमान आधारः (असि) (विद्युताम्) विविधदीप्यमानानाम् (पुष्पम्) पुष्प विकसने—अच् । विकाशरूपः (वातः) वायुः (प्राणः) तव श्वासरूपः (सूर्यः) आदित्यः (चक्षुः) नेत्ररूपः (दिवः) दिवु–क । आकाशः (पयः) तवान्नम् ॥

भावार्थ—मनुष्य विराट् रूप परमात्मा को सर्वनियन्ता जानकर सदा पुरुषार्थ करें ॥ ५ ॥

देवाञ्जन त्रैककुदं परि मा पाहि विश्वतः ।
न त्वा तरन्त्योषधयो बाह्याः पर्वतीया उत ॥ ६ ॥

देव-आञ्जन । त्रैककुदम् । परि । मा । पाहि । विश्वतः ॥
न । त्वा । तरन्ति । ओषधयः । बाह्याः । पर्वतीयाः । उत ॥६॥

भाषार्थ—(देवाञ्जन) हे देवाञ्जन ! [दिव्य स्वरूप, संसार के प्रकट करने वाले ब्रह्म] (त्रैककुदम्) तीन [आध्यात्मिक, आधिभौतिक और आधिदैविक] सुखों का पहुंचाने वाला तू (मा) मुझे (विश्वतः) सब ओर (परि पाहि) बचाता रहे । (बाह्याः) बाहिरी [पर्वतों से भिन्न स्थानों में उत्पन्न] (उत) और (पर्वतीयाः) पहाड़ी (ओषधयः) ओषधियां (त्वा) तुझ से (न) नहीं (तरन्ति) बढ़कर होती हैं ॥ ६ ॥

भावार्थ—जो मनुष्य परमात्मा के नियमों पर चलते हैं, उन्हें भौतिक ओषधियों की आवश्यकता नहीं होती ॥ ६ ॥

वीदं मध्यमवासृपद् रक्षोहामीवचातनः ।
अमीवाः सर्वाश्चातयन् नाशयदभिभा इतः ॥ ७ ॥

६—(देवाञ्जन) हे दिव्य, हे संसारस्य व्यक्तिकारक ब्रह्म (त्रैककुदम्) अ० ४ । ९ । ९-१० । त्रि+क+कुत्—अण् । कं सुखम्—निघ० ३ । ६ । कवते, गतिकर्मा—निघ० २ । १४ । कुङ् गतिशोषणयोः—क्विप्, तुक् च, अन्तर्गतण्यर्थः तस्य दः आध्यात्मिकादीनि त्रीणि कानि सुखानि कावयति गमयतीति त्रिककुत, स्वार्थे अण्, त्रिककुदमेव त्रिककुत् । त्रयाणां सुखानां प्रापकम् (परि) (मा) माम् (पाहि) रक्ष (विश्वतः) सर्वतः (न) निषेधे (त्वा) त्वाम् (तरन्ति) लङ्घयन्ति (ओषधयः) औषधानि (बाह्याः) बहिस्-ष्यञ् । बहिर्भवाः । पर्वतव्यतिरेकस्थलेषूत्पन्नाः (पर्वतीयाः) पर्वत-छप्रत्ययः पर्वतेषु भवाः (उत) अपि च ॥

वि । इदम् । मध्यम् । अव । असृपत् ॥ रक्षः-हा । अमीव-चातनः ॥ अमीवाः । सर्वाः । चातयत् । नाशयत् । अभि-भाः । इतः ॥ ७ ॥

भाषार्थ—(रक्षोहा) राक्षसों का मारने वाला, (अमीवचातनः) रोगनाशक [परमात्मा] (इदम्) इस (मध्यम्) मध्यस्थान में (वि अव असृपत्) सरक आया है। (इतः) यहां से (सर्वाः) सब (अमीवाः) पीड़ाओं को (चातयत्) हटाता हुआ, और (अभिभाः) विपत्तियों को (नाशयत्) नाश करता हुआ [ब्रह्म, वर्तमान है] ॥ ७ ॥

भावार्थ—सर्वव्यापक परमात्मा को साक्षात् करके मनुष्य सब विघ्नों को हटावे ॥ ७ ॥

बह्वी३ंदं राजन् वरुणानृतमाह पूरुषः ।
तस्मात् सहस्रवीर्य मुञ्च नः पर्यंहसः ॥ ८ ॥

बहु । इदम् । राजन् । वरुण । अनृतम् । आह । पुरुषः ॥ तस्मात् । सहस्र-वीर्य । मुञ्च । नः । परि । अंहसः ॥ ८ ॥

भाषार्थ—(राजन्) हे राजन् (वरुण) वरुण ! [सर्वश्रेष्ठ परमात्मन्] (पुरुषः) पुरुष (इदम्) अब (बहु) बहुत (अनृतम्) असत्य (आह) बोलता है। (सहस्रवीर्य) हे सहस्रप्रकार के पराक्रम वाले ! [ईश्वर] (तस्मात्) उस (अंहसः) पाप से (नः) हमें (परि) सर्वथा (मुञ्च) छुड़ा ॥ ८ ॥

७—(वि) विविधम् (इदम्) दृश्यमानम् (मध्यम्) मध्यस्थानम् (अव असृपत्) सर्पणेन व्याप्तवान् (रक्षोहा) राक्षसानां हन्ता (अमीवचातनः) रोगनाशकः परमात्मा (अमीवाः) रोगान् (सर्वाः) (चातयत्) नाशयत् (नाशयत्) दूरीकुर्वत् (अभिभाः) अ० ११ । २ । ११ । विपत्तीः (इतः) अस्मात् स्थानात् ॥

८—(बहु) (इदम्) इदानीम् (राजन्) हे सर्वशासक (वरुण) हे सर्वश्रेष्ठ परमात्मन् (अनृतम्) असत्यम् (आह) ब्रूते (पुरुषः) मनुष्यः (तस्मात्) निर्दिष्टात् (सहस्रवीर्य) हे अपरिमितपराक्रमवन् (मुञ्च) मोचय (नः) अस्मान् (परि) सर्वथा (अंहसः) पापात् ॥

भावार्थ—मनुष्य परमात्मा को साक्षी करके असत्य कभी न बोले ॥८॥

यदापो अघ्न्या इति वरुणेति यदूचिम ।
तस्मात् सहस्रवीर्य मुञ्च नः पर्यंहसः ॥ ९ ॥

यत् । आपः। अघ्न्याः। इति । वरुण । इति । यत् । ऊचिम॥
तस्मात् । सहस्र-वीर्य । मुञ्च । नः । परि । अंहसः ॥ ९ ॥

भाषार्थ—(यत्) क्योंकि (आपः) प्राण और (अघ्न्याः) न मारने योग्य गौयें हैं, (इति) इस लिये, (वरुण) हे वरुण ! [सर्वश्रेष्ठ परमात्मन्] (इति) इस लिये, (यत्) जो कुछ [असत्य] (ऊचिम) हम ने बोला है । (सहस्रवीर्य) हे सहस्रप्रकार के पराक्रम वाले ! [ईश्वर] (तस्मात्) उस (अंहसः) पाप से (नः) हमें (परि) सर्वथा (मुञ्च) छुड़ा ॥ ९ ॥

भावार्थ—मनुष्य अपने प्राणों, गौओं और परमात्मा का शपथ करके कभी असत्य न बोलें और न कभी पाप करें ॥ ९ ॥

इस मन्त्र का पहिला भाग आ चुका है—अ० ७ । ८३ । २, और कुछ भेद से यजुर्वेद में है-२० । १८ ॥

मित्रश्च त्वा वरुणश्चानुप्रेयतुराञ्जन ।
तौ त्वानुगत्य दूरं भोगाय पुनरोहतुः ॥ १० ॥

मित्रः । च । त्वा । वरुणः । च । अनु-प्रेयतुः । आ-अञ्जन॥
तौ। त्वा । अनु-गत्य । दूरम्। भोगाय । पुनः। आ ।ऊहतुः१०

भाषार्थ—(आञ्जन) हे आञ्जन ! [संसार के प्रकट करने वाले ब्रह्म] [मेरे] (मित्रः) प्राणः (च च) और (वरुणः) अपान दोनों (त्वा अनुप्रेयतुः)

९—(यत्) यस्मात् (आपः) प्राणाः (अघ्न्याः) अहन्तव्या गावः (इति) अनेन प्रकारेण (वरुण) हे सर्वोत्कृष्ट (इति) एवम् (यत्) अनृतम् (ऊचिम) वयं कथितवन्तः । अन्यत् पूर्ववत् ॥

१०—(मित्रः) मम प्राणः (च) (त्वा) त्वां परमात्मानम् (वरुणः) अपानः (च) (अनुप्रेयतुः) इण गतौ—लिट् । अनुसृत्य अग्रे जग्मतुः (आञ्जन)

तेरे पीछे आगे चले गये हैं । (तौ) वे दोनों (दूरम्) दूर तक (अनुगत्य) पीछे चलकर (त्वा) तुझ को (भोगाय) सुख भोगने के लिये (पुनः) फिर (आ ऊहतुः) ले आये हैं ॥ १० ॥

भावार्थ—जो मनुष्य प्राण और अपान अर्थात् पूरे सामर्थ्य से परमात्मा को दूर दूर तक खोजते हैं, वे ही उसको अपने समीप पाकर आनन्द भोगते हैं ॥ १० ॥

सूक्तम् ४५ ॥

१-१० ॥१-५ आञ्जनं देवता ; ६—१० मन्त्रोक्ता देवताः ॥ १ भुरिगनुष्टुप्; २ निचृदार्ष्यनुष्टुप् ; ३, ४ भुरिक् त्रिष्टुप् ; ५ भुरिगार्षी पङ्क्तिः ; ६ भुरिगार्ष्यनुष्टुप् ; ७-६ स्वराडार्ष्यनुष्टुप् ; १० निचृदार्षी बृहती ॥

ऐश्वर्यप्राप्त्युपदेशः—ऐश्वर्य की प्राप्ति का उपदेश ॥

ऋणादृणमिव सं नयन् कृत्यां कृत्याकृतो गृहम् ।
चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शृणाञ्जन ॥ १ ॥

ऋणात् । ऋणम्-इव । सम्-नयन् । कृत्याम् । कृत्या-कृतः । गृहम् ॥ चक्षुः-मन्त्रस्य । दुः-हार्दः । पृष्टीः । अपि । शृण । आ-अञ्जन ॥ १ ॥

भाषार्थ—(इव) जैसे (ऋणात्) ऋण में से (ऋणम्) ऋण को [अर्थात् जैसे ऋण का भाग ऋण दाता को मनुष्य शीघ्र भेजता है वैसे] (कृत्याम्) हिंसा को (कृत्याकृतः) हिंसा करने वाले के (गृहम्) घर (संनयन्) भेज देता हुआ तू, (आञ्जन) हे आञ्जन ! [संसार के प्रकट करने वाले ब्रह्म]

म० १ । संसारस्य व्यक्तीकारक ब्रह्म (तौ) प्राणापानौ (त्वा) त्वाम् (अनुगत्य) अनुसृत्य (भोगाय) सुखानुभवाय (पुनः) (आ ऊहतुः) वह प्रापणे—लिट् । आनीतवन्तौ ॥

१—(ऋणात्) ऋ गतौ—क्तप्रत्ययः, तस्य नत्वम् । पुनर्देयत्वेन गृहीताद्धनात् (ऋणम्) ऋणभागम् (इव) यथा (संनयन्) सम्यक् प्रापयन् (कृत्याम्) हिंसाम् (कृत्याकृतः) हिंसाकारकस्य (गृहम्) चक्षुर्मन्त्रस्य) अ० २ । ७ । ५ । चक्षुः+मन्त्रि गुप्तभाषणे-अच् घञ् वा । नेत्रसंकेतेन विचारशीलस्य पिशुनस्य

(चक्षुर्मन्त्रस्य) आंख से गुप्त बात करने वाले (दुर्हार्दः) दुष्ट हृदय वाले की (पृष्टीः) पसलियों को (अपि) अवश्य (शृण) तोड़ डाल ॥ १ ॥

भावार्थ—जैसे मनुष्य उधार देने वाले को उधार लिया हुआ शीघ्र भेजकर सुख पाता है, वैसे ही मनुष्य पीड़ा देने वाले को शीघ्र दण्ड देकर आनन्द पावें ॥ १ ॥

इस मन्त्र का उत्तरार्द्ध कुछ भेद से ऊपर आ चुका है—अ० २।७।५ ॥

यदुस्मासु दुष्वप्न्यं यद् गोषु यच्च नो गृहे ।
अनामगस्तं च दुर्हार्दः प्रियः प्रति मुञ्चताम् ॥ २ ॥

यत् । अस्मासु । दुः-स्वप्न्यम् । यत् । गोषु । यत् । च । नः । गृहे ॥ अनामगः । तम् । च । दुः-हार्दः । प्रियः । प्रति । मुञ्चताम् ॥ २ ॥

भाषार्थ—(यत्) जो (दुःष्वप्न्यम्) दुष्ट स्वप्न (अस्मासु) हम में, (यत्) जो (गोषु) गौओं में (च) और (यत्) जो (नः) हमारे (गृहे) घर में है। (च) और (दुर्हार्दः) दुष्ट हृदय वाले का (अनामगः) अनामय [स्वास्थ्य] है, (तम्) उस को [भी] (प्रियः) [हमारा] प्रिय (प्रति) प्रतिकूल (मुञ्चताम्) छोड़े ॥ २ ॥

भावार्थ—यदि दुष्ट लोग धर्मात्माओं के साथ पीड़ाजनक व्यवहार करें, तो उनको उसका यथोचित दण्ड दिया जावे ॥ २ ॥

अपामृज ओजसो वावृधानमुग्नेर्जातमधि जातवेदसः । चतुं-

(दुर्हार्दः) दुष्टहृदयस्य (पृष्टीः) पार्श्वास्थीनि (अपि) अवश्यम् (शृण) विनाशय (आञ्जन) ४४।१। हे संसारस्य व्यक्तीकारक ब्रह्म ॥

२—(यत्) (अस्मासु) धर्मात्मसु (दुःष्वप्न्यम्) निद्रावैकल्यम् (यत्) (गोषु) धेनुषु (यत्) (च) (नः) अस्माकम् (गृहे) निवासे (अनामगः) नञ्+आम+गमेः-डप्रत्ययः। आमो रोगः । अनामं नैरोग्यं गच्छति प्राप्नोति यस्मात् सः। अनामयः। स्वास्थ्यम् (तम्) अनामयम् (च) (दुर्हार्दः) दुष्टहृदयस्य (प्रियः) अस्माकं हितकरः (प्रति) प्रतिकूलम् (मुञ्चताम्) मोचयतु ॥

वीरं पर्व॒तीयं॒ यदाञ्ज॑नं॒ दिशः॑ प्र॒दिशः॑ कर॒दिच्छि॒वास्ते॑॥३॥

अ॒पाम् । ऊ॒र्जः । ओज॑सः । वा॒वृ॒धान॑म् । अ॒ग्नेः । जा॒तम् । अधि । जा॒त-वे॑दसः ॥ च॒तुः॒-वीर॑म् । पर्व॒तीय॑म् । यत् । आ॒-अ॒ञ्ज॑नम् । दिशः॑ । प्र॒-दिशः॑ । क॒र॒त् । इत् । शि॒वाः । ते॒ ॥३

भाषार्थ—(अपाम्) प्रजाओं के (ऊर्जः) अन्न के और (ओजसः) पराक्रम के (वावृधानम्) बढ़ाने वाले और (जातवेदसः) उत्पन्न पदार्थों में विद्यमान (अग्नेः) अग्नि [सूर्य आदि] से (अधि) अधिक (जातम्) प्रसिद्ध, (चतुर्वीरम्) चारो दिशाओं में वीर और (पर्वतीयम्) मेघों में वर्तमान (यत्) जो (आञ्जनम्) आञ्जन [संसार का प्रकट करने वाला ब्रह्म] है, वह (दिशः) दिशाओं और (प्रदिशः) बड़ी दिशाओं [पूर्व आदि] को (ते) तेरे लिये, हे मनुष्य ! (इत्) अवश्य (शिवाः) कल्याणकारी (करत्) करे ॥३॥

भावार्थ—जो मनुष्य सर्वशक्तिमान् परमात्मा में भक्ति करके पुरुषार्थ करते हैं, वे सब दिशाओं में सुख पाते हैं ॥ ३ ॥

च॒तुर्वीरं बध्यत॒ आञ्ज॑नं ते॒ सर्वा॒ दिशो॒ अभ॑यास्ते भवन्तु । ध्रु॒वस्ति॑ष्ठासि सवि॒तेव॒ चार्य॑ इ॒मा विशो॑ अ॒भि ह॑रन्तु ते ब॒लिम् ॥ ४ ॥

च॒तुः॒ वीर॑म् । ब॒ध्य॒ते॒ । आ॒-अ॒ञ्ज॑नम् । ते॒ । सर्वाः॑ । दिशः॑ । अभ॑याः । ते॒ । भ॒व॒न्तु॒ ॥ ध्रु॒वः । ति॒ष्ठा॒सि॒ । स॒वि॒ता-इ॑व । च॒ । आर्यः॑ । इ॒माः । विशः॑ । अ॒भि । ह॒र॒न्तु॒ । ते॒ । ब॒लिम्॥४॥

३—(अपाम्) प्रजानाम् (ऊर्जः) अन्नस्य (ओजसः) पराक्रमस्य च (वावृधानम्) अतिवर्धकम् (अग्नेः) सूर्यादिसकाशात् (जातम्) प्रसिद्धम् (अधि) अधिकम् (जातवेदसः) जातेषु पदार्थेषु विद्यमानात् (चतुर्वीरम्) चतसृषु दिक्षु शूरम् (पर्वतीयम्) पर्वतेषु मेघेषु वर्तमानम् (यत्) (आञ्जनम्) संसारस्य व्यक्तीकारकं ब्रह्म (दिशः) अवान्तरदिशाः (प्रदिशः) प्रकृष्टा दिशाः प्रागाद्याः (करत्) कुर्यात् (इत्) अवश्यम् (शिवाः) सुखप्रदाः (ते) तुभ्यम् ॥

भाषार्थ—[हे मनुष्य !] (ते) तेरे लिये (चतुर्वीरम्) चारों दिशाओं में वीर, (आञ्जनम्) आञ्जन [संसार का प्रकट करने वाला ब्रह्म] (बध्यते) धारण किया जाता है, (ते) तेरे लिये (सर्वाः) सब (दिशः) दिशायें (अभयाः) निर्भय (भवन्तु) होवें। (च) और (आर्यः) श्रेष्ठ तू (सविता इव) सूर्य के समान (ध्रुवः) दृढ़ होकर (तिष्ठासि) ठहरा रह, (इमाः) यह (विशः) प्रजायें (ते) तेरे लिये (बलिम्) बलि [कर] (अभि) सब ओर से (हरन्तु) लावें ॥ ४ ॥

भावार्थ—परमात्मा के दृढ़स्वभाव उपासक पुरुष दिग्विजयी होकर सब प्रजाओं को वश में करें ॥ ४ ॥

आक्ष्वैकं मणिमेकं कृणुष्व स्नाह्येकेना पिबैकमेषाम्। चतुर्वीरं नैर्ऋतेभ्यश्चतुर्भ्यो ग्राह्या बन्धेभ्यः परि पात्वस्मान् ॥ ५ ॥

आ। अक्ष्व। एकम्। मणिम्। एकम्। कृणुष्व। स्नाहि। एकेन। आ। पिब। एकम्। एषाम्॥ चतुः-वीरम्। नैः-ऋतेभ्यः। चतुः-भ्यः। ग्राह्याः। बन्धेभ्यः। परि। पातु। अस्मान् ॥ ५ ॥

भाषार्थ—[हे मनुष्य !] (एकम्) एक [ब्रह्म] को (आ) सब ओर से (अक्ष्व) प्राप्त हो, (एकम्) एक को (मणिम्) श्रेष्ठ (कृणुष्व) बना, (एकेन) एक के साथ (स्नाहि) शुद्ध हो, (एषाम्) इन [पदार्थों] में से

४—(चतुर्वीरम्) चतसृषु दिक्षु शूरम् (बध्यते) ध्रियते (आञ्जनम्) संसारस्य व्यक्तीकारकं ब्रह्म (ते) तुभ्यम् (सर्वाः) समस्ताः (दिशः) (अभयाः) निर्भयाः (ते) तुभ्यम् (भवन्तु) (ध्रुवः) दृढः सन् (तिष्ठासि) स्थितो भूयाः (सविता) सूर्यः (इव) यथा (च) (आर्यः) श्रेष्ठस्त्वम् (इमाः) वर्तमानाः (विशः) प्रजाः (अभि) अभितः (हरन्तु) प्रापयन्तु (ते) तुभ्यम् (बलिम्) करम्। भागम् ॥

५—(आ) समन्तात् (अक्ष्व) अक्षू व्याप्तौ—आत्मनेपदं लोट्। प्राप्नुहि (एकम्) अद्वितीयं ब्रह्म (मणिम्) श्रेष्ठम् (एकम्) ब्रह्म (कृणुष्व) कुरु (स्नाहि) शुद्धो भव (एकेन) ब्रह्मणा (आ) आनीय (पिब) पानं कुरु

(एकम्) एक को (आ) लेकर (पिब) पान कर । (चतुर्वीरम्) चारो दिशाओं में वीर [ब्रह्म] (ग्राह्याः) ग्राही [गठिया रोग] के (नैर्ऋतेभ्यः) महाविपत्ति वाले (चतुर्भ्यः) चारो [दिशाओं में फैले] (बन्धेभ्यः) बन्धनों से (अस्मान्) हमें (परि पातु) बचाये रक्खे ॥ ५ ॥

भावार्थ—मनुष्य एक अद्वितीय परमात्मा में श्रद्धा करके शारीरिक और आत्मिक रोगों से मुक्त होवे ॥ ५ ॥

अ॒ग्निर्मा॒ग्निना॑वतु प्रा॒णाया॑पा॒नायायु॑षे॒ वर्च॑स॒ ओज॑से॒ तेज॑से स्व॒स्तये॑ सुभू॒तये॒ स्वाहा॑ ॥ ६ ॥

अ॒ग्निः । मा॒ । अ॒ग्निना॑ । अ॒व॒तु॒ । प्रा॒णाय॑ । अ॒पा॒नाय॑ । आ॒यु॑षे । वर्च॑से । ओज॑से । तेज॑से । स्व॒स्तये॑ । सु॒-भू॒तये॑ । स्वाहा॑ ६

भाषार्थ—(अग्निः) ज्ञानवान् [परमेश्वर] (मा) मुझे (अग्निना) ज्ञान के साथ (अवतु) बचावे, (प्राणाय) प्राण के लिये, (अपानाय) अपान के लिये, (आयुषे) जीवन के लिये, (वर्चसे) प्रताप के लिये, (ओजसे) पराक्रम के लिये, (तेजसे) तेज के लिये, (स्वस्तये) स्वस्ति [सुन्दर सत्ता] के लिये और (सुभूतये) बड़े ऐश्वर्य के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ ६ ॥

भावार्थ—मनुष्य परमात्मा की उपासना पूर्वक शारीरिक कान्ति और आत्मिक उन्नति करके अपना बल, पराक्रम आदि बढ़ावें ॥ ६ ॥

(एकम्) एषाम्) पदार्थानां मध्ये (चतुर्वीरम्) चतसृषु दिक्षु वीररूपं ब्रह्म (नैर्ऋतेभ्यः) निर्ऋति-अण् । महाविपत्तिसम्बन्धिभ्यः (चतुर्भ्यः) चतसृषु दिक्षु व्याप्तेभ्यः (ग्राह्याः) अ० २ । ९ । १ । ग्रहणशीलपीडायाः (बन्धेभ्यः) पाशेभ्यः (परि) सर्वतः (पातु) रक्षतु (अस्मान्) ॥

६—(अग्निः) ज्ञानवान् परमेश्वरः (मा) माम् (अग्निना) ज्ञानेन (अवतु) रक्षतु (प्राणाय) प्राणस्थैर्याय (अपानाय) अपानस्वास्थ्याय (आयुषे) श्रेष्ठजीवनाय (वर्चसे) प्रतापाय (ओजसे) पराक्रमाय (तेजसे) शरीरकान्तिवर्धनाय (स्वस्तये) कल्याणाय । सुसत्ताप्राप्तये (सुभूतये) शोभनायै सम्पदे (स्वाहा) सुवाणी भवतु ॥

इन्द्रो मेन्द्रियेणावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥ ७ ॥

इन्द्रः । मा । इन्द्रियेण । अवतु । प्राणाय । अपानाय । आयुषे । वर्चसे । ओजसे । तेजसे । स्वस्तये । सु-भूतये । स्वाहा ॥ ७ ॥

भाषार्थ—(इन्द्रः) इन्द्र [परम ऐश्वर्यवान् जगदीश्वर] (मा) मुझे (इन्द्रियेण) इन्द्र के चिह्न [परम ऐश्वर्य] के साथ (अवतु) बचावे, (प्राणाय) प्राण के लिये ..... [म० ६] ॥ ७ ॥

भावार्थ—मन्त्र ६ के समान है ॥ ७ ॥

सोमो मा सौम्येनावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥ ८ ॥

सोमः । मा । सौम्येन । अवतु । प्राणाय । अपानाय । आ-युषे । वर्चसे । ओजसे । तेजसे । स्वस्तये । सु-भूतये । स्वाहा ॥ ८

भाषार्थ—(सोमः) शान्तस्वभाव परमेश्वर (मा) मुझे (सौम्येन) शान्त गुण के साथ (अवतु) बचावे, (प्राणाय) प्राण के लिये ...... [मन्त्र ६] ॥ ८ ॥

भावार्थ—मन्त्र ६ के समान है ॥ ८ ॥

भगो मा भगेनावतु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥ ९ ॥

७—(इन्द्रः) परमैश्वर्यवान् जगदीश्वरः (इन्द्रियेण) इन्द्रियमिन्द्रलिङ्ग० । पा० ५ । २ । ९३ । इन्द्र—घच् । इन्द्रलिङ्गेन । इन्द्रत्वेन । परमैश्वर्येण । अन्यत् पूर्ववत् ॥

८—(सोमः) शान्तस्वभावः परमेश्वरः (सौम्येन) शान्तगुणेन । अन्यत् पूर्ववत् ॥

भगः । मा । भगेन । अवतु । प्राणाय । अपानाय । आयुषे । वर्चसे । ओजसे । तेजसे । स्वस्तये । सु-भूतये । स्वाहा ॥९॥

भाषार्थ—(भगः) सेवनीय [परमेश्वर] (मा) मुझे (भगेन) सेवनीय ऐश्वर्य के साथ (अवतु) बचावे, (प्राणाय) प्राण के लिये......[मन्त्र ६] ॥ ९ ॥

भावार्थ—मन्त्र ६ के समान है ॥ ९ ॥

मरुतो मा गणैरवन्तु प्राणायापानायायुषे वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा ॥ १० ॥

मरुतः । मा । गणैः । अवन्तु । प्राणाय । अपानाय । आयुषे । वर्चसे । ओजसे । तेजसे । स्वस्तये । सु-भूतये । स्वाहा ॥१०॥

भाषार्थ—(मरुतः) शूर पुरुष (मा) मुझे (गणैः) सेना दलों के साथ (अवन्तु) बचावे, (प्राणाय) प्राण के लिये, (अपानाय) अपान के लिये, (आयुषे) जीवन के लिये, (वर्चसे) प्रताप के लिये, (ओजसे) पराक्रम के लिये, (तेजसे) तेज के लिये, (स्वस्तये) स्वस्ति [सुन्दर सत्ता] के लिये और (सुभूतये) बड़े ऐश्वर्य के लिये (स्वाहा) स्वाहा [सुन्दर वाणी] हो ॥ १० ॥

भावार्थ—सब मनुष्य परस्पर रक्षा करके संसार में उन्नति करें ॥१०॥

इति पञ्चमोऽनुवाकः ॥

अथ षष्ठोऽनुवाकः ॥

सूक्तम् ४६ ॥

१—७ ॥ अस्तृतो देवता ॥ १ विराडार्षी त्रिष्टुप्; २ भुरिक् शक्करी; ३, ७ निचृत्पथ्या पङ्क्तिः; ४ निचृदार्षी त्रिष्टुप्; ५ स्वराडार्षी जगती; ६ विराडार्षीजगती॥

९—(भगः) सेवनीयः परमेश्वरः (भगेन) सेवनीयेनैश्वर्येण । अन्यत् पूर्ववत् ॥

१०—(मरुतः) म० १ । २० । १ । शत्रुनाशकाः शूराः (गणैः) सैन्यैः । अन्यत् पूर्ववत् ॥

विजयप्राप्त्युपदेशः—विजय की प्राप्ति का उपदेश ॥

प्र॒जाप॑तिष्ट्वा बध्नात् प्रथ॒मम॑स्तृ॑तं वी॒र्या॑य॒ कम्। तत् ते॑ बध्ना॒म्यायु॑षे॒ वर्च॑स॒ ओज॑से च॒ बला॑य॒ चास्तृ॑तस्त्वा॒भि र॑क्षतु॥१॥

प्र॒जा-प॑तिः। त्वा॒। ब॒ध्ना॒त्। प्र॒थ॒मम्। अस्तृ॑तम्। वी॒र्या॑य। कम्॥ तत्। ते॒। ब॒ध्ना॒मि॒। आयु॑षे। वर्च॑से। ओज॑से। च॒। बला॑य। च॒। अस्तृ॑तः। त्वा॒। अ॒भि। र॒क्ष॒तु॒॥ १॥

भाषार्थ—[हे मनुष्य !] (त्वा = तुभ्यम्) तेरे लिये (प्रजापतिः) प्रजापति [प्रजापालक परमेश्वर] ने (प्रथमम्) पहिले से (अस्तृतम्) अटूट [नियम] को (वीर्याय) वीरता के लिये और (कम्) सुख के लिये (बध्नात्) बांधा है। (तत्) इस लिये [उस नियम को] (ते) तेरे (आयुषे) जीवन के लिये, (वर्चसे) प्रताप के लिये, (ओजसे) पराक्रम के लिये, (च च) और (बलाय) बल [सामर्थ्य] के लिये (बध्नामि) मैं [आचार्यादि] बांधता हूं, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे॥ १॥

भावार्थ—परमात्मा ने सृष्टि के आदि में मनुष्यादि के पुरुषार्थ करने और सुख भोगने के लिये वेद शास्त्र द्वारा नियम ठहराये हैं। मनुष्य उन नियमों में सुशिक्षित होकर अपना ऐश्वर्य बढ़ावें॥ १॥

ऊ॒र्ध्वस्ति॑ष्ठतु॒ रक्ष॒न्नप्र॑माद॒मस्तृ॑ते॒मं मा त्वा॑ दभन् प॒णयो॑ यातु॒धानाः॑। इन्द्र॑ इव॒ दस्यू॒नव॑ धूनुष्व पृतन्य॒तः सर्वा॑ञ्छत्रू॒न् वि ष॑ह॒स्वास्तृ॑तस्त्वा॒भि र॑क्षतु॥ २॥

१—(प्रजापतिः) प्रजानां पालकः परमात्मा (त्वा) तुभ्यमित्यर्थः (बध्नात्) अबध्नात्। धारितवान् (प्रथमम्) सृष्ट्यादौ (अस्तृतम्) स्तृञ् हिंसायाम्—क्त। अबाधितं सुदृढं नियमम् (वीर्याय) वीरकर्मणे (कम्) सुखाय (तत्) तस्मात् कारणात् (ते) तुभ्यम् (बध्नामि) धारयामि (आयुषे) जीवनाय (वर्चसे) प्रतापाय (ओजसे) पराक्रमाय (च) (बलाय) सामर्थ्याय (च) (अस्तृतः) अबाधितो नियमः (अभि) सर्वतः (रक्षतु) पालयतु॥

ऊर्ध्वः । तिष्ठतु । रक्षन् । अप्र-मादम् । अस्तृतः । इमम् । मा । त्वा । दभन् । पणयः । यातु-धानाः ॥ इन्द्रः-इव । दस्यून् । अव । धूनुष्व । पृतन्यतः । सर्वान् । शत्रून् । वि । सहस्व । अस्तृतः । त्वा । अभि । रक्षतु ॥ २ ॥

भाषार्थ—[हे मनुष्य !] (अस्तृतः) अटूट [नियम] (अप्रमादम्) बिना भूल (रक्षन्) रक्षा करता हुआ (ऊर्ध्वः) ऊंचा (तिष्ठतु) ठहरे, (इमम् त्वा) इस तुझ को (पणयः) कुव्यवहारी, (यातुधानाः) पीड़ा देने वाले लोग (मा दमन्) न दबावें । (इन्द्रः इव) इन्द्र [परम ऐश्वर्यवान् पुरुष] के समान (दस्यून्) लुटेरों को (अव धूनुष्व) हिला दे, और (पृतन्यतः) सेना चढ़ाने वाले (सर्वान्) सब (शत्रून्) शत्रुओं को (वि सहस्व) हरा दे, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ २ ॥

भावार्थ—जो मनुष्य नियम के साथ प्रमाद छोड़कर निरन्तर उन्नति करते हैं, वे ही शत्रुओं पर विजय पाते हैं ॥ २ ॥

शतं च न प्रहरन्तो निघ्नन्तो न तस्तिरे । तस्मिन्निन्द्रः पर्यदत्त चक्षुः प्राणमथो बलमस्तृतस्त्वाभि रक्षतु ॥ ३ ॥

शतम् । च । न । प्र-हरन्तः। न । तस्तिरे॥ तस्मिन् । इन्द्रः । परि । अदत्त । चक्षुः । प्राणम् । अथो इति । बलम् । अस्तृतः । त्वा । अभि । रक्षतु ॥ ३ ॥

२—(ऊर्ध्वः) उन्नतः (तिष्ठतु) वर्तताम् (रक्षन्) पालयन् (अप्रमादम्) अनवधानेन विना । सावधानम् (अस्तृतः) म० १ । अबाधितो नियमः (इमम्) उपस्थितम् (अस्तृतेमम्) अस्तृतः+इमम् । इति पदपाठे सति छान्दसः सन्धिः । अस्तृत इमम् (त्वा) त्वाम् (मा दमन्) मा हिंसन्तु (पणयः) कुव्यवहारिणः (यातुधानाः) पीडाप्रदाः (इन्द्रः) परमैश्वर्यवान् पुरुषः (इव) यथा (दस्यून्) उपक्षपयितॄन् तस्करान् (अव धूनुष्व) धूञ् कम्पने—लोट् । अवाङ्मुखान् कम्पय (पृतन्यतः) अ० १६ । ३२ । १० । सेनामिच्छतः । युयुत्सून् (सर्वान्) शत्रून् । रिपून् (वि) विविधम् (सहस्व) अभिभव । अन्यत् पूर्ववत् ॥

भाषार्थ—[हे मनुष्य !] (न) न तो (शतम्) सौ (प्रहरन्तः) चोट चलाने वाले (च) और (न) न (निघ्नन्तः) मार गिराने वाले शत्रु [उस नियम को] (तस्तिरे) तोड़ सके हैं। (तस्मिन्) उस [नियम] में (इन्द्रः) इन्द्र [परम ऐश्वर्यवान् परमात्मा] ने (चक्षुः) दर्शनसामर्थ्य, (प्राणम्) जीवन सामर्थ्य (अथो) और (बलम्) बल (परि अदत्त) दे रक्खा है, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ ३ ॥

भावार्थ—उन लोगों को वैरी लोग कभी नहीं सता सकते जो देख भाल कर नियम पर चलते हैं ॥ ३ ॥

इन्द्रस्य त्वा वर्मणा परि धापयामो यो देवानामधिराजो बभूव। पुनस्त्वा देवाः प्र णयन्तु सर्वेऽस्तृतस्त्वाभि रक्षतु॥४

इन्द्रस्य। त्वा। वर्मणा। परि। धापयामः। यः। देवानाम्। अधि-राजः। बभूव॥ पुनः। त्वा। देवाः। प्र। नयन्तु। सर्वे। अस्तृतः। त्वा। अभि॥ रक्षतु ॥ ४ ॥

भाषार्थ—[हे मनुष्य !] (त्वा) तुझ को (इन्द्रस्य) इन्द्र [परम ऐश्वर्यवान् जगदीश्वर] के (वर्मणा) कवच से (परि धापयामः) हम ढकते हैं, (यः) जो [परमेश्वर] (देवानाम्) विद्वानों का (अधिराजः) अधिराजा (बभूव) हुआ है। (पुनः) फिर (त्वा) तुझको (सर्वे) सब (देवाः) विद्वान्

३—(शतम्) बहवः (च) (न) निषेधे (प्रहरन्तः) प्रहारं कुर्वन्तः। शस्त्रादिभिर्बाधमानाः (निघ्नन्तः) नितरां हिंसन्तो मारयन्तः (न) निषेधे (तस्तिरे) स्तॄञ् हिंसायाम्—लिट्। जिहिंसुः (तस्मिन्) अस्तृते। नियमे (इन्द्रः) परमैश्वर्यवान् जगदीश्वरः (परि अदत्त) समर्पितवान् (चक्षुः) दर्शनसामर्थ्यम् (प्राणम्) जीवनसामर्थ्यम् (अथो) अपि च (बलम्)। अन्यत् पूर्ववत् ॥

४—(इन्द्रस्य) परमैश्वर्यवतः परमात्मनः (त्वा) (वर्मणा) कवचेन (परि) सर्वतः (धापयामः) आवृण्मः (यः) (देवानाम्) विदुषाम् (अधि-राजः) टच् समासान्तः। अधिपतिः (बभूव) (पुनः) अनन्तरम् (त्वा)

लोग (प्र णयन्तु) आगे ले चलें, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ ४ ॥

भावार्थ—माता पिता आदि सन्तानों को ऐसी उत्तम शिक्षा देवें, जिस से वे सत्य नियम पर चलकर विद्वानों के अगुआ होवें ॥ ४॥

अस्मिन् मणावेकशतं वीर्याणि सहस्रं प्राणा अस्मिन्नस्तृते । व्याघ्रः शत्रूनभि तिष्ठ सर्वान् यस्त्वा पृतन्यादधरः सो अस्त्वस्तृतस्त्वाभि रक्षतु ॥ ५ ॥

अस्मिन् । मणौ । एक-शतम् । वीर्याणि । सहस्रम् । प्राणाः । अस्मिन् । अस्तृते ॥ व्याघ्रः । शत्रून् । अभि । तिष्ठ । सर्वान् । यः । त्वा । पृतन्यात् । अधरः । सः । अस्तु । अस्तृतः । त्वा । अभि । रक्षतु ॥ ५ ॥

भाषार्थ—(अस्मिन्) इस, (अस्मिन्) इस ही (मणौ) प्रशंसनीय (अस्तृते) अटूट [नियम] में (एकशतम्) एकसौ एक [असंख्य] (वीर्याणि) वीरतायें और (सहस्रम्) सहस्र [बहुत ही] (प्राणाः) जीवन सामर्थ्य हैं । (व्याघ्रः) बाघ तू (सर्वान्) सब (शत्रून्) शत्रुओं पर (अभि तिष्ठ) धावा कर, (यः) जो (त्वा) तुझ पर (पृतन्यात्) सेना चढ़ावे, (सः) वह (अधरः) नीचा (अस्तु) होवे, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ ५ ॥

(देवाः) विद्वांसः (प्र) अग्रे (नयन्तु) गमयन्तु (सर्वे) समस्ताः । अन्यत् पूर्ववत् ॥

५—(अस्मिन्) पूर्वनिर्दिष्टे (मणौ) प्रशंसनीये (एकशतम्) एकोत्तरं शतम् । असंख्यानि (वीर्याणि) वीरकर्माणि (सहस्रम्) बहवः (प्राणाः) जीवनसामर्थ्यानि (अस्मिन्) वीप्सायां द्विर्वचनम् । अस्मिन्नेव (अस्तृते) म० १ । अहिंसिते नियमे (व्याघ्रः) वि+आङ्+घ्रा गन्धोपादाने—क । सिंहो व्याघ्र इति पूजायाम्, व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा-निरु० ३ । १८ । व्याघ्र इव शत्रुगन्धं विशेषेण आजिघ्रन् (शत्रून्) रिपून् (अभितिष्ठ) आक्रमेण प्राप्नुहि । अभिभव (सर्वान्) समस्तान् (यः) शत्रुः (त्वा) (पृतन्यात्) योद्धुमिच्छेत् (अधरः) निकृष्टः (सः) (अस्तु) अन्यत् पूर्ववत् ॥

भावार्थ—मनुष्य परमेश्वर के अटूट नियम पर चल कर शत्रुओं को नीचा करें। और जैसे व्याघ्र सूंघने से आखेट को जान लेता है, वैसे ही मनुष्य बैरियों को पकड़ने में तीव्रबुद्धि होवें ॥ ५ ॥

घृतादुल्लुप्तो मधुमान् पयस्वान्त्सहस्रप्राणः शतयोनिर्वयोधाः। शंभूश्च मयोभूश्चोर्जस्वांश्च पयस्वांश्चास्तृतस्त्वाभि रक्षतु ॥६॥

घृतात्। उत्-लुप्तः। मधु-मान्। पयस्वान्। सहस्र-प्राणः। शत-योनिः। वयः-धाः॥ शम्-भूः। च। मयः-भूः। च। ऊर्जस्वान्। च। पयस्वान्। च। अस्तृतः। त्वा। अभि। रक्षतु ॥ ६ ॥

भाषार्थ—(घृतात्) प्रकाश से (उल्लुप्तः) ऊपर खींचा गया, (मधुमान्) ज्ञानवान्, (पयस्वान्) अन्नवान्, (सहस्रप्राणः) सहस्रों जीवन सामर्थ्य वाला, (शतयोनिः) सैकड़ों कारणों में व्यापक, (वयोधाः) पराक्रम देने वाला, (शंभूः) शान्ति करने वाला (च) और (मयोभूः) सुख देने वाला, (च) और (ऊर्जस्वान्) बल वाला (च च) और (पयस्वान्) दूध वाला, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ ६ ॥

भावार्थ—परमेश्वर का वेदोक्त नियम संसार में प्रकाशमान है, मनुष्य उस पर ही चलकर अपना शारीरिक, आत्मिक और सामाजिक बल बढ़ाकर सुखी होवें ॥ ६ ॥

इस मन्त्र का प्रथम पाद आचुका है—अ० १९। ३३। २ और मन्त्र का मिलान करो—अ० ५। २८। १४ ॥

६—(घृतात्) प्रकाशात् (उल्लुप्तः) उद्धृतः (मधुमान्) ज्ञानवान् (पयस्वान्) अन्नवान् (सहस्रप्राणः) बहुजीवनसामर्थ्योपेतः (शतयोनिः) बहुकारणेषु विद्यमानः (वयोधाः) पराक्रमप्रदः (शंभूः) शान्तिदाता (च) (मयोभूः) सुखस्य कर्ता (च) (ऊर्जस्वान्) बलवान् (च) (पयस्वान्) दुग्धवान् (च)। अन्यत् पूर्ववत् ॥

यथा त्वमुत्तरोऽसो असपत्नः संपत्नहा । सुजातानामसद् वशी
तथा त्वा सविता करदस्तृतस्त्वाभि रक्षतु ॥ ७ ॥

यथा । त्वम् । उत्-तरः । असः । असपत्नः । सपत्न-हा ॥ सु-
जातानाम् । असत् । वशी । तथा । त्वा । सविता । करत् ।
अस्तृतः । त्वा । अभि । रक्षतु ॥ ७ ॥

भाषार्थ—[हे मनुष्य !] (यथा) जिस से (त्वम्) तू (उत्तरः) अति ऊंचा, (असपत्नः) बिना शत्रु और (सपत्नहा) शत्रुओं का मारने वाला (असः) होवे । और आप (सजातानाम्) सजातियों के (वशी) वश में करने वाला (असत्) होवें, (तथा) वैसा ही (त्वा) तुझ को (सविता) सब का प्रेरक [परमात्मा] (करत्) बनावे, (अस्तृतः) अटूट [नियम] (त्वा) तेरी (अभि) सब ओर से (रक्षतु) रक्षा करे ॥ ७ ॥

भावार्थ—परमात्मा के वेदोक्त नियम पर चलने वाले मनुष्य सब विघ्नों को हटाकर आनन्द से रहें ॥ ७ ॥

सूक्तम् ४७ ॥

१—९ ॥ रात्रिर्देवता ॥ १ पथ्या बृहती; २ निचृदतिजगती; ३ निचृदनुष्टुप्; ४, ५, ८ अनुष्टुप्; ६ पुरस्ताद् बृहती; ७ विराडार्षी जगती; ९ विराडार्ष्यनुष्टुप् ॥

रात्रौ रक्षोपदेशः—रात्रि में रक्षा का उपदेश ॥

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः ।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥ १ ॥

आ । रात्रि । पार्थिवम् । रजः । पितुः । अप्रायि । धामभिः ॥

७—(यथा) येन प्रकारेण (त्वम्) (उत्तरः) उत्कृष्टतरः (असः) अस्तेर्लेटि रूपम् । भवेः (असपत्नः) अशत्रुः (सपत्नहा) विरोधिनां हन्ता (सजातानाम्) समानजन्मनां पुरुषाणाम् (असत्) भवेद् भवान् । भवच्छब्द-योगे प्रथमपुरुषः (वशी) वशयिता (तथा) तेन प्रकारेण (सविता) सर्व-प्रेरकः परमात्मा (करत्) कुर्यात् । अन्यत् पूर्ववत् ॥

दिवः । सदांसि । बृहती । वि । तिष्ठसे । आ । त्वेषम् । वर्तते । तमः ॥ १ ॥

भाषार्थ—(रात्रि) हे रात्रि ! (पार्थिवम्) पृथिवी संबन्धी (रजः) लोक, (पितुः) पिता [मध्यलोक] के (धामभिः) स्थानों के साथ [अन्धकार से] (आ) सर्वथा (अप्रायि) भर गया है । (बृहती) बड़ी तू (दिवः) प्रकाश के (सदांसि) स्थानों को (वि तिष्ठसे) व्याप्त होती है, (त्वेषम्) चमकीला [ताराओं वाला] (तमः) अन्धकार (आ वर्तते) आकर घेरता है ॥१॥

भावार्थ—पृथिवी की गोलाई, और सूर्य के चारों ओर दैनिक घुमाव के कारण, पृथिवी का आधा भाग प्रत्येक समय सूर्य से आड़ में रहता है, अर्थात् प्रत्येक क्षण आधे भाग में अन्धकार और आधे में प्रकाश होता जाताहै । अन्धकार समय को रात्रि कहते हैं । रात्रि में तारे और चन्द्र चमकते दीखते हैं । मनुष्य रात्रि समय को यथावत् काम में लावें ॥ १ ॥

यह मन्त्र यजुर्वेद में है—३६ । ३२ और—निरुक्त ६ । २८ में भी व्याख्यात है॥

न यस्याः पारं ददृशे न योयुवद् विश्वमस्यां नि विशते यदेजति । अरिष्टासस्त उर्वि तमस्वति रात्रि पारमशीमहि भद्रे पारमशीमहि ॥ २ ॥

न । यस्याः । पारम् । ददृशे । न । योयुवत् । विश्वम् । अस्याम् । नि । विशते । यत् । एजति ॥ अरिष्टासः । ते । उर्वि । तमस्वति । रात्रि । पारम् । अशीमहि । भद्रे । पारम् । अशीमहि ॥ २ ॥

१—(आ) समन्तात् (रात्रि) हे रात्रि (पार्थिवम्) पृथिवीसम्बन्धि (रजः) लोकः (पितुः) पालकस्य । मध्यलोकस्य (अप्रायि) प्रा पूरणे—कर्मणि लुङ् । अपूरि (धामभिः) स्थानैः सह (दिवः) प्रकाशस्य (सदांसि) स्थानानि (बृहती) महती त्वम् (वितिष्ठसे) व्याप्नोषि (आ) समन्तात् (त्वेषम्) ताराभिर्दीप्यमानम् (वर्तते) विद्यते (तमः) अन्धकारः ॥

भाषार्थ—(न) न तो (यस्याः) जिस [रात्रि] का (पारम्) पार और (न) न (योयुवत्) [प्रकाश से] अलग होने वाला [स्थान] (ददृशे) दिखाई पड़ता है, (यत्) जो कुछ (एजति) चेष्टा करता है, (सर्वम्) वह सब (अस्याम्) उस [रात्रि] में (नि विशते) ठहर जाता है । (उर्वि) हे फैली हुयी, (तमस्वति) अंधेरी (रात्रि) रात्रि ! (अरिष्टासः) बिना कष्ट पाये हुये हम (ते) तेरे (पारम्) पार को (अशीमहि) पावें, (भद्रे) हे कल्याणी ! [तेरे] (पारम्) पार को (अशीमहि) पावें ॥ २ ॥

भावार्थ—पृथिवी के अपनी धुरी पर घूमने और सूर्य की परिक्रमा करने में प्रकाश की निवृत्ति और अन्धकार की प्रवृत्ति ऐसी शीघ्र होती है कि मनुष्य को उस समय का अनुभव करना अति कठिन है । मनुष्य विश्राम करके यथा योग्य अपने कामों में प्रवृत्त होवें ॥ २ ॥

ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव ।
अशीतिः सन्त्यष्टा उतो ते सप्त सप्ततिः ॥ ३ ॥

ये । ते । रात्रि । नृ-चक्षसः । द्रष्टारः । नवतिः । नव ॥
अशीतिः । सन्ति । अष्टौ । उतो इति । ते । सप्त । सप्ततिः ॥३॥

षष्टिश्च षट् च रेवति पञ्चाशत् पञ्च सुम्नयि ।
चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि ॥ ४ ॥

षष्टिः । च । षट् । च । रेवति । पञ्चाशत् । पञ्च । सुम्नयि ॥
चत्वारः । चत्वारिंशत् । च । त्रयः । त्रिंशत् । च । वाजिनि ॥४

२—(न) निषेधे (यस्याः) रात्रेः (पारम्) अन्तः (ददृशे) दृष्टम् (न) निषेधे (योयुवत्) यौतेर्यङ्लुगन्तात्—शतृ । प्रकाशाद् विभज्यमानं स्थानम् (विश्वम्) सर्वम् (अस्याम्) रात्रौ (निविशते) तिष्ठति (यत्) यत् किञ्चित् (एजति) चेष्टते (अरिष्टासः) अरिष्टाः । अहिंसिताः (ते) तव (उर्वि) हे विस्तृते (तमस्वति) हे अन्धकारयुक्ते (पारम्) अन्तम् (अशीमहि) वयं प्राप्नुयाम (भद्रे) हे कल्याणि (पारम् अशीमहि) आदरार्थं पुनरुक्तिः ॥

द्वौ चं ते विंशतिश्चं ते रात्र्येकादशावमाः ।
तेभिर्नो अद्य पायुभिर्नु पाहि दुहितर्दिवः ॥ ५ ॥

द्वौ । च । ते । विंशतिः । च । ते । रात्रि । एकादश । अवमाः ॥ तेभिः । नः । अद्य । पायु-भिः । नु । पाहि । दुहितः । दिवः ॥ ५ ॥

भाषार्थ—(रात्रि) हे रात्रि ! (ये) जो (ते) तेरे (नृचक्षसः) मनुष्यों पर दृष्टि रखने वाले (द्रष्टारः) दर्शक लोग (नवतिः नव) नव्वे और नौ [निन्नानवे], (अशीतिः अष्टौ) अस्सी और आठ [अठासी] (उतो) और (ते) तेरे (सप्ततिः सप्त) सत्तर और सात [सतहत्तर] (सन्ति) हैं ॥ ३ ॥

(रेवति) हे धनवती ! (षष्टिः च षट्) साठ और छह [छियासठ] (च) और (सुम्नयि) हे सुखप्रदे ! (पञ्चाशत् पञ्च) पंचास और पांच [पचपन], (च) और (वाजिनि) हे बलवती ! [वा वेगवती] (चत्वारिंशत् चत्वारः) चालीस और चार [चवालीस], (च) और (त्रिंशत् त्रयः) तीस और तीन [तेतीस] ॥ ४ ॥

३—(ये) (ते) तव (रात्रि) हे रात्रि (नृचक्षसः) मनुष्येषु दृष्टियुक्ताः (द्रष्टारः) दर्शकाः । रक्षकाः (नवतिर्नव) नवोत्तरनवतिसंख्याकाः (अशीतिः अष्टौ) अष्टोत्तराशीतिसंख्याकाः (सन्ति) भवन्ति (उतो) अपि च (सप्ततिः सप्त) सप्तोत्तरसप्ततिसंख्याकाः ॥

४—(षष्टिः षट्) षडुत्तरषष्टिसंख्याकाः (च) (च) (रेवति) हे धनवति (पञ्चाशत् पञ्च) पञ्चोत्तरपञ्चाशत् संख्याकाः (सुम्नयि) छन्दसि परेच्छायां क्यच् । वा० पा० ३ । १ । ८ । सुम्न—क्यच्, अच्, गौरादित्वाद् ङीष् । सुम्नं सुखं परेषामिच्छतीति या सा सुम्नयी तत्सम्बुद्धौ । हे सुखप्रदे (चत्वारिंशत् चत्वारः) चतुरुत्तरचत्वारिंशत्संख्याकाः (च) (त्रयस्त्रिंशत्) त्रिरुत्तरत्रिंशतसंख्याकाः (च) (वाजिनि) हे बलवति हे वेगवति ॥

(रात्रि) हे रात्रि ! (च) और (ते) तेरे (विंशतिः द्वौ) बीस और दो [बाईस], (च) और (ते) तेरे (एकादश) ग्यारह और (अवमाः) [जो इस संख्या से] नीचे हैं, (दिवः दुहितः) हे आकाश की भरदेने वाली ! (तेभिः पायुभिः) उन रक्षकों द्वारा (नः) हमें (अद्य) आज (नु) शीघ्र (पाहि) बचा ॥ ५ ॥

भावार्थ—मन्त्र ३—५ में ९९ में से ११, ११ घटते घटते ११ तक रहे हैं और [नीचे] शब्द से शेष संख्या एक तक मानी है। भाव यह है कि मनुष्य अपनी योग्यता के अनुसार बहुत वा थोड़े रक्षकों द्वारा रात्रि में रक्षा करते रहें ॥ ३—५ ॥

रक्षा माकिर्नो अघशंस ईशत मा नो दुःशंस ईशत ।
मा नो अद्य गवां स्तेनो मावीनां वृक ईशत ॥ ६ ॥

रक्ष । माकिः । नः । अघ-शंसः । ईशत । मा । नः । दुःशंसः । ईशत ॥ मा । नः । अद्य । गवाम् । स्तेनः । मा । अवीनाम् । वृकः । ईशत ॥ ६ ॥

माश्वानां भद्रे तस्करो मा नृणां यातुधान्यः ।
परमेभिः पथिभि स्तेनो धावतु तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु ॥ ७ ॥

मा । अश्वानाम् । भद्रे । तस्करः । मा । नृणाम् । यातु-धान्यः ॥ परमेभिः । पथि-भिः । स्तेनः । धावतु । तस्करः । परेण । दत्वती । रज्जुः । परेण । अघ-युः । अर्षतु ॥ ७ ॥

५—(द्वौ विंशतिः) द्व्यधिकविंशतिसंख्याकाः (च) (ते) तव (च) (ते) तव (रात्रि) (एकादश) एकोत्तरदशसंख्याकाः (अवमाः) उक्तसंख्यातो निकृष्टा न्यूनाः (तेभिः) तैः (नः) अस्मान् (अद्य) अस्मिन् दिने (पायुभिः) रक्षकैः (नु) क्षिप्रम् (पाहि) रक्ष (दुहितः) हे प्रपूरयित्रि (दिवः) आकाशस्य ॥

भाषार्थ—(रक्ष) तू रक्षा कर, (अघशंसः) बुराई चीतने वाला (माकिः) न कभी (नः) हमारा (ईशत) राजा होवे, और (मा) न (दुःशंसः) अनहित सोचने वाला (नः) हमारा (ईशत) राजा होवे। (मा) न (स्तेनः) चोर (अद्य) आज (नः) हमारी (गवाम्) गौओं का, और (मा) न (वृकः) भेड़िया (अवीनाम्) भेड़ों का (ईशत) राजा होवे ॥ ६ ॥

(भद्रे) हे कल्याणी! (मा) न (तस्करः) लुटेरा (अश्वानाम्) घोड़ों का, और (मा) न (यातुधान्यः) पीड़ा देने वाली [सेनायें] (नृणाम्) मनुष्यों की [राजा होवें]।

(स्तेनः) चोर, (तस्करः) लुटेरा (परमेभिः पथिभिः) अति दूर मार्गों से (धावतु) दौड़ जावे। (परेण) दूर [मार्ग] से (दत्वती रज्जुः) दंतीली रसरी [सांप], और (परेण) दूर [मार्ग] से (अघायुः) द्रोही जन (अर्षतु) चला जावे ॥ ७ ॥

भावार्थ—मनुष्य ऐसा प्रबन्ध करें कि चोर डकैत आदि दुष्ट लोग और भेड़िया सर्प आदि हिंसक जीव प्राणियों और सम्पत्ति को हानि न पहुंचावें ॥ ६, ७ ॥

मन्त्र ६ का प्रथम पाद ऋग्वेद में है-६। ७१। ३ तथा ६। ७५। १० और यजुर्वेद ३३। ६९ ॥

६—(रक्ष) पालय (माकिः) न कदापि (नः) अस्माकम् (अघशंसः) पापवक्ता (ईशत) ईश्वरो भवेत् (मा) निषेधे (नः) अस्माकम् (दुःशंसः) दुष्टहिंसकः (ईशत) (मा) निषेधे (नः) अस्माकम् (अद्य) अस्मिन् दिने (गवाम्) धेनूनाम् (स्तेनः) चोरः (मा) निषेधे (अवीनाम्) अजानाम् (वृकः) अरण्यश्वा (ईशत) समर्थो भवेत् ॥

७—(मा) निषेधे—ईशत, इत्यनुवर्तते (अश्वानाम्) तुरङ्गाणाम् (भद्रे) हे कल्याणि (तस्करः) परधनहारकः (मा) निषेधे (नृणाम्) मनुष्याणाम् (यातुधान्यः) पीडाप्रदाः सेनाः (परमेभिः) अतिदूरैः (पथिभिः) मार्गैः (स्तेनः) (धावतु) शीघ्रं गच्छतु (तस्करः) (परेण) अतिदूरेण मार्गेण (दत्वती) दन्तवती (रज्जुः) रज्जुवत्सर्पादिः (परेण) अतिदूरेण मार्गेण (अघायुः) अघ—क्यच्—उप्रत्ययः। पापेच्छुकः (अर्षतु) ऋषी गतौ भौवादिकः। गच्छतु ॥

अधं रात्रि तृष्टधूंममशीर्षाणमहिं कृणु ।
हनू वृकस्य जम्भयास्तेन तं द्रुपदे जहि ॥ ८ ॥

अधं । रात्रि । तृष्ट-धूंमम् । अशीर्षाणम् । अहिम् । कृणु ॥
हनू इति । वृकस्य । जम्भयाः । तेन । तम् । द्रु-पदे । जहि ॥८॥

भाषार्थ—(अध) और (रात्रि) हे रात्रि ! (तृष्टधूमम्) क्रूर धुयें वाले [विषैली श्वास वाले] (अहिम्) सांप को (अशीर्षाणम्) रुण्ड [बिना शिर का] (कृणु) कर दे, [शिर कुचल कर मार डाल] (वृकस्य) भेड़िये के (हनू) दोनों जावड़े (जम्भयाः) तोड़ डाल, (तेन) उससे (तम्) उसको (द्रुपदे) काठ के बन्धन में (जहि) मार डाल ॥ ८ ॥

भावार्थ—मनुष्य हिंसक जीव और मनुष्यों को ऐसे प्रबन्ध से रक्खें। कि वे किसी को हानि न करें ॥ ८ ॥

यह मन्त्र कुछ भेद से आगे है—५० । १ ॥

त्वयि रात्रि वसामसि स्वपिष्यामसि जागृहि ।
गोभ्यो नः शर्म यच्छाश्वेभ्यः पुरुषेभ्यः ॥ ९ ॥

त्वयि । रात्रि । वसामसि । स्वपिष्यामसि । जागृहि ॥
गोभ्यः । नः । शर्म । यच्छ । अश्वेभ्यः । पुरुषेभ्यः ॥ ९ ॥

भाषार्थ—(रात्रि)हे रात्रि ! (त्वयि) तुझ में (वसामसि) हम निवास करते हैं, (स्वपिष्यामसि) हम सोवेंगे, (जागृहि) तू जागती रह । (नः)

८—(अध) अथ । अपि च (रात्रि) (तृष्टधूमम्) ञितृषा पिपासायाम्—क्त । क्रूरधूमम् । विषयुक्तश्वासोपेतम् (अशीर्षाणम्) शिरोरहितम् (अहिम्) सर्पम् (कृणु) कुरु (हनू) मुखस्य अन्तःस्थूलदन्तयुक्तौ पार्श्वौ (वृकस्य) अजादीनामपहर्तुः । अरण्यशुनः (जम्भयाः) जभि गात्रविनामे लेटि, आडागमः । जम्भयेः । विनाशय (तेन) (तम्) वृकम् (द्रुपदे) काष्ठबन्धे (जहि) मारय ॥

९—(त्वयि) (रात्रि) (वसामसि) वसामः । निवसामः (स्वपिष्यामसि) छान्दस इडागमः । स्वप्स्यामः । निद्रां करिष्यामः (जागृहि) जागरिता भव

हमारी (गोभ्यः) गौओं को, (अश्वेभ्यः) घोड़ों को और (पुरुषेभ्यः) पुरुषों को (शर्म) सुख (यच्छ) दे ॥ ६ ॥

भावार्थ—मनुष्य परिश्रम करके रात्रि में प्रबन्ध के साथ सोवें, जिससे सब गौ, घोड़े, मनुष्य आदि सुख से रहें ॥ ६ ॥

सूक्तम् ४८ ॥

१-६ ॥ रात्रिर्देवता ॥ १ गायत्री; २ विराडार्ष्यनुष्टुप्; ३ भुरिगनुष्टुप्; ४, ६ अनुष्टुप्; ५ पथ्या पङ्क्तिः ॥

रात्रौ रक्षोपदेशः—रात्रि में रक्षा का उपदेश ॥

अथो यानि च यस्म ह यानि चान्तः परीणहि। तानि ते परि दद्मसि ॥ १ ॥

अथो इति। यानि। च। यस्म। ह। यानि। च। अन्तः। परि-नहि॥ तानि। ते। परि। दद्मसि ॥ १ ॥

भाषार्थ—(च) और (अथो) फिर (ह) निश्चय करके (यानि) जिन [वस्तुओं] का (यस्म) हम प्रयत्न करें, (च) और (यानि) जो [वस्तुयें] (अन्तः) भीतर (परीणहि) बांधने के आधार [मञ्जूषा आदि] में हैं। (तानि) उन सब को (ते) तुझे (परि दद्मसि) हम सौंपते हैं ॥ १ ॥

भावार्थ—मनुष्य अपने सब पदार्थों को रात्रि में सावधानी से रखकर रक्षा करें ॥ १ ॥

बम्बई गवर्नमेन्ट छापे की पुस्तक के पदपाठ में (यस्म) पद के स्थान पर [यस्मै] छपा है, हमने (यस्म) मूल पद माना है ॥

(गोभ्यः) धेनुभ्यः (अश्वेभ्यः) तुरङ्गेभ्यः (शर्म) सुखम् (यच्छ) देहि ॥

१—(अथो) अपि च (यानि) वस्तूनि (च) (यस्म) यसु प्रयत्ने—लेट्, अडभावश्छान्दसः। स उत्तमस्य। पा० ३। ४। ९८। उत्तमपुरुषस्य सकारस्य लोपः। प्रयत्नेन प्राप्नुयाम (ह) निश्चयेन (यानि) वस्तूनि (च) (अन्तः) मध्ये (परीणहि) परि + णह बन्धने—क्विप्। बन्धनाधारे मञ्जूषादौ (तानि) वस्तूनि (ते) तुभ्यम् (परि दद्मसि) समर्पयामः ॥

रात्रि मातरुषसे नः परि देहि । उषा नो अह्ने परि ददात्वहस्तुभ्यं विभावरि ॥ २ ॥

रात्रि । मातः । उषसे । नः । परि । देहि ॥ उषाः । नः । अह्ने । परि । ददातु । अहः । तुभ्यम् । विभावरि ॥ २ ॥

भाषार्थ—(रात्रि) रात्रि (मातः) माता ! तू (उषसे) उषा [प्रभात वेला] को (नः) हमें (परि देहि) सौंप । (उषाः) उषा (नः) हमें (अह्ने) दिन को, और (अहः) दिन (तुभ्यम्) तुझ को, (विभावरि) हे चमक वाली! (परि ददातु) सौंपे ॥ २ ॥

भावार्थ—मनुष्य तारों से शोभायमान रात्रि बीतने पर प्रातःकाल उठें और दिन के कर्तव्य करके रात्रि में रात्रि के कर्तव्य करें ॥ २ ॥

यह मन्त्र कुछ भेद से आगे है-५० । ७ ॥

यत् किं चेदं पतयति यत् किं चेदं सरीसृपम् ।
यत् किं च पर्वतायासत्वं तस्मात् त्वं रात्रि पाहि नः ॥ ३ ॥

यत् । किम् । च । इदम् । पतयति । यत् । किम् । च । इदम् । सरीसृपम् ॥ यत् । किम् । च । पर्वताय । असत्वम् । तस्मात् । त्वम् । रात्रि । पाहि । नः ॥ ३ ॥

भाषार्थ—(यत् किम् च) जो कुछ (इदम्) यह (पतयति) उड़ता है, (यत् किम् च) जो कुछ (इदम्) यह (सरीसृपम्) टेढ़ा टेढ़ा रेंगने वाला

२—(रात्रि) (मातः) हे मातृतुल्ये (उषसे) प्रभातवेलायै (नः) अस्मान् (परि देहि) समर्पय (उषाः) प्रभातवेला (नः) अस्मान् (अह्ने) दिनाय (परि ददातु) समर्पयतु (अहः) दिनम् (तुभ्यम्) (विभावरि) वि+भा दीप्तौ—क्वनिप् । वनो र च । पा० ४ । १ । ७ । ङीब्रेफौ । हे दीप्तिमति ॥

३—(यत्) (किञ्च) किञ्चित् (इदम्) दृश्यमानम् (पतयति) उड्डीयते (यत्) (किञ्च) (इदम्) (सरीसृपम्) सृपॢ गतौ—यङ्, पचाद्यच्

[सर्प आदि] है। (यत् किम् च) और जो कुछ (पर्वताय) पहाड़ पर (असत्वम्) दुष्ट जन्तु [सिंह आदि] है, (तस्मात्) उस से, (त्वम्) तू (रात्रि) हे रात्रि ! (नः) हमें (पाहि) बचा ॥ ३ ॥

भावार्थ—मनुष्य घरों को ऐसा सुडौल बनावें कि रात्रि में सब प्रकार के हिंसक प्राणियों से रक्षा रहे ॥ ३ ॥

सा पश्चात् पाहि सा पुरः सोत्तरादधरादुत ।
गोपाय नो विभावरि स्तोतारस्त इह स्मसि ॥ ४ ॥

सा । पश्चात् । पाहि । सा । पुरः । सा । उत्तरात् । अधरात् । उत ॥ गोपाय । नः । विभावरि । स्तोतारः । ते । इह । स्मसि ॥ ४ ॥

भाषार्थ—[हे रात्रि !] (सा) सो तू (पश्चात्) पीछे से, (सा) सो तू (पुरः) सामने से, (सा) सो तू (उत्तरात्) ऊपर से (उत) और (अधरात्) नीचे से (पाहि) बचा। (विभावरि) हे चमक वाली ! (नः) हमारी (गोपाय) रक्षा कर, हम लोग (इह) यहां पर (ते) तेरी (स्तोतारः) स्तुति करने वाले (स्मसि) हैं ॥ ४ ॥

भावार्थ—मनुष्यों को रात्रि में सावधानी के साथ सब ओर से रक्षा का प्रबन्ध रखना चाहिये ॥ ४ ॥

कुटिलगतिशीलं सर्पादिकम् (यत् किम् च) (पर्वताय) सप्तम्यर्थे चतुर्थी। पर्वते (असत्वम्) सत्त्वशब्दः प्राणिवाची। दुष्टं सत्त्वम् असत्त्वम्, व्याघ्रसिंहादिकम् (तस्मात्) पूर्वोक्तात् सर्वस्मात् (त्वम्) (रात्रि) (पाहि) रक्ष (नः) अस्मान् ॥

४—(सा) पूर्वोक्तलक्षणा त्वम् (पश्चात्) (पाहि) रक्ष (सा) सा त्वम् (पुरः) पुरस्तात् (सा) (उत्तरात्) उपरिदेशात् (अधरात्) अधोदेशात् (उत) अपि च (गोपाय) रक्ष (नः) अस्मान् (विभावरि) म० २। हे दीप्तिमति (स्तोतारः) स्तावकाः (ते) तव (इह) अत्र (स्मसि) स्मः। भवामः ॥

ये रात्रिमनुतिष्ठन्ति ये च भूतेषु जाग्रति । पशून् ये सर्वान् रक्षन्ति ते न आत्मसु जाग्रति ते नः पशुषु जाग्रति ॥ ५ ॥

ये । रात्रिम् । अनु-तिष्ठन्ति । ये । च । भूतेषु । जाग्रति ॥ पशून् । ये । सर्वान् । रक्षन्ति । ते । नः । आत्म-सु । जाग्रति । ते । नः । पशुषु । जाग्रति ॥ ५ ॥

भाषार्थ—(ये) जो [पुरुष] (रात्रिम्) रात्रि के (अनुतिष्ठन्ति) साथ चलते हैं [रात्रि में सावधान रहते हैं] (च) और (ये) जो (भूतेषु) सत्ता वालों पर (जाग्रति) जागते हैं । (ये) जो (सर्वान्) सब (पशून्) पशुओं की (रक्षन्ति) रक्षा करते हैं, (ते) वे (नः) हमारे (आत्मसु) आत्माओं [जीवों] पर (जाग्रति) जागते हैं, (ते) वे (नः) हमारे (पशुषु) पशुओं पर (जाग्रति) जागते हैं ॥ ५ ॥

भावार्थ—मनुष्य रात्रि में सावधान रह कर संसार के सब पदार्थों, पशुओं और पुरुषों की रक्षा करें ॥ ५ ॥

वेद वै रात्रि ते नाम घृताची नाम वा असि ।
तां त्वां भरद्वाजो वेद सा नो वित्तेऽधि जाग्रति ॥ ६ ॥

वेद । वै । रात्रि । ते । नाम । घृताची । नाम । वै । असि ॥ ताम् । त्वाम् । भरत्-वाजः । वेद । सा । नः । वित्ते । अधि । जाग्रति ॥ ६ ॥

भाषार्थ—(रात्रि) हे रात्रि ! (ते) तेरा (नाम) नाम (वै) निश्चय

५—(ये) जनाः (रात्रिम्) (अनुतिष्ठन्ति) अनुसृत्य वर्तन्ते (ये) (च) (भूतेषु) भवनवत्सु । सत्तावत्सु (जाग्रति) सावधानाः सन्ति (पशून्) गवादीन् (ये) (सर्वान्) (रक्षन्ति) पालयन्ति (ते) जनाः (नः) अस्माकम् (आत्मसु) जीवेषु (जाग्रति) (ते) (नः) अस्माकम् (पशुषु) गवादिषु (जाग्रति) जागरिता भवन्ति ॥

६—(वेद) अहं जानामि (वै) निश्चयेन (रात्रि) (ते) तव (नाम)

करके (वेद) मैं जानता हूं, तू (घृताची) घृताची [प्रकाश को प्राप्त होने वाली] (नाम) नाम वाली (वै) निश्चय करके (असि) है। (तां त्वा) उस तुझ को (भरद्वाजः) भरद्वाज [विज्ञान पोषक महात्मा] (वेद) जानता है, (सा) सो आप (नः) हमारी (वित्ते) सम्पत्ति पर (अधि) अधिकार पूर्वक (जाग्रति) जागती रहें ॥ ६ ॥

भावार्थ—मनुष्य तारे आदि से युक्त रात्रि में वेदादि शास्त्रों का मनन करके ज्ञान से प्रकाशित होकर सब की रक्षा करें ॥ ६ ॥

सूक्तम् ४८ ॥

१—१० ॥ रात्रिर्देवता ॥ १, ४, ८ त्रिष्टुप्; २, ३, विराडार्षी त्रिष्टुप्; ५ विराट् त्रिष्टुप्; ६ निचृत् पङ्क्तिः; ७ पथ्या पङ्क्तिः; ९ आर्ष्यनुष्टुप्; १० षट्पदा जगती ॥

रात्रौ रक्षोपदेशः—रात्रि में रक्षा का उपदेश ॥

इ॒षि॒रा योषा॑ युव॒तिर्दमू॑ना॒ रात्री॑ दे॒वस्य॑ सवि॒तुर्भग॑स्य। अ॒श्व॒क्ष॒भा सु॒हवा॒ संभृ॑तश्री॒रा प॑प्रौ॒ द्यावा॑पृथि॒वी म॑हि॒त्वा ॥ १ ॥

इ॒षि॒रा। योषा॑। यु॒व॒तिः। दमू॑नाः। रात्री॑। दे॒वस्य॑। स॒वि॒तुः। भग॑स्य ॥ अ॒श्व॒ऽक्ष॒भा। सु॒ऽहवा॑। सम्ऽभृ॑तश्रीः। आ। प॒प्रौ॒। द्यावा॑पृथि॒वी इति॑। म॒हि॒ऽत्वा ॥ १ ॥

भाषार्थ—(इषिरा) फुरतीली, (योषा) सेवनीया (युवतिः) युवा [बलवती], (देवस्य) प्रकाशमान, (भगस्य) ऐश्वर्यवान् (सवितुः) प्रेरक

नामधेयम् (घृताची) घृ क्षरणदीप्त्योः—क + अञ्चु गतिपूजनयोः—क्विन्, ङीप्। घृतं दीप्तिम् अञ्चति प्राप्नोतीति सा (नाम) नाम्ना (वै) (असि) (ताम्) तादृशीम् (त्वाम्) (भरद्वाजः) भृञ् भरणे—शतृ। भरत् पोषकं वाजो विज्ञानं यस्य सः (वेद) वेत्ति (सा) सा भवती (नः) अस्माकम् (वित्ते) धने। सम्पत्तौ (अधि) अधिकृत्य (जाग्रति) जागर्तेर्लेटि अडागमः, गुणाभावश्छान्दसः। जागर्तु। सावधानो भवतु ॥

१—(इषिरा) इषिमदिमुदि० । उ० १ । ५१ । इष गतौ—किरच्।

सूर्य की (दमूनाः) वश में करने वाली, (अश्वक्षभा) शीघ्र फैलने वाली, (सुहवा) सहज में बुलाने योग्य, (संभृतश्रीः) सम्पूर्ण सम्पत्ति वाली (रात्री) रात्री ने (महित्वा) महिमा से (द्यावापृथिवी) आकाश और पृथिवी को (आ) सर्वथा (पप्रौ) भर दिया है ॥ १ ॥

भावार्थ—जिस समय विश्रामदात्री रात्री का बड़ा अन्धकार संसार में फैले, मनुष्य सावधानी से अपनी सम्पत्ति की रक्षा करें ॥ १ ॥

मन्त्र के पदपाठ के (अश्व—क्षभा) को (अशु—अक्षभा) मानकर अर्थ किया गया है ॥

अति विश्वान्यरुहद् गम्भीरो वर्षिष्ठमरुहन्त श्रविष्ठाः ।
उशती रात्र्यनु सा भद्राभि तिष्ठते मित्र इव स्वधाभिः ॥२॥

अति । विश्वानि । अरुहत् । गम्भीरः । वर्षिष्ठम् । अरुहन्त । श्रविष्ठाः ॥ उशती । रात्री । अनु । सा । भद्रा । अभि । तिष्ठते । मित्रः-इव । स्वधाभिः ॥ २ ॥

भाषार्थ—(गम्भीरः) गम्भीर पुरुष (विश्वानि) सब [विघ्नों] को (अति) लांघ कर (अरुहत्) ऊंचा हुआ है, और (श्रविष्ठाः) अति बलवान् पुरुष (वर्षिष्ठम्) अति चौड़े स्थान पर (अरुहन्त) चढ़े हैं । (उशती) प्रीति

शीघ्रगतिः (योषा) युष सेवने—अच्, टाप् । सेवनीया (युवतिः) तरुणी । बलवती (दमूनाः) अ० ७ । १४ । ४ । दमेरुनसि । उ० ४ । २३५ । दमु । उपशमे- उनसि, वा दीर्घः । दमनशीला (रात्री) (देवस्य) प्रकाशमानस्य (सवितुः) प्रेरकस्य सूर्यस्य (भगस्य) ऐश्वर्यवतः (अश्वक्षभा) भृमृशीङ्० । उ० १ । ७ । अशू व्याप्तौ—उप्रत्ययः+कृशृशलिकलि० । उ०३ । १२२ । अक्षू व्याप्तौ—अभच्, टाप् । अशु आशु शीघ्रं अक्षभा व्यापनशीला (सुहवा) सुखेन ह्वातव्या (संभृतश्रीः) सम्पूर्णसम्पत्तिः (आ) समन्तात् (पप्रौ) प्रा पूरणे—लिट् । पूरितवती (द्यावापृथिवी) आकाशभूमी (महित्वा) महिम्ना ॥

२—(अति) उल्लङ्घ्य (विश्वानि) सर्वाण्यनिष्टानि (अरुहत्) आरूढवान् (गम्भीरः) शान्तः (वर्षिष्ठम्) उरुतमं स्थानम् (अरुहन्त)

करती हुयी (भद्रा) कल्याणी (सा) वह (रात्री) रात्री (अनु) निरन्तर (मित्रः इव) मित्र के समान, (स्वधाभिः) अपनी धारण शक्तियों के साथ (अभि तिष्ठते) सब ओर ठहरती है ॥ २ ॥

भावार्थ—शान्त स्वभाव बलवान् पुरुषों ने संसार में ऊंचे स्थान पाये हैं, इसी प्रकार जो मनुष्य रात्रि अर्थात् कठिनाई को मित्र समान जानकर सावधान रहते हैं, वे सब प्रकार के पोषणों को प्राप्त होते हैं ॥ २ ॥

वर्ये वन्दे सुभगे सुजात आजगन् रात्रि सुमना इह स्याम् ।
अस्मांस्त्रायस्व नर्याणि जाता अथो यानि गव्यानि पुष्ट्या ॥३॥

वर्ये । वन्दे । सु-भगे । सु-जाते । आ । अजगन् । रात्रि । सु-मनाः । इह । स्याम् ॥ अस्मान् । त्रायस्व । नर्याणि । जाता । अथो इति । यानि । गव्यानि । पुष्ट्या ॥ ३ ॥

भाषार्थ—(वर्ये) हे चाहने योग्य ! (वन्दे) हे वन्दना योग्य ! (सुभगे) हे बड़े ऐश्वर्य वाली ! (सुजाते) हे सुन्दर जन्म वाली ! (रात्रि) रात्रि (आ अजगन्) तू आयी है, मैं (इह) यहां (सुमनाः) प्रसन्नचित्त (स्याम्) रहूं । (अस्मान्) हमारे लिये (नर्याणि) मनुष्यों की हितकारी (जाता) उत्पन्न वस्तुओं को (अथो) और भी [उनको], (यानि) जो

आरूढवन्तः (अविष्ठाः) अतिशयेन अवस्विनः । बलिष्ठाः (उशती) कामयमाना (रात्री) रात्रीरूपं काठिन्यम् (अनु) निरन्तरम् (सा) प्रसिद्धा (भद्रा) कल्याणी (अभि) सर्वतः (मित्रः) सुहृत् (इव) यथा (स्वधाभिः) स्वधारणशक्तिभिः ॥

३—(वर्ये) हे वरणीये (वन्दे) वदि अभिवादनस्तुत्योः—घञ् । हे वन्दनीये (सुभगे) बह्वैश्वर्यवति (सुजाते) हे सुजन्मयुक्ते (आ अजगन्) गमेर्लङि मध्यमपुरुषे सिपि शपः श्लुः । मोनो धातोः । पा० ८ । २ । ६४ । इति नत्वम् । हल्ङ्याब्भ्यो दीर्घा० । पा० ६ । १ । ६८। इति सिपो लोपः । आगच्छः । आयतासि (रात्रि) (सुमनाः) प्रसन्नचित्तः (इह) अत्र (स्याम्) अहं भवेयम् (अस्मान्) चतुर्थ्यर्थे द्वितीया । अस्मभ्यम् (त्रायस्व) पालय (नर्याणि)

(गव्यानि) गौ [आदि] की हितकारी वस्तु हैं, (पुष्ट्या) वृद्धि के साथ (त्रायस्व) रक्षा कर ॥ ३ ॥

भावार्थ—जो मनुष्य रात्रि रूप कठिनाई में प्रसन्नचित रह कर अपना कर्तव्य करते रहें, वे उन्नति करके अपनी सम्पत्ति की रक्षा कर सकें ॥ ३ ॥

सिंहस्य रात्र्युशती पींषस्य व्याघ्रस्य द्वीपिनो वर्च आ ददे।
अश्वस्य ब्रध्नं पुरुषस्य मायुं पुरु रूपाणि कृणुषे विभाती ॥४॥

सिंहस्य । रात्री । उशती । पींषस्य । व्याघ्रस्य । द्वीपिनः । वर्चः । आ । ददे ॥ अश्वस्य । ब्रध्नम् । पुरुषस्य । मायुम् । पुरु । रूपाणि । कृणुषे । वि-भाती ॥ ४ ॥

भाषार्थ—(उशती) प्रीति करती हुई (रात्री) रात्री ने (सिंहस्य) सिंह की, (पींषस्य) चूरण करने वाले [हाथी] की, (व्याघ्रस्य) बाघ की और (द्वीपिनः) चीते की (वर्चः) कान्ति को, (अश्वस्य) घोड़े के (ब्रध्नम्) मूल [वेग] को और (पुरुषस्य) पुरुष की (मायुम्) ललकार को (आ ददे) ग्रहण किया है, (विभाती) चमकती हुई तू (पुरु) बहुत से (रूपाणि) रूपों को (कृणुषे) बनाती है ॥ ४ ॥

भावार्थ—जो मनुष्य रात्रिरूप कठिनाई में सिंह आदि के समान पराक्रमी होते हैं, वे ही कीर्तिमान् और तेजस्वी होते हैं ॥ ४ ॥

नरहितानि (जाता) उत्पन्नानि वस्तूनि (अथो) अपि च (यानि) वस्तूनि (गव्यानि) गवादिभ्यो हितानि (पुष्ट्या) वृद्ध्या ॥

४—(सिंहस्य) (रात्री) (उशती) कामयमाना (पींषस्य) पाघ्राध्माधेट्दृशः शः । पा० ३ । १ । १३७ । इति बाहुलकात् शप्रत्ययः । तस्य सार्वधातुकत्वाद् नुम्, छान्दसो दीर्घः । संचूर्णकस्य गजस्य (व्याघ्रस्य) हिंसकजीवविशेषस्य (द्वीपिनः) व्याघ्रभेदस्य (वर्चः) कान्तिम् (आददे) आहृतवती । प्राप्तवती (अश्वस्य) तुरङ्गस्य (ब्रध्नम्) मूलम् । वेगम् (पुरुषस्य) मनुष्यस्य (मायुम्) माङ् शब्दे—उण्, युक् च । शब्दम् (पुरु) पुरूणि (रूपाणि) (कृणुषे) करोषि (विभाती) वि + भा दीप्तौ—शतृ । विशेषेण भासमाना ॥

शिवां रात्रिमनुसूर्यं च हिमस्य माता सुहवा नो अस्तु ।
अस्य स्तोमस्य सुभगे नि बोध येन त्वा वन्दे विश्वासु दिक्षु ५

शिवाम् । रात्रिम् । अनु-सूर्यम् । च । हिमस्य । माता । सु-हवा । नः । अस्तु ॥ अस्य । स्तोमस्य । सु-भगे । नि । बोध । येन । त्वा । वन्दे । विश्वासु । दिक्षु ॥ ५ ॥

भाषार्थ—(च) और (हिमस्य) हिम [शीतलता] की (माता) माता [आप] (नः) हमारे लिये (सुहवा) सहज में बुलाने योग्य (अस्तु) होवें, (सुभगे) हे बड़े ऐश्वर्य वाली ! तू (अस्य) इस (स्तोमस्य) स्तोत्र का (नि बोध) ज्ञान कर, (येन) जिस [स्तोत्र] से (त्वाम्) तुझ (शिवाम्) कल्याणी (रात्रिम्) रात्रि को (अनुसूर्य्यम्) सूर्य के साथ साथ (विश्वासु) सब (दिक्षु) दिशाओं में (वन्दे) मैं बन्दना करता हूं ॥ ५ ॥

भावार्थ—जो मनुष्य कठिनाई को पार करके अन्त में शान्ति और ऐश्वर्य को प्राप्त हों, वे उस कठिनाई को उन्नति का कारण समझ कर उसका आदर करें ॥ ५ ॥

स्तोमस्य नो विभावरि रात्रि राजेव जोषसे ।
असाम सर्ववीरा भवाम सर्ववेदसो व्युच्छन्तीरनूषसः ॥ ६ ॥

स्तोमस्य । नः । विभावरि । रात्रि । राजा-इव । जोषसे ॥ असाम । सर्व-वीराः । भवाम । सर्व-वेदसः । वि-उच्छन्तीः । अनु । उषसः ॥ ६ ॥

५—(शिवाम्) कल्याणीम् (रात्रिम्) (अनुसूर्यम्) सूर्यमनुसृत्य (च) समुच्चये (हिमस्य) शीतलत्वस्य (माता) निर्मात्री भवतीति शेषः (सुहवा) सुखेन ह्वातव्या (नः) अस्मभ्यम् (अस्तु) (अस्य) क्रियमाणस्य (स्तोमस्य) स्तोत्रस्य (सुभगे) हे बह्वैश्वर्यवति (नि) नितराम् (बोध) ज्ञानं कुरु (येन) स्तोमेन (त्वा) त्वाम् (वन्दे) आदरेण नमामि (विश्वासु) सर्वासु (दिक्षु) ॥

भाषार्थ—(विभावरि) हे चमक वाली (रात्रि) रात्रि ! (नः) हमारे (स्तोमस्य) स्तोत्र का (राजा इव) राजा के समान (जोषसे) तू सेवन करती रहे। (व्युच्छन्तीः) विविध प्रकार चमकती हुई (उषसः अनु) उषाओं के साथ साथ हम (सर्ववीराः) सब वीरों वाले (असाम) होवें, और (सर्ववेदसः) सब सम्पत्ति वाले (भवाम) होवें ॥ ६ ॥

भावार्थ—मनुष्य ताराओं वाली रात्रि के सुन्दर उपयोग से स्तुति योग्य कर्म करके सदा बड़े बड़े वीर पुरुषों वाले और बड़ी सम्पत्ति वाले होवें ॥ ६॥

शम्या॑ ह॒ नाम॑ दधि॒षे मम॑ दिप्स॑न्ति॒ ये धना॑ । रात्री॒हि ताननु॒तपा॒ य स्ते॒नो न वि॒द्यते॒ यत् पु॒नर्न वि॒द्यते॑ ॥ ७ ॥

शम्या॑ । ह॒ । नाम॑ । द॒धि॒षे । मम॑ । दिप्स॑न्ति । ये । धना॑ ॥ रात्रि॑ । इ॒हि । ता॒न् । अ॒सु॒-त॒पा । यः । स्ते॒नः । न । वि॒द्यते॑ । यत् । पु॒नः॑ । न । वि॒द्यते॑ ॥ ७ ॥

भाषार्थ—(शम्या) शान्ति वाली, (नाम) यह नाम (ह) निश्चय करके (दधिषे) तू धारण करती है, (ये) जो [चोर] (मम) मेरे (धना) धनों को (दिप्सन्ति) हानि पहुंचाना चाहते हैं। (रात्रि) हे रात्रि ! (असुतपा) [उनके] प्राणों को तपाने वाली तू (तान्) उनको (इहि) पहुंच,

६—(स्तोमस्य) स्तोत्रस्य (नः) अस्माकम् (विभावरि) हे विशेषदीप्तियुक्ते (रात्रि) (राजा) (इव) यथा (जोषसे) लेटि अडागमः। सेवस्व (असाम) (सर्ववीराः) सर्ववीरोपेताः (भवाम) (सर्ववेदसः) बहुसम्पत्तियुक्ताः (व्युच्छन्तीः) विशेषेण भासमानाः (अनु) अनुलक्ष्य (उषसः) प्रभातवेलाः ॥

७—(शम्या) शमु उपशमे—यत्। शान्तियुक्ता (ह) निश्चयेन (नाम) नामधेयम् (दधिषे) दधातेर्लडर्थे लिट्। धारयसि (दिप्सन्ति) दन्भु दम्भे—सन्। दम्भिन्तु हिंसितुमिच्छन्ति (ये) चोराः (धना) धनानि (रात्रि) (इहि) प्राप्नुहि (तान्) चोरान् (असुतपा) असु + तप सन्तापे—कप्रत्ययो मूलविभुजादित्वात्, टाप्। असूनां प्राणानां सन्तापयित्री (यः) (स्तेनः) (न)

(यत्) जिस से (यः स्तेनः) जो चोर है, (न विद्यते) वह न रहे, (पुनः) फिर (न विद्यते) वह न रहे ॥ ७ ॥

भावार्थ—जो चोर डाकू आदि रात्रि में हानि करें, उन को लोग दण्ड देकर शान्ति स्थापित करें और चोरों को न रहने दें ॥ ७ ॥

भद्रासि रात्रि चमसो न विष्टो विष्वङ् गोरूपं युवतिर्बिभर्षि। चक्षुष्मती मे उशती वपूंषि प्रति त्वं दिव्या न क्षाममुक्थाः ८

भद्रा। असि। रात्रि। चमसः। न। विष्टः। विष्वङ्। गोरूपम्। युवतिः। बिभर्षि॥ चक्षुष्मती। मे। उशती। वपूंषि। प्रति। त्वम्। दिव्या। न। क्षाम्। अमुक्थाः॥ ८॥

भाषार्थ—(रात्रि) हे रात्रि ! तू (विष्टः) परोसे हुये (चमसः न) अन्नपात्र के समान (भद्रा) कल्याणी (असि) है, (युवतिः) युवती [बलवती] तू (विष्वङ्) सम्पूर्ण (गोरूपम्) गौ के स्वभाव को (बिभर्षि) धारण करती है। (चक्षुष्मती) नेत्र वाली, (उशती) प्रीति करती हुई (त्वम्) तू ने (मे) मेरे लिये (दिव्या) आकाश वाले (वपूंषि न) शरीरों के समान (क्षाम्) पृथिवी को (प्रति अमुक्थाः) ग्रहण किया है ॥ ८ ॥

भावार्थ—जैसे गौ दुग्ध आदि से उपकार करती है, वैसे ही रात्रि शीतलता आदि से अन्न आदि की वृद्धि करती है, और जैसे आकाश के तारों से रात्रि शोभायमान होती है, वैसे ही वृक्ष, पुष्प, आदि रात्रि की शीतलता वा ओस से हरे भरे होकर पृथिवी को सुन्दर बनाते हैं ॥ ८ ॥

निषेधे (विद्यते) स वर्तते (यत्) यस्मात् (पुनः) पश्चात् (न) निषेधे (विद्यते) ॥

८—(भद्रा) कल्याणी (असि) भवसि (रात्रि) (चमसः) अन्नपात्रम् (न) इव (विष्टः) परिविष्टः परिष्कृतः (विष्वङ्) विषु+अञ्चु गतिपूजनयोः—क्विन्। सम्पूर्णम् (गोरूपम्) धेनुसमानोपकारित्वम् (युवतिः) यौवनवती। बलवती त्वम् (बिभर्षि) धारयसि (चक्षुष्मती) दर्शनशक्तियुक्ता (मे) मह्यम् (उशती) कामयमाना (वपूंषि) शरीराणि (त्वम्) (दिव्या) दिवि आकाशे भवानि शरीराणि (न) इव (क्षाम्) क्षि निवासगत्योः—डप्रत्ययः, टाप्। पृथिवीम्—निघ० १।१ (प्रति अमुक्थाः) स्वीकृतवती, गृहीतवती ॥

यो अद्य स्तेन आयत्यघायुर्मर्त्यो रिपुः ।
रात्री तस्य प्रतीत्य प्र ग्रीवाः प्र शिरो हनत् ॥ ९ ॥

यः । अद्य । स्तेनः । आ-अयति । अघ-युः । मर्त्यः । रिपुः ॥
रात्री । तस्य । प्रति-इत्य । प्र । ग्रीवाः । प्र । शिरः ।
हनत् ॥ ९ ॥

प्र पादौ न यथायति प्र हस्तौ न यथाशिषत् । यो मलिम्लुरुपायति स संपिष्टो अपायति । अपायति स्वपायति शुष्के स्थाणावपायति ॥ १० ॥

प्र । पादौ । न । यथा । अयति । प्र । हस्तौ । न । यथा । अशिषत् ॥ यः । मलिम्लुः । उप-अयति । सः । सम्-पिष्टः । अप । अयति ॥ अप । अयति । सु-अपायति । शुष्के । स्थाणौ । अप । अयति ॥ १० ॥

भाषार्थ—(अद्य) आज (यः) जो (अघायुः) पाप चीतने वाला (रिपुः) बैरी, (स्तेनः) चोर (मर्त्यः) मनुष्य (आ—अयति) आवे। (रात्री) रात्रि (प्रतीत्य) प्रतीति करके (तस्य) उसके (ग्रीवाः) गले को (प्र) सर्वथा, और (शिरः) शिर को (प्र) सर्वथा (हनत्) तोड़ डाले ॥ ९ ॥

(पादौ) [उसके] दोनों पैरों को (प्र) सर्वथा [तोड़ डाले-मन्त्र

९—(यः) (अद्य) अस्मिन् दिने (स्तेनः) चोरः (आयति) आङ्+इण् गतौ—लेट् । आगच्छेत् (अघायुः) पापचिन्तकः (मर्त्यः) मनुष्यः (रिपुः) शत्रुः (रात्री) (तस्य) शत्रोः (प्रतीत्य) प्रतीतिं प्रत्यक्षज्ञानं प्राप्य (प्र) सर्वथा (ग्रीवाः) कन्धरावयवान् (प्र) सर्वथा (शिरः) मस्तकम् (हनत्) लेटि रूपम् । हन्यात् । नाशयेत् ॥

१०—(प्र) सर्वथा हनत्—म० ९ (पादौ) गमनसाधनभूतौ (न)

६], (यथा) जिस से वह (न) न (अयति) चल सके, (हस्तौ) [उस के] दोनों हाथों को (प्र) सर्वथा [तोड़ डाले], (यथा) जिस से वह (न) न (अशिषत्) खा सके। (यः) जो (मलिम्लुः) मलिन आचरण वाला लुटेरा (उप—अयति) पास आवे, (सः) वह (संपिष्टः) पीस डाला गया (अप अयति) निकल जावे। (अप अयति) वह निकल जावे, (सु—अप—अयति) वह सर्वथा निकल जावे,(शुष्के) सूखे (स्थाणौ)स्थान में (अप अयति) निकल जावे ॥ १० ॥

भावार्थ—यदि रात्रि में चोर डाकू आदि आकर लूट खसोट मचावें, रक्षक गण उन को यथावत् दण्ड देकर प्रजा की रक्षा करें ॥ ६, १० ॥

सूक्तम् ५० ॥

१—७ ॥ रात्रिर्देवता ॥ १, ३, ४, ६, ७ अनुष्टुप्; २, ५ भुरिगार्ष्युष्णिक् ॥
रात्रौ रक्षोपदेशः—रात्रि में रक्षा का उपदेश ॥

अधं रात्रि तृष्टधूममशीर्षाणमहिं कृणु ।
अक्षौ वृकस्य निर्जह्यास्तेन तं द्रुपदे जहि ॥ १ ॥

अधम् । रात्रि । तृष्ट-धूमम् । अशीर्षाणम् । अहिम् । कृणु ॥
अक्षौ । वृकस्य । निः । जह्याः । तेन । तम् । द्रु-पदे । जहि॥१

निषेधे (यथा) येन प्रकारेण (अयति) गच्छेत् (प्र) प्रहनत् (हस्तौ) करौ (न) निषेधे (यथा) (अशिषत्) अश भोजने—लेट्, अडागमः। सिब्बहुलं लेटि। पा० ३। १। ३४ इति सिप्, इडागमः। भोजनं कुर्यात् (यः) (मलिम्लुः) अ० ८। ६। २। मलि+म्लुचु गतौ—डुप्रत्ययः। मलिं मलं पापं म्लोचति प्राप्नोतीति सः। मलिनाचारः (उप—अयति) आगच्छेत् (सः) (सं पिष्टः) सम्यक् चूर्णितः (अप—अयति) दूरे गच्छेत् (अप अयति) स दूरं गच्छेत् (सु—अप—अयति) स सर्वथा दूरे गच्छतु (शुष्के) शुष शोषणे—क्त। शुषः कः। पा० ८। २। ५१। इति कत्वम्। प्राप्तशोषणे। नीरसे (स्थाणौ) स्थाने (अप अयति) दूरे गच्छतु ॥

भाषार्थ—(अध) और (रात्रि) हे रात्रि ! (तृष्टधूमम्) क्रूर धुयें वाले [विषैली श्वास वाले] (अहिम्) सांप को (अशीर्षाणम्) रुण्ड [बिना शिर का] (कृणु) करदे [शिर कुचल कर मार डाल] । (वृकस्य) भेड़िये के (अक्षौ) दोनों आंखें (निः जह्याः) निकाल कर फेंक दे, (तेन) उस से (तम्) उसको (द्रुपदे) काठ के बन्धन में (जहि) मार डाल ॥ १ ॥

भावार्थ—जो मनुष्य सर्प और भेड़िये आदि के समान रात्रि में दुःख देवें, उन्हें बन्दीगृह में बन्द करके कष्ट दिया जावे ॥ १ ॥

यह मन्त्र कुछ भेद से ऊपर आ चुका है—४७ । ८ ॥

ये ते राव्यनुड्वाहुस्तीक्ष्णशृङ्गाः स्वाशवः ।
तेभिर्नो अद्य पारयाति दुर्गाणि विश्वहा ॥ २ ॥

ये । ते । रात्रि । अनड्वाहः । तीक्ष्ण-शृङ्गाः । सु-आशवः ॥
तेभिः । नः । अद्य । पारय । अति । दुः-गानि । विश्वहा ॥२॥

भाषार्थ—(रात्रि) हे रात्रि ! (ते) तेरे (ये) जो (तीक्ष्णशृङ्गाः) पैने सींग वाले और (स्वाशवः) बड़े फुरतीले (अनड्वाहः) रथ ले चलने वाले बैल [अर्थात् बैलों के समान रक्षा भार उठाने वाले पुरुष] हैं । (तेभिः) उन के द्वारा (नः) हमें (अद्य) आज और (विश्वाहा) सब दिन (दुर्गाणि प्रति) विघ्नों को लांघ कर (पारय) पार लगा ॥ २ ॥

भावार्थ—मनुष्यों को चाहिये कि रथ ले चलने वाले फुरतीले बलवान् बैलों के समान रक्षा भार उठाने में फुरतीले और पराक्रमी होकर सब विघ्नों को हटावें ॥ २ ॥

१—अयं मन्त्रो व्याख्यातः—४७ । ८ । अत्र विशेषो व्याख्यायते (अक्षौ) अक्षिणी । चक्षुषी (निः) निःसार्य (जह्याः) ओ हाक् त्यागे—लिङ् । त्यजेः । क्षिपेः ॥

२—(ये) रक्षकाः (ते) तव (रात्रि) (अनड्वाहः) अनसः शकटस्य वाहकाः पुङ्गवा इव रक्षाभारवाहकाः पुरुषाः (तीक्ष्णशृङ्गाः) निशितविषाणाः (स्वाशवः) अतिशीघ्रगामिनः (तेभिः) तैः (नः) अस्मान् (अद्य) अस्मिन् दिने (पारय) तारय (अति) अतीत्य । उल्लङ्घ्य (दुर्गाणि) विघ्नान् (विश्वहा) विश्वेषु सर्वेषु अहःसु दिनेषु ॥

रात्रिंरात्रिमरिष्यन्तस्तरेम तन्वा वयम् ।
गम्भीरमप्लवा इव न तरेयुररातयः ॥ ३ ॥

रात्रिम्-रात्रिम् । अरिष्यन्तः । तरेम । तन्वा । वयम् ॥ गम्भीरम् । अप्लवाः-इव । न । तरेयुः । अरातयः ॥ ३ ॥

भाषार्थ—(अरिष्यन्तः) बिना कष्ट उठाये हुये (वयम्) हम लोग (तन्वा) अपने शरीर के साथ (रात्रिं रात्रिम्) रात्रि के पीछे रात्रि को (तरेम) पार करें। (अरातयः) बैरी लोग [उसको] (न तरेयुः) न पार करें, (इव) जैसे (अप्लवाः) बिना नाव वाले मनुष्य (गम्भीरम्) गहरे [समुद्र] को ॥३ ॥

भावार्थ—पुरुषार्थी मनुष्य सब विघ्नों को सह कर उन्नति करें, विरोधी आलसी पुरुष सुकर्मों को सिद्ध नहीं कर सकते ॥ ३ ॥

यथा शाम्याकः प्रपतन्नपवान् नानुविद्यते ।
एवा रात्रि प्र पातय यो अस्माँ अभ्यघायति ॥ ४ ॥

यथा । शाम्याकः । प्र-पतन् । अप-वान् । न । अनु-विद्यते ॥ एव । रात्रि । प्र । पातय । यः । अस्मान् । अभि-अघायति ॥४

भाषार्थ—(यथा) जैसे (शाम्याकः) सामा [छोटा अन्न विशेष] (प्रपतन्) गिरता हुआ और (अपवान्) दूर चला जाता हुआ (न) नहीं (अनुविद्यते) कुछ भी मिलता है। (एव) वैसे ही, (रात्रि) हे रात्रि ! [उस दुष्ट को] (प्र पातय) गिरा दे, (यः) जो (अस्मान्) हमारा (अभ्यघायति) बुरा चीतता है ॥ ४ ॥

३—(रात्रिंरात्रिम्) रात्रिं प्रति रात्रिम् (अरिष्यन्तः) दुःखं न प्राप्नुवन्तः (तरेम) पारं गच्छेम (तन्वा) स्वशरीरेण (वयम्) पुरुषार्थिनः (गम्भीरम्) अगाधं समुद्रम् (अप्लवाः) नौकादिरहिताः (इव) यथा (न) निषेधे (तरेयुः) अतिक्रामेयुः (अरातयः) शत्रवः ॥

४—(यथा) (शाम्याकः) श्यामाकाख्यः क्षुद्रधान्यविशेषः (प्रपतन्) निपतन् (अपवान्) वा गतौ—शतृ । अपगच्छन् (न) निषेधे (अनुविद्यते) कदापि लभ्यते (एव) एवम् (रात्रि) (प्रपातय) निपातय शत्रुम् (यः)शत्रुः (अस्मान्) धार्मिकान् (अभ्यघायति) अभिलक्ष्य अघं पापमिच्छति ॥

भावार्थ—धर्म्मात्मा लोग दुष्टों को ऐसा दूर करें कि फिर उसका पता न लगे जैसे सामा अन्न धूलि में वा पवन में जाकर नहीं मिलता ॥ ४ ॥

अप॑ स्ते॒नं वासो॑ गोअ॒जमु॒त तस्क॑रम् ।
अथो॒ यो अर्व॑तः॒ शिरो॑ऽभि॒धाय॒ निनी॑षति ॥५ ॥

अप॑ । स्ते॒नम् । वासः॑ । गो॒-अ॒जम् । उ॒त । तस्क॑रम् ॥ अथो॒-इति॑ । यः । अर्व॑तः । शिरः॑ । अ॒भि॒-धाय॑ । निनी॑षति ॥ ५ ॥

भाषार्थ—तू (स्तेनम्) चोर को (उत) और (गोअजम्) गौ को हांक ले जाने वाले (तस्करम्) लुटेरे को (अप वासः) बाहिर बसा दे । (अथो) और भी [उसको], (यः) जो (अर्वतः) घोड़े के (शिरः) शिर को (अभि-धाय) बांधकर (निनीषति) [उसे] ले जाना चाहता है ॥ ५ ॥

भावार्थ—जो पुरुष गौ आदि दूध के पशुओं को चुरा ले जावें, और इस लिये कि घोड़े फिर घर को न लौट आवें और न शब्द करें, उनका शिर अर्थात् आंखें और मुख बन्द करके भगाले जावें, उन्हें देश से निकाल देना चाहिये ॥ ५ ॥

यद॒द्या रा॑त्रि सुभगे वि॒भज॒न्त्ययो॒ वसु॑ ।
यदे॒तद॒स्मान् भो॑जय॒ यथेद॒न्यानु॒पाय॑सि ॥ ६ ॥

यत् । अ॒द्य । रा॒त्रि॒ । सु॒-भ॒गे॒ । वि॒-भज॑न्ति । अयः॑ । वसु॑ ॥ यत् । ए॒तत् । अ॒स्मान् । भो॒ज॒य॒ । यथा॑ । इत् । अ॒न्यान् । उ॒प-अय॑सि ॥ ६ ॥

५—(अप) दूरे (स्तेनम्) चोरम् (वासः) वस निवासे-णिजन्ताल्लेटि । छान्दसरूपम् । त्वं वासयः । निवासं देहि (गोअजम्) गो+अज गतिक्षेपणयोः अच् । सर्वत्र विभाषा गोः । पा० ६ । १ । १२२ । इति प्रकृतिभावः । गोः क्षेप्तारं प्रेरकम् (उत) अपिच (तस्करम्) (अथो) अपि च (यः) तस्करः (अर्वतः) अश्वस्य (शिरः) (अभिधाय) बध्वा (निनीषति) अपजिहीर्षति ॥

भाषार्थ—(सुभगे) हे बड़े ऐश्वर्य वाली (रात्रि) रात्रि ! (अद्य) आज (यत्) जिस (अयः) सुवर्ण और (यत्) जिस (वसु) धन को (विभजन्ति) वे [चोर] बांटते हैं। (एतत्) उस को (अस्मान्) हमें (भोजय) भोगने दे, (यथा) जिस से (इत्) निश्चय करके (अन्यान्) दूसरे [पदार्थों] को [हमें] (उप-अयसि) तू पहुंचाती रहे ॥ ६ ॥

भावार्थ—मनुष्य प्रयत्न करके डाकू चोर आदि दुष्टों से धन और सम्पत्ति की रक्षा करके वृद्धि करते रहें ॥ ६ ॥

उषसे नः परि देहि सर्वान् रात्र्यनागसः ।
उषा नो अह्ने आ भजादहस्तुभ्यं विभावरि ॥ ७ ॥

उषसे । नः । परि । देहि । सर्वान् । रात्रि । अनागसः ॥ उषाः । नः । अह्ने । आ । भजात् । अहः । तुभ्यम् । विभावरि ॥७॥

भाषार्थ—(रात्रि) हे रात्रि! (उषसे) उषा [प्रभात वेला] को (नः) हम (सर्वान्) सब (अनागसः) निर्दोषों को (परि देहि) सौंप । (उषाः) उषा (नः) हमें (अह्ने) दिन को, और (अहः) दिन (तुभ्यम्) तुझ को (आ भजात्) देवे, (विभावरि) हे बड़ी चमक वाली ! ॥ ७ ॥

भावार्थ—मनुष्य दिन और राति सदा धर्म के साथ अपनी वृद्धि करें ७॥

यह मन्त्र कुछ भेद से ऊपर आ चुका है—४८ । २ ॥

६-(यत्) (अद्य) अस्मिन् दिने (रात्रि) (सुभगे) हे बह्वैश्वर्यवति (विभजन्ति) विभागेन प्राप्नुवन्ति (अयः) हिरण्यम्-निघ० १ । २ (वसु) धनम् (यत्) (एतत्) (अस्मान्) (भोजय) भोक्तृन् कुरु (यथा) येन प्रकारेण (इत्) निश्चयेन (अन्यान्) पदार्थान् (उप-अयसि) इण् गतौ—लेटि, अडागमः, अन्तर्गतण्यर्थः । उपगमयेः ॥

७—(उषसे) प्रभातवेलायै (नः) अस्मान् (परिदेहि) समर्पय (सर्वान्) (रात्रि) (अनागसः) निर्दोषान् (उषाः) प्रभातवेला (नः) अस्मान् (अह्ने) दिनाय (आभजात्) भज सेवायाम्—लेटि, आडागमः । आभजेत् समन्तात् सेवेत । समर्पयेत् । अन्यत् पूर्ववत्-४८ । २ ॥

सूक्तम् ५१ ॥

१, २ ॥ आत्मा देवता ॥ १ ब्राह्म्युष्णिक्; २ विराडार्ष्युष्णिक् ॥

आत्मोन्नत्युपदेशः—आत्मा की उन्नति का उपदेश ॥

अयुतोऽहमयुतो म आत्मायुतं मे चक्षुरयुतं मे श्रोत्रमयुतो मे प्राणोऽयुतो मेऽपानोऽयुतो मे व्यानोऽयुतोऽहं सर्वः ॥ १ ॥

अयुतः । अहम् । अयुतः । मे । आत्मा । अयुतम् । मे । चक्षुः । अयुतम् । मे । श्रोत्रम् । अयुतः । मे । प्राणः । अयुतः । मे । अपानः । अयुतः । मे । वि-आनः । अयुतः । अहम् । सर्वः ॥१॥

भाषार्थ—(अहम्) मैं (अयुतः) अनिन्दित [प्रशंसायुक्त] [होऊं] (मे) मेरा (आत्मा) आत्मा [जीवात्मा] (अयुतः) अनिन्दित, (मे) मेरी (चक्षुः) आंख (अयुतम्) अनिन्दित, (मे) मेरा (श्रोत्रम्) कान (अयुतम्) अनिन्दित, (मे) मेरा (प्राणः) प्राण [भीतर जाने वाला श्वास] (अयुतः) अदिन्दित, (मे) मेरा (अपानः) अपान [बाहिर जाने वाला श्वास] (अयुतः) अनिन्दित, (मे) मेरा (व्यानः) व्यान [सब शरीर में घूमने वाला वायु] (अयुतः) अनिन्दित [होवे], (सर्वः) सब का सब (अहम्) मैं (अयुतः) अनिन्दित [होऊं] ॥ १ ॥

भावार्थ—जो मनुष्य अपने आपे, अपने आत्मा, अपने इन्द्रियों, अपने अङ्गों और अपने सर्वस्व से सदा प्रशंसनीय कर्म करते हैं। वे ही आत्मोन्नति कर सकते हैं ॥ १ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आ रभे ॥ २ ॥

१—(अयुतः) यु निन्दायाम्, चुरादिः—क्त । अनिन्दितः । प्रशंसितः (अहम्) (मे) मम (आत्मा) जीवात्मा (चक्षुः) दर्शनेन्द्रियम् (श्रोत्रम्) श्रवणेन्द्रियम् (प्राणः) शरीराभ्यन्तरगामी वायुः (अपानः) शरीराद् बहिर्गामी वायुः (व्यानः) सर्वशरीरव्यापको वायुः (सर्वः) समस्तः । अन्यद् गतं स्पष्टं च ॥

देवस्य । त्वा । सवितुः । प्र-सवे । अश्विनोः । बाहु-भ्याम् । पूष्णः । हस्ताभ्याम् । प्र-सूतः । आ । रभे ॥ २ ॥

भाषार्थ—[हे शूर !] (देवस्य) प्रकाशमान, (सवितुः) सर्वोत्पादक [परमेश्वर] के (प्रसवे) बड़े ऐश्वर्य के बीच, (अश्विनोः) सब विद्याओं में व्याप्त दोनों [माता पिता] के (बाहुभ्याम्) दोनों भुजाओं से और (पूष्णः) पोषक [आचार्य] के (हस्ताभ्याम्) दोनों हाथों से (प्रसूतः) प्रेरणा किया हुआ मैं (त्वा) तुझ को (आ रभे) ग्रहण करता हूं ॥ २ ॥

भावार्थ—जो परमेश्वर भक्त विद्वान् पराक्रमी पुरुष माता पिता और आचार्य से उत्तम शिक्षा पाकर उन्नति करे, सब मनुष्य उस का सदा सत्कार करते रहें ॥ २ ॥

यह मन्त्र कुछ भेद से यजुर्वेद में है—२० । ३ और महर्षि दयानन्दकृत ऋग्वेदादि भाष्यभूमिका राजप्रजा धर्म विषय में भी व्याख्यात है ॥

सूक्तम् ५२ [काम सूक्तम्] ॥

१—५ ॥ कामो देवता ॥ १, २ आर्षी त्रिष्टुप्; ३, उष्णिक्; ४ निचृदनुष्टुप् ५ उपरिष्टाद् बृहती ॥

कामप्रशंसोपदेशः—काम की प्रशंसा का उपदेश ॥

कामस्तदग्रे समवर्तत मनसो रेतः प्रथमं यदासीत् ।
स काम कामेन बृहता सयोनी रायस्पोषं यजमानाय धेहि ॥१॥

कामः । तत् । अग्रे । सम् । अवर्तत । मनसः । रेतः । प्रथमम् । यत् । आसीत् ॥ सः । काम । कामेन । बृहता । स-योनिः । रायः । पोषम् । यजमानाय । धेहि ॥ १ ॥

२—(देवस्य) प्रकाशमानस्य (त्वा) त्वां पुरुषार्थिनम् (सवितुः) सर्वोत्पादकस्य परमेश्वरस्य (प्रसवे) प्रकृष्टैश्वर्ये (अश्विनोः) सकलविद्याव्याप्तयोर्मातापित्रोः (बाहुभ्याम्) भुजयोः सकाशात् (पूष्णः) पोषकस्य आचार्यस्य (हस्ताभ्याम्) करयोः सकाशात् (प्रसूतः) प्रेरितः (आरभे) रभ राभस्ये । अहं गृह्णामि । स्वीकरोमि ॥

भाषार्थ—(तत्) फिर [प्रलय के पीछे] (अग्रे) पहिले ही पहिले (कामः) काम [इच्छा] (सम्) ठीक ठीक (अवर्तत) वर्तमान हुआ, (यत्) जो (मनसः) मन का (प्रथमम्) पहिला (रेतः) बीज (आसीत्) था। (सः) सो तू, (काम) हे काम ! (बृहता) बड़े (कामेन) काम [कामना करने वाले परमेश्वर] के साथ (सयोनिः) एक स्थानी होकर (रायः) धन की (पोषम्) वृद्धि (यजमानाय) यजमान [विद्वानों के सत्कार करने वाले] को (धेहि) दान कर ॥ १ ॥

भावार्थ—प्रलय के पीछे प्राणियों के पूर्वजन्मों के कर्म फलों के अनुसार परमात्मा ने सृष्टि उत्पन्न करने की इच्छा की है, सो हे मनुष्यो तुम उत्तम कर्म करके अभीष्ट सुख प्राप्त करो ॥ १ ॥

१—इस मन्त्र का पूर्वार्द्ध ऋग्वेद में है—१० । १२९ । ४ । और चौथा पाद आ चुका है—अ० १८ । १ । ४३ ॥

२—इस सूक का मिलान करो—अ० ६ । २ और देखो यजुर्वेद ७ । ४८ ॥

त्वं का॑म॒ सह॑सासि॒ प्रति॑ष्ठितो वि॒भुर्वि॒भावा॑ सख॒ आ स॑खीय॒ते।
त्वमु॒ग्रः पृत॑नासु सास॒हिः सह॒ ओजो॒ यज॑मानाय धेहि ॥ २ ॥

त्वम् । काम॒ । सह॑सा । अ॒सि॒ । प्रति॑-स्थितः । वि॒-भुः । वि॒भा-वा॑ । सखे॒ । आ । स॒खी॒य॒ते ॥ त्वम् । उ॒ग्रः । पृत॑नासु । स॒स॒हिः । सहः॑ । ओजः॑ । यज॑मानाय । धे॒हि॒ ॥ २ ॥

१—(कामः) कमु कान्तौ—घञ्। अभिलाषः। इच्छा (तत्) ततः। प्रलयानन्तरम् (अग्रे) सृष्ट्यादौ (सम्) सम्यक् (अवर्तत) वर्तमानोऽभवत् (मनसः) चित्तस्य (रेतः) बीजम् (प्रथमम्) आद्यम्। पूर्वकल्पे प्राणिभिः कृतं पुण्यापुण्यात्मकं कर्म (यत्) कर्म (आसीत्) अभवत् (सः) स त्वम् (काम) हे काम (कामेन) कामयतेः—पचाद्यच्। कामयित्रा परमेश्वरेण सह (बृहता) महता (सयोनिः) समानगृहः। एकस्थानीयः (रायः) धनस्य (पोषम्) वृद्धिम् (यजमानाय) विदुषां सत्कर्त्रे (धेहि) देहि ॥

भाषार्थ—(काम) हे काम ! [आशा] (त्वम्) तू (सहसा) बल के साथ (प्रतिष्ठितः) प्रतिष्ठा युक्त (असि) है, (आ) और, (सखे) हे मित्र ! (सखीयते) मित्र चाहने वाले के लिये तू (विभुः) समर्थ और (विभावा) तेजस्वी है । (त्वम्) तू (पृतनासु) सङ्ग्रामों में (उग्रः) उग्र और (सासहिः) विजयी है, (सहः) बल और (ओजः) पराक्रम (यजमानाय) यजमान को (धेहि) दान कर ॥ २ ॥

भावार्थ—जो मनुष्य अपनी आशाओं में दृढ़ होते हैं, वे ही संसार में प्रतापी और विजयी होकर कीर्ति पाते हैं ॥ २ ॥

दूराच्चकमानाय प्रतिपाणायाक्षये ।

आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः ॥ ३ ॥

दूरात् । चकमानाय । प्रति-पानाय । अक्षये ॥ आ । अस्मै । अशृण्वन् । आशाः । कामेन । अजनयन् । स्वः ॥ ३ ॥

भाषार्थ—(अक्षये) निर्हानि [पूर्णता] के बीच (प्रतिपानाय) सब प्रकार रक्षा के लिये (दूरात्) दूर से [जन्म से पूर्व कर्म के संस्कार के कारण से] (चकमानाय) कामना कर चुकने वाले (अस्मै) इस [पुरुष] को (आशाः) दिशाओं ने (कामेन) काम [आशा] के साथ (स्वः) सुख को (आ अशृण्वन्) अङ्गीकार किया है और (अजनयन्) उत्पन्न किया है ॥ ३ ॥

२—(त्वम्) (काम) हे इच्छे । हे आशे (सहसा) बलेन (असि) (प्रतिष्ठितः) प्रतिष्ठायुक्तः (विभुः) समर्थः (विभावा) भातेः—कनिप् । विशेषेण दीप्यमानः । तेजस्वी (सखे) हे मित्र (आ) समुच्चये (सखीयते) सखि—क्यच्, शतृ । मित्रमिच्छते पुरुषाय (त्वम्) (उग्रः) प्रचण्डः (पृतनासु) संग्रामेषु (सासहिः) सहेर्यङन्तात्—किप्रत्ययः । विजयी(सहः) बलम् (ओजः) पराक्रमम् (यजमानाय) (धेहि) देहि ॥

३—(दूरात्) पूर्वजन्मफलसंस्कारात् (चकमानाय) कमतेर्लिटः कानच् । कामनां कृतवते पुरुषाय (प्रतिपानाय) सर्वतोरक्षणाय (अक्षये) क्षयराहित्ये । अहानौ । सम्पूर्णत्वे (आ अशृण्वन्) अङ्गीकृतवत्यः (अस्मै) पुरुषाय (आशाः) प्राच्यादयो दिशाः (कामेन) इच्छया (अजनयन्) उदपादयन् (स्वः) सुखम् ॥

भावार्थ—मनुष्य पूर्व जन्म के संस्कारों के कारण जन्म से ही अक्षय सुख के लिये दृढ़ आशा और प्रयत्न करता हुआ प्रत्येक स्थान में आनन्द पाता है ॥ ३ ॥

कामेन मा काम आगन् हृदयाद्धृदयं परि ।
यदमीषामदो मनस्तदैतूप मामिह ॥ ४ ॥

कामेन । मा । कामः । आ । अगन् । हृदयात् । हृदयम् । परि ॥ यत् । अमीषाम् । अदः । मनः । तत् । आ । एतु । उप । माम् । इह ॥ ४ ॥

भाषार्थ—(कामेन) काम [कर्म फल इच्छा] के साथ (कामः) काम [आशा] (हृदयात्) [एक] हृदय से (हृदयं परि) [दूसरे] हृदय में होकर (मा) मुझ को (आ अगन्) प्राप्त हुआ है। (अमीषाम्) इन [विद्वानों] का (यत्) जो (अदः) वह (मनः) मनन है, (तत्) वह (माम्) मुझ को (इह) यहां (उप) आदर से (आ एतु) प्राप्त होवे ॥ ४ ॥

भावार्थ—मनुष्य विद्वानों से विद्यायें प्राप्त करके दृढ़ आशायें करता हुआ उन्नति करता रहे ॥ ४ ॥

यत्काम कामयमाना इदं कृण्मसि ते हविः ।
तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहा ॥ ५ ॥

यत् । काम । कामयमानाः । इदम् । कृण्मसि । ते । हविः ॥ तत् । नः । सर्वम् । सम् । ऋध्यताम् । अथ । एतस्य । हविषः । वीहि । स्वाहा ॥ ५ ॥

४—(कामेन) कर्मफलेच्छया सह (मा) माम् (कामः) अभिलाषः (आ अगन्) गमेर्लुङि च्लेर्लुकि मकारस्य नकारः। आगतवान् (हृदयात्) एकस्य अन्तःकरणात् (हृदयम्) द्वितीयस्य अन्तःकरणम् (परि) प्रति (यत्) (अमीषाम्) विदुषाम् (अदः) तत् (मनः) मननम् (तत्) (आ एतु) प्राप्नोतु (उप) आदरेण (माम्) (इह) अत्र ॥

भाषार्थ—(काम) हे काम ! [आशा] (यत्) जिस [फल] को (कामयमानाः) चाहते हुये हम (ते) तेरी (इदम्) यह (हविः) भक्ति (कृण्मसि) करते हैं। (तत्) वह (सर्वम्) सब (नः) हमारे लिये (सम्) सर्वथा (ऋध्यताम्) सिद्ध होवे, (अथ) इस लिये (स्वाहा) सुन्दर वाणी के साथ [वर्तमान] (एतस्य) इस (हविषः) भक्ति की (वीहि) प्राप्ति कर॥५॥

भावार्थ—मनुष्यों को दृढ़ भक्ति के साथ शुभ कामनाओं की सिद्धि के लिये पूरा प्रयत्न करना चाहिये ॥ ५ ॥

सूक्तम् ५३ [काल सूक्तम्] ॥

१—१० ॥ कालो देवता ॥ १,३ निचृत् त्रिष्टुप् ; २ निचृदार्षी त्रिष्टुप्;४ भुरिक् पङ्क्तिः; ५ विराडार्षी बृहती; ६, ९ निचृदनुष्टुप् ; ७, ८, १० अनुष्टुप् ॥

कालमहिमोपदेशः—काल की महिमा का उपदेश ॥

का॒लो अश्वो॑ वहति स॒प्तर॑श्मिः सहस्रा॒क्षो अ॒जरो॒ भूरि॑रेताः ।
तमा रो॑हन्ति क॒वयो॑ विप॒श्चित॒स्तस्य॑ च॒क्रा भुव॑नानि॒ विश्वा॑॥१

का॒लः । अश्वः॑ । व॒ह॒ति॒ । स॒प्त-र॑श्मिः । स॒ह॒स्र॒-अ॒क्षः । अ॒जरः॑ । भूरि॑-रेताः ॥ तम् । आ । रो॒ह॒न्ति॒ । क॒वयः॑ । वि॒पः॒-चितः॑ । तस्य॑ । च॒क्रा । भुव॑नानि । विश्वा॑ ॥ १ ॥

भाषार्थ—(सप्तरश्मिः) सात प्रकार की किरणों वाले सूर्य [के समान प्रकाशमान], (सहस्राक्षः) सहस्रों नेत्र वाला, (अजरः) बूढ़ा न होने वाला, (भूरिरेताः) बड़े बल वाला (कालः) काल [समयरूपी] (अश्वः)

५—(यत्) कर्मफलम् (काम) हे अभिलाष (कामयमानाः) इच्छन्तः (इदम्) क्रियमाणम् (कृण्मसि) कुर्मः (ते) तव (हविः) आत्मदानम्। भक्तिम् (तत्) (नः) अस्मभ्यम् (सर्वम्) (सम्) सम्यक् (ऋध्यताम्) सिध्यतु (अथ) तस्मात् (एतस्य) (हविषः) आत्मदानस्य (वीहि) प्राप्तिं कुरु (स्वाहा) सुवाण्या ॥

१—(कालः) कल संख्याने प्रेरणे च–ण्यन्तात् पचाद्यच् । कालयति संख्याति सर्वान् पदार्थानिति । समयः । परमेश्वरः (अश्वः) अशू व्याप्तौ–क्वन् ।

घोड़ा (वहति) चलता रहता है। (तम्) उस पर (कवयः) ज्ञानवान् (विपश्चितः) बुद्धिमान् लोग (आ रोहन्ति) चढ़ते हैं, (तस्य) उस [काल] के (चक्रा) चक्र [चक्र अर्थात् घूमने के स्थान] (विश्वा) सब (भुवनानि) सत्ता वाले हैं ॥ १ ॥

भावार्थ—महा बलवान् काल सर्वत्रव्यापी और अति शीघ्रगामी, शुक्र, नील, पीत, रक्त, हरित, कपिश, चित्र वर्ण किरणों वाले सूर्य के समान प्रकाशमान है, उस काल को बुद्धिमान् लोग सब अवस्थाओं में घोड़े के समान सहायक जान कर अपना कर्तव्य सिद्ध करते हैं ॥ १ ॥

सुप्त चुक्रान् वहति काल एष सुप्तास्य नाभीरमृतं न्वक्षः ।
स इमा विश्वा भुवनान्यञ्जत् कालः स ईयते प्रथमो नु देवः ॥२॥

सुप्त । चुक्रान् । वहति । कालः । एषः । सुप्त । अस्य । नाभीः । अमृतम् । नु । अक्षः ॥ सः । इमा । विश्वा । भुवनानि । अञ्जत् । कालः । सः । ईयते । प्रथमः । नु । देवः ॥ २ ॥

भाषार्थ—(एषः कालः) यह काल [समय] (सप्त) [तीनकाल और चार दिशाओं रूपी] सात (चक्रान्) पहियों को (वहति) चलाता है, (अस्य) इस की (सप्त) [वेही] सात (नाभीः) नाभि [पहिये के मध्य] हैं, और (अक्षः) [इसका] धुरा (नु) निश्चय करके (अमृतम्) अमरपन

अशनो व्यापनः सर्वभूतानां परमेश्वरः । व्यापनो मार्गस्य वा तुरङ्गः (वहति) गच्छति (सप्तरश्मिः) अश्नोतेरश्च । उ० ४ । ४६ । अशू व्याप्तौ—मिप्रत्ययः, धातोरशादेशः । शुक्लनीलपीतादिकिरणयुक्तसूर्यवत् प्रकाशमानः (सहस्राक्षः) बहुलोचनः । अमितदर्शनसामर्थ्यः (अजरः) जरारहितः । नित्ययुवा (भूरिरेताः) प्रभूतवीर्यः (तम्) (आ रोहन्ति) अधितिष्ठन्ति (कवयः) ज्ञानिनः (विपश्चितः) मेधाविनः (तस्य) कालस्य (चक्रा) चक्राणि । भ्रमणस्थानानि (भुवनानि) सत्तायुक्तानि भूतजातानि (विश्वानि) सर्वाणि ॥

२—(सप्त) त्रयः कालाश्चतस्रो दिशश्चेति सप्तसंख्याकान् (चक्रान्) रथाङ्गविशेषान् (वहति) चालयति (कालः) समयः (एषः) सर्वत्रव्यापकः (सप्त) पूर्वोक्ताः (नाभीः) नाभयः । अक्षबन्धकानि मध्यच्छिद्राणि (अमृतम्)

है। (सः) वह (इमा) इन (विश्वा) सब (भुवनानि) सत्तावालों को (अञ्जत्) प्रकट करता हुआ [है], (सः कालः) वह काल (नु) निश्चयकरके (प्रथमः) पहिला (देवः) देवता [दिव्य पदार्थ] (ईयते) जाना जाता है ॥२॥

भावार्थ—काल व्यापक और नित्य है, काल से ही संसार के सब कार्य सिद्ध होते हैं, मनुष्य काल के यथावत् उपयोग से उन्नति को प्राप्त होवें ॥ २ ॥

पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः।
स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन्॥३

पूर्णः । कुम्भः । अधि । काले । आ-हितः। तम् । वै । पश्यामः बहु-धा । नु । सन्तः ॥ सः । इमा । विश्वा । भुवनानि । प्रत्यङ् । कालम् । तम् । आहुः । परमे । वि-ओमन् ॥ ३ ॥

भाषार्थ—(काले अधि) काल [समय] के ऊपर (पूर्णः) भरा हुआ (कुम्भः) घड़ा [सम्पत्तियों का कोश] (आहितः) रक्खा है, (तम्) उस [घड़े] को (वै) निश्चय करके (सन्तः) वर्त्तमान हम (नु) ही (बहुधा) अनेक प्रकार (पश्यामः) देखते हैं । (सः) वह [काल] (इमा) इन (विश्वा) सब (भुवनानि) सत्ता वालों के (प्रत्यङ्) सामने चलता हुआ है,(तम्) उस

अमरत्वम् । अव्ययम् (नु) निश्चयेन (अक्षः) रथावयवः (सः) कालः (इमा) व्याकृतानि (विश्वा) सर्वाणि (भुवनानि) भवनवन्ति चराचरात्मकानि जगन्ति (अञ्जत्) अनक्तेः—शतृ, छान्दसो नुमभावः । अञ्जन् । व्यक्तीकुर्वन् (कालः) (सः) (ईयते) इण गतौ—कर्मणि यक् । ज्ञायते तत्त्वज्ञैः (प्रथमः) आदिमः (नु) निश्चयेन (देवः) दिव्यपदार्थः ॥

३—(पूर्णः) पूरितः (कुम्भः) घटः । सम्पत्तीनां कोशः (अधि) उपरि (काले) म० १ । समये (आहितः) स्थापितः (तम्) पूर्णं कुम्भम् (वै) निश्चयेन (पश्यामः) अनुभवामः (बहुधा) नानाप्रकारेण (नु) निश्चयेन (सन्तः) वर्त्तमाना वयम् (सः) कालः (इमा) दृश्यमानानि (भुवनानि) भवनवन्ति जगन्ति (प्रत्यङ्) प्रति प्रत्यक्षम् अञ्चन् गच्छन् वर्तते (कालम्)

(कालम्) काल को (परमे) अति ऊंचे (व्योमन्) विविध रक्षा स्थान [ब्रह्म] में [वर्तमान] (आहुः) वे [बुद्धिमान् लोग] बताते हैं ॥३ ॥

भावार्थ—समय के सुप्रयोग से धर्मात्मा लोग अनेक सम्पत्तियों के साथ सद्गति प्राप्त करते हैं, वह महाप्रबल सब स्थानों में परमात्मा के सामर्थ्य के बीच वर्तमान है, उस की महिमा को बुद्धिमान् जानते हैं ॥३ ॥

स एव सं भुवनान्याभरत् स एव सं भुवनानि पर्यैत् । पिता सन्नभवत् पुत्र एषां तस्माद् वै नान्यत् परमस्ति तेजः ॥ ४ ॥

सः । एव । सम् । भुवनानि । आ । अभरत् । सः । एव । सम् । भुवनानि । परि । एत् ॥ पिता । सन् । अभवत् । पुत्रः । एषाम् । तस्मात् । वै । न । अन्यत् । परम् । अस्ति । तेजः ॥ ४ ॥

भाषार्थ—(सः एव) उस ने ही (भुवनानि) सत्ताओं को (सम्) अच्छे प्रकार (आ) सब ओर से (अभरत्) पुष्ट किया है, (सः एव) उसने ही (भुवनानि) सत्ताओं को (सम्) अच्छे प्रकार (परि ऐत्) घेर लिया है । वह (एषाम्) इन [सत्ताओं] का (पिता) पिता [पिता समान पहिले] (सन्) होकर (पुत्रः) पुत्र [पुत्र समान पीछे] (अभवत्) हुआ है, (तस्मात्) उस से (परम्) बड़ा (अन्यत्) दूसरा (तेजः) तज [सृष्टि के बीच] (वै) निश्चय करके (न) नहीं (अस्ति) है ॥ ४ ॥

(तम्) तादृशम् (आहुः) कथयन्ति (परमे) सर्वोत्कृष्टे (व्योमन्) व्योमनि । विविधं रक्षके परमात्मनि वर्तमानम् ॥

४—(सः) कालः (एव) निश्चयेन (सम्) सम्यक् (भुवनानि) सत्तावन्ति जगन्ति (आ) समन्तात् (अभरत्) भृञ् भरणे भौवादिकः—लङ् । पोषितवान् (सः) (एव) (सम्) (भुवनानि) (परि ऐत्) इण गतौ—लङ् । आच्छादितवान् (पिता) पितृवत् पूर्वभावी (सन्) वर्तमानः (अभवत्) (पुत्रः) पुत्र इव पितुः पश्चाद् भावी (एषाम्) भुवनानाम् (तस्मात्) कालात् (वै) (न) निषेधे (अन्यत्) इतरत् (परम्) उत्कृष्टम् (अस्ति) भवति (तेजः) ज्योतिः ॥

भावार्थ—काल सब सत्ताओं में व्यापक है, काल ही सृष्टि का पिता और पुत्र है, अर्थात् पहिली, वर्तमान और आगामी सृष्टि काल से ही है, अर्थात् नित्य होने से वही पहिले और वही पीछे है, इसी से वह संसार में बड़ा प्रतापी है ॥ ४ ॥

कालोऽमूं दिवमजनयत् काल इमाः पृथिवीरुत ।
काले ह भूतं भव्यं चेषितं ह वि तिष्ठते ॥ ५ ॥

कालः । अमूम् । दिवम् । अजनयत् । कालः । इमाः । पृथिवीः । उत ॥ काले । ह । भूतम् । भव्यम् । च । इषितम् । ह । वि । तिष्ठते ॥ ५ ॥

भाषार्थ—(कालः) काल [समय] ने (अमूम्) उस (दिवम्) आकाश को (उत) और (कालः) काल ने (इमाः) इन (पृथिवीः) पृथिवियों को (अजनयत्) उत्पन्न किया है । (काले) काल में (ह) ही (भूतम्) बीता हुआ (च) और (भव्यम्) होने वाला (इषितम्) प्रेरा हुआ (ह) ही (वि) विशेष करके (तिष्ठते) ठहरता है ॥ ५ ॥

भावार्थ—काल को पाकर ही यह दीखता हुआ आकाश और पृथिवी आदि लोक उत्पन्न हुये हैं और परमेश्वर के नियम से भूत और भविष्यत् भी काल के भीतर हैं ॥ ५ ॥

कालो भूतिमसृजत काले तपति सूर्यः ।
काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति ॥ ६ ॥

कालः । भूतिम् । असृजत । काले । तपति । सूर्यः ॥ काले । ह । विश्वा । भूतानि । काले । चक्षुः । वि । पश्यति ॥ ६ ॥

५—(कालः) म० १ । समयः (अमूम्) दृश्यमानाम् (दिवम्) आकाशम् (अजनयत्) उदपादयत् (कालः) (इमाः) दृश्यमानाः (पृथिवीः) पृथिव्यादिलोकान् (उत) अपि च (काले) (ह) एव (भूतम्) अतीतम् (भव्यम्) भविष्यत् (च) (इषितम्) प्रेरितम् (ह) (वि) विशेषेण (तिष्ठते) वर्तते ॥

भाषार्थ—(कालः) काल [समय] ने (भूतिम्) ऐश्वर्य को (असृजत) उत्पन्न किया है, (काले) काल में (सूर्यः) सूर्य (तपति) तपता है। (काले) काल में (ह) ही (विश्वा) सब (भूतानि) सत्तायें हैं, (काले) काल में (चक्षुः) आंख (वि) विविध प्रकार (पश्यति) देखती है ॥ ६ ॥

भावार्थ—काल ही पाकर सब ऐश्वर्य, प्रकाश और पदार्थ उत्पन्न होते हैं ॥ ६ ॥

काले मनः काले प्राणः काले नाम समाहितम् ।
कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः ॥ ७ ॥

काले । मनः । काले । प्राणः । काले । नाम । सम्-आहितम् ।
कालेन । सर्वाः । नन्दन्ति । आ-गतेन । प्र-जाः । इमाः ॥ ७ ॥

भाषार्थ—(काले) काल में (मनः) मन, (काले) काल में (प्राणः) प्राण, (काले) काल में (नाम) नाम (समाहितम्) संग्रह किया गया है। (आगतेन) आये हुये (कालेन) काल के साथ (इमाः) यह (सर्वाः) सब (प्रजाः) प्रजायें (नन्दन्ति) आनन्द पाती हैं ॥ ७ ॥

भावार्थ—काल के उत्तम उपयोग से मन और प्राण अर्थात् सब इन्द्रियों का स्वास्थ्य और यश बढ़ता है, तब ही सब प्राणी सुख पाते हैं ॥ ७ ॥

काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः ॥ ८ ॥

६—(कालः) (भूतिम्) ऐश्वर्यम् । सत्ताम् (असृजत) अजनयत (काले)(तपति) प्रकाशते (सूर्यः) प्रेरक आदित्यः (काले) (ह) (विश्वा) (भूतानि) सत्तायुक्तानि जगन्ति (काले) (चक्षुः) नेत्रम् (वि) विविधम् (पश्यति) अवलोकयति ॥

७—(काले) (मनः) अन्तःकरणम् (काले) (प्राणः) श्वासः(काले) (नाम) नामधेयम् । यशः (समाहितम्) संगृहीतं वर्तते (कालेन) (सर्वाः) समस्ताः (नन्दति) संतुष्यन्ति (आगतेन) प्राप्तेन (प्रजाः) विविधसृष्टिपदार्थाः (इमाः) दृश्यमानाः ॥

काले । तपः । काले । ज्येष्ठम् । काले । ब्रह्म । सम्-आहितम् ॥ कालः । ह । सर्वस्य । ईश्वरः । यः । पिता । आसीत् । प्रजा-पतेः ॥ ८ ॥

भाषार्थ—(काले) काल [समय] में (तपः) तप [ब्रह्मचर्यादि], (काले) काल में (ज्येष्ठम्) श्रेष्ठ कर्म, (काले) काल में (ब्रह्म) वेदज्ञान (समाहितम्) संग्रह किया गया है। (कालः) काल (ह) ही (सर्वस्य) सब का (ईश्वरः) स्वामी है, (यः) जो [काल] (प्रजापतेः) प्रजापति [प्रजापालक मनुष्य] का (पिता) पिता [के समान पालक] (आसीत्) हुआ है ॥ ८ ॥

भावार्थ—काल के ही उत्तम उपयोग से मनुष्य ब्रह्मचर्य के साथ श्रेष्ठ कर्म और वेदाध्ययन आदि करते और प्रजापालक होते हैं ॥ ८ ॥

तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम् ।
कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम् ॥ ९ ॥

तेन । इषितम् । तेन । जातम् । तत् । ऊं इति । तस्मिन् । प्रति-स्थितम् ॥ कालः । ह । ब्रह्म । भूत्वा । बिभर्ति । परमे-स्थिनम् ॥ ९ ॥

भाषार्थ—(तेन) उस [काल] करके (इषितम्) प्रेरा गया (तेन) उस करके (जातम्) उत्पन्न किया गया (तत्) यह [जगत्] (तस्मिन्) उस [काल] में (उ) ही (प्रतिष्ठितम्) दृढ़ ठहरा है। (कालः) काल (ह)

८—(काले) (तपः) ब्रह्मचर्यादितपश्चरणम् (काले) (ज्येष्ठम्) श्रेष्ठं कर्म (काले) (ब्रह्म) वेदज्ञानम् (समाहितम्) स्थापितम् (कालः) (ह) एव (सर्वस्य) जगतः (ईश्वरः) स्वामी (यः) कालः (पिता) पितृवत् पालकः (आसीत्) अभवत् (प्रजापतेः) प्रजापालकपुरुषस्य ॥

९—(तेन) कालेन (इषितम्) प्रेरितम् (तेन) (जातम्) उत्पादितम् (तत्) दृश्यमानं जगत् (उ) अवधारणे (तस्मिन्) काले (प्रतिष्ठितम्) दृढं

ही (ब्रह्म) बढ़ता हुआ अन्न (भूत्वा) होकर (परमेष्ठिनम्) सब से ऊंचे ठहरे हुये [मनुष्य] को (बिभर्ति) पालता है ॥ ९ ॥

भावार्थ—यह जगत् काल के उत्तम उपयोग से उत्पन्न होकर ठहरा हुआ है और उसके ही उत्तम उपयोग से अन्न आदि पाकर मनुष्य उच्च पद पाते हैं ॥ ९ ॥

कालः प्रजा असृजत कालो अग्रे प्रजापतिम् ।
स्वयंभूः कश्यपः कालात् तपः कालादजायत ॥ १० ॥

कालः । प्र-जाः । असृजत । कालः । अग्रे । प्रजा-पतिम् ॥
स्वयम्-भूः । कश्यपः । कालात् । तपः । कालात् । अजायत ।१०

भाषार्थ—(अग्रे) पहिले (कालः) काल ने (प्रजाः) प्रजाओं को, और (कालः) काल ने (प्रजापतिम्) प्रजापति [प्रजापालक मनुष्य] को (असृजत) उत्पन्न किया है । (कालात्) काल से (स्वयम्भूः) स्वयम्भू अपने आप उत्पन्न होने वाला] (कश्यपः) कश्यप [द्रष्टा परमेश्वर] और (कालात्) काल से (तपः) तप [ब्रह्मचर्य आदि नियम] (अजायत) प्रकट हुआ है ॥१०॥

भावार्थ—प्रलय के पीछे सृष्टि की आदि में काल के प्रभाव से सब प्रजायें और प्रजापालक राजा आदि उत्पन्न होते हैं, और तभी अजन्मा परमात्मा अपने गुणों और अद्भुत रचनाओं और नियमों के कारण प्रसिद्ध होता है ॥ १० ॥

सूक्तम् ५४ [कालसूक्तम्] ॥

१—५ ॥ कालो देवता ॥ १ निचृदनुष्टुप्; २ गायत्री ; ३, ४ अनुष्टुप्; ५ अतिशकरी ॥

स्थितम् (कालः) (ह) एव (ब्रह्म) प्रवृद्धमन्नम् (बिभर्ति) पालयति (परमेष्ठिनम्) सर्वोत्कृष्टे पदे स्थितं पुरुषम् ॥

१०—(कालः) (प्रजाः) जायमानान् जीवान् (असृजत) उदपादयत् (कालः) (अग्रे) सृष्ट्यादौ (प्रजापतिम्) प्रजापालकं मनुष्यम् (स्वयम्भूः) स्वयमुत्पन्नः परमेश्वरः (कश्यपः) पश्यकः । द्रष्टा (कालात्) (तपः) ब्रह्मचर्यादिव्रतम् (कालात्) (अजायत) प्रकटोऽभवत् ॥

• कालमहिमोपदेशः—काल की महिमा का उपदेश ॥

कालादापः समभवन् कालाद् ब्रह्म तपो दिशः ।
कालेनोदेति सूर्यः काले नि विशते पुनः ॥ १ ॥

कालात् । आपः । सम् । अभवन् । कालात् । ब्रह्म । तपः । दिशः ॥ कालेन । उत् । एति । सूर्यः । काले । नि । विशते । पुनः ॥ १

भाषार्थ—(कालात्) काल [गिनती करने वाले समय] से (आपः) प्रजायें, (कालात्) काल से (ब्रह्म) वेदज्ञान, (तपः) तप [ब्रह्मचर्यादि नियम] और (दिशः) दिशायें (सम् अभवन्) उत्पन्न हुयी हैं। (कालेन) काल के साथ (सूर्यः) सूर्य (उत् एति) निकलता है, (काले) काल में (पुनः) फिर (नि विशते) डूब जाता है ॥ १ ॥

भावार्थ—समय के प्रभाव से प्रलय के पीछे परमात्मा सब पदार्थों और नियमों को उत्पन्न करता और प्रलय समय में लय कर देता है, जैसे सूर्य पृथिवी के सन्मुख होने से दिखाई देता और पृथिवी की आड़ में होने से अदृश्य हो जाता है ॥ १ ॥

कालेन वातः पवते कालेन पृथिवी मही ।
द्यौर्मही काल आहिता ॥ २ ॥

कालेन । वातः । पवते । कालेन । पृथिवी । मही ॥
द्यौः । मही । काले । आऽहिता ॥ २ ॥

भाषार्थ—(कालेन) काल [समय] के साथ (वातः) पवन (पवते) शुद्ध करता है, (कालेन) काल के साथ (पृथिवी) पृथिवी (मही) बड़ी है।

१—(कालात्) सू० ५३ । म० १ । संख्याकारकात् समयात् (आपः) आप्ताः प्रजाः (सम् अभवन्) अजायन्त (कालात्) (ब्रह्म) वेदज्ञानम् (तपः) ब्रह्मचर्यादिव्रतम् (दिशः) प्राच्याद्याः (कालेन) (उदेति) उदयं गच्छति (सूर्यः) गमनशील आदित्यः (काले) (नि) नीचैः (विशते) प्रविश्यते । विलीयते (पुनः) सायङ्काले ॥

२—(कालेन) (वातः) वायुः (पवते) पुनाति । शोधयति (कालेन)

(काले) काल में (मही) बड़ा (द्यौः) आकाश (आहिता) रक्खा है ॥२॥

भावार्थ—समय के कारण वायु, पृथिवी, आकाश आदि के परमाणु संयोग पाकर साकार होकर संसार का उपकार करते हैं ॥ २ ॥

कालो ह भूतं भव्यं च पुत्रो अजनयत् पुरा ।
कालादृचः समभवन् यजुः कालादजायत ॥ ३ ॥

कालः । ह । भूतम् । भव्यम् । च । पुत्रः । अजनयत् । पुरा॥ कालात् । ऋचः । सम् । अभवन् । यजुः । कालात् । अजायत॥३

भाषार्थ—(कालः) कालरूपी (पुत्रः) पुत्र ने (ह) ही (भूतम्) बीता हुआ (च) और (भव्यम्) होने वाला (पुरा) पहिले (अजनयत्) उत्पन्न किया है। (कालात्) काल से (ऋचः) ऋचायें [गुण प्रकाशक विद्यायें] (सम् अभवन्) उत्पन्न हुयी हैं, (कालात्) काल से (यजुः) यजुर्वेद [सत्कर्मों का ज्ञान] (अजायत) उत्पन्न हुआ है ॥ ३ ॥

भावार्थ—नित्य वर्तमान काल पिता के समान पहिले और पुत्र के समान पीछे भी विद्यमान रहता है—[देखो गत सूक्त मन्त्र ४] । काल के ही प्रभाव से सब आगे पीछे की सृष्टि और वेदों का प्रादुर्भाव होता है ॥ ३ ॥

कालो यज्ञं समैरयद्देवेभ्यो भागमक्षितम् ।
काले गन्धर्वाप्सरसः काले लोकाः प्रतिष्ठिताः ॥ ४ ॥

कालः । यज्ञम् । सम् । ऐरयत् । देवेभ्यः । भागम् । अक्षि-तम् ॥ काले । गन्धर्व-अप्सरसः । काले । लोकाः । प्रति-स्थिताः ॥ ४ ॥

(पृथिवी) (मही) महती वर्तते (द्यौः) आकाशः (मही) महती (काले) (आहिता) स्थापिता॥

३—(कालः) (ह) एव (भूतम्) अतीतम् (भव्यम्) भविष्यत् (च) पुत्रः) पुत्र इव पश्चाद् वर्तमानः (अजनयत्) उत्पादितवान् (पुरा) पूर्वम् (कालात्) (ऋचः) ऋग्वेदमन्त्राः । गुणप्रकाशिका विद्याः (सम् अभवन्) अजायन्त (यजुः) यजुर्वेदः सत्कर्मणां ज्ञानम् (कालात्) (अजायत) ॥

भाषार्थ—(कालः) काल ने (यज्ञम्) यज्ञ [सत्कर्म] को (देवेभ्यः) विद्वानों के लिये (अक्षितम्) अक्षय (भागम्) भाग (सम्) पूरा पूरा (ऐरयत्) भेजा है। (काले) काल में (गन्धर्वाप्सरसः) गन्धर्व [पृथिवी पर धरे हुये पदार्थ] और अप्सरायें [आकाश में चलने वाले पदार्थ], और (काले) काल में (लोकाः) सब लोक (प्रतिष्ठिताः) रक्खे हुये हैं ॥ ४ ॥

भावार्थ—समय के उपयोग से विद्वान् लोग सत्कर्म करके सद्गति पाते हैं और काल में ही संसार के सब पदार्थ ठहरे हैं ॥ ४ ॥

कालेयमङ्गिरा देवोऽथर्वा चाधि तिष्ठतः। इमं च लोकं परमं च लोकं पुण्यांश्च लोकान् विधृतीश्च पुण्याः। सर्वांल्लोकानभिजित्य ब्रह्मणा कालः स ईयते परमो नु देवः ॥ ५ ॥

काले। अयम्। अङ्गिराः। देवः। अथर्वा। च। अधि। तिष्ठतः ॥ इमम्। च। लोकम्। परमम्। च। लोकम्। पुण्यान्। च। लोकान्। वि-धृतीः। च। पुण्याः ॥ सर्वान्। लोकान्। अभि-जित्य। ब्रह्मणा। कालः। सः। ईयते। परमः। नु। देवः ॥ ५ ॥

भाषार्थ—(काले) काल [समय] में (अयम्) यह (अङ्गिराः) अङ्गिरा [ज्ञानवान्] (देवः) व्यवहार कुशल मनुष्य (च) और (अथर्वा) अङ्गिरा [निश्चल स्वभाव ऋषि] (अधि) अधिकार पूर्वक (तिष्ठतः) दोनों स्थित हैं।

४—(कालः) (यज्ञम्) सद्व्यवहारम् (सम्) सम्यक् (ऐरयत्) प्रेरितवान् (देवेभ्यः) विद्वद्भ्यः (भागम्) अंशम् (अक्षितम्) अक्षीणम् (काले) (गन्धर्वाप्सरसः) अ० १६। ३६। ६। गवि पृथिव्यां धृताः पदार्थाः, अप्सु आकाशे सरणशीलाश्च पदार्थाः (काले) (लोकाः) सूर्यादयः (प्रतिष्ठिताः) दृढं स्थिताः ॥

५—(काले) (अयम्) (अङ्गिराः) अ० २। १२। ४। अगि गतौ—असि, इरुडागमः। ज्ञानवान् पुरुषः (देवः) व्यवहारकुशलः (अथर्वा) अ० ४। १। ७। अ+थर्व चरणे गतौ—वनिप्, वकारलोपः। निश्चलस्वभाव ऋषिः (च)

(इमम्) इस (लोकम्) लोक को (च च) और (परमम्) सब से ऊंचे (लोकम्) लोक को (च) और (पुण्यान्) पुण्य (लोकान्) लोकों को (च) और (पुण्याः) पुण्य (विधृतीः) विविध धारण शक्तियों को, [अर्थात्] (सर्वान्) सब (लोकान्) लोकों को (अभिजित्य) सर्वथा जीतकर, (ब्रह्मणा) ब्रह्म [परमेश्वर] के साथ, (सः) वह (परमः) सब से बड़ा (देवः) दिव्य (कालः) काल (नु) शीघ्र (ईयते) चलता है ॥ ५ ॥

भावार्थ—काल के सादर निरन्तर सेवन से मनुष्य ज्ञानी ऋषि होकर और सब व्यवहारों और समाजों में प्रतिष्ठा पाकर परम गति प्राप्त कर आनन्द भोगते हैं ॥ ५ ॥

इति षष्ठोऽनुवाकः ॥

अथ सप्तमोऽनुवाकः ॥

सूक्तम् ५५ ॥

१—६ ॥ अग्निर्देवता ॥ १ त्रिष्टुप्; २ निचृदार्षी पङ्क्तिः; ३, ४ निचृत् त्रिष्टुप्; ५ विराडार्षी पङ्क्तिः; ६ आर्षी बृहती ॥

गृहस्थधर्मोपदेशः—गृहस्थ धर्म का उपदेश ॥

रात्रिंरात्रिमप्रयातं भरन्तोऽश्वायेव तिष्ठते घासमस्मै । रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥ १ ॥

रात्रिम्-रात्रिम् । अप्र-यातम् । भरन्तः । अश्वाय-इव । तिष्ठते । घासम् । अस्मै ॥ रायः । पोषेण । सम् । इषा । मदन्तः । मा । ते । अग्ने । प्रति-वेशाः । रिषाम ॥ १ ॥

भाषार्थ—(रात्रिंरात्रिम्) रात्रि रात्रि को (अस्मै) इस [गृहस्थ] के लिये (अप्रयातम्) पीड़ा न देने वाले (घासम्) भोजन योग्य पदार्थ को,

---

(अधि) अधिकृत्य (तिष्ठतः) वर्तते (इमम्) (च) (लोकम्) दृश्यमानं स्थानम् (परमम्) उत्कृष्टम् (च) (पुण्यान्) शुद्धान् । शुभान् (च) (लोकान्) (विधृतीः) विविधधारिकाः शक्तीः (सर्वान्) (लोकान्) (अभिजित्य) अभिभूय (ब्रह्मणा) परमात्मना सह (कालः) (सः) प्रसिद्धः (ईयते) ईङ् गतौ-लट् । गच्छति (परमः) उत्कृष्टः (नु) शीघ्रम्) (देवः) दिव्यः ॥

१—(रात्रिंरात्रिम्) प्रतिरात्रिम् (अप्रयातम्) यत ताडने णिजन्तात्—क्विप । अताडकम् । मुखप्रदम (भरन्तः) धरन्तः । पोषयन्तः (अश्वाय)

(तिष्ठते) थान पर ठहरे हुये (अश्वाय) घोड़े के लिये (इव) जैसे [घास आदि को], (भरन्तः) धरते हुये, (रायः) धन की (पोषेण) पुष्टि से और (इषा) अन्न से (सम्) अच्छे प्रकार (मदन्तः) आनन्द करते हुये, (ते) तेरे (प्रतिवेशाः) सन्मुख रहने वाले हम, (अग्ने) हे अग्नि ! [तेजस्वी विद्वान्] (मा रिषाम) न दुखी होवें ॥ १ ॥

भावार्थ—गृहस्थ लोग, जैसे रात्रि में थके घोड़े को घास अन्न आदि देकर प्रसन्न करते हैं, वैसे ही मुख्य परिश्रमी पुरुष को आदर करके सुखी रक्खें ॥ १ ॥

यह मन्त्र कुछ भेद से यजुर्वेद में है—११ । ७५ और ऊपर आ चुका है—अ० ३ । १५ । ८ ॥

या ते वसोर्वात इषुः सा त एषा तया नो मृड ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम ॥२

या । ते । वसोः । वातः । इषुः । सा । ते । एषा । तया । नः । मृड ॥ रायः । पोषेण । सम् । इषा । मदन्तः । मा । ते । अग्ने । प्रति-वेशाः । रिषाम ॥ २ ॥

भाषार्थ—[हे विद्वन् !] (ते वातः) तुझ चलते फिरते की [हमारे लिये] (वसोः) उत्तम पदार्थ की (या) जो (इषुः) इच्छा है, (सा) सो (एषा) वह (ते) तेरी [ही] है, (तया) उस [इच्छा] से (नः) हमें (मृड) सुखी कर । (रायः) धन की (पोषेण) पुष्टि से और (इषा) अन्न से (सम्) अच्छे प्रकार (मदन्तः) आनन्द करते हुये, (ते) तेरे (प्रतिवेशाः)

घोटकाय (इव) यथा (तिष्ठते) स्वस्थाने वर्तमानाय (घासम्) भक्षणीयं पदार्थम् (रायः) धनस्य (पोषेण) वर्धनेन (सम्) सम्यक् (इषा) अन्नेन (मदन्तः) हृष्यन्तः (ते) तव (अग्ने) हे तेजस्विन् विद्वन् (प्रतिवेशाः) प्रत्यक्षं वर्तमानाः (मा रिषाम) कर्मणि कर्तृप्रयोगः । हिंसिता मा भूम ॥

२—(या) इच्छा (ते) तव (वसोः) श्रेष्ठपदार्थस्य (वातः) वा गतिगन्धनयोः—शतृ । गच्छतः पुरुषस्य (इषुः) इच्छा (सा) तादृशी (ते) तव

सन्मुख रहने वाले हम, (अग्ने) हे अग्नि ! [तेजस्वी विद्वान्] (मा रिषाम) न दुखी होवें ॥ २ ॥

भावार्थ—जो मनुष्य दूसरों की उन्नति का प्रयत्न करता है, वह अपनी ही उन्नति करता है, इस से प्रत्येक मनुष्य पुरुषार्थ करके सब को सुख पहुंचावे ॥ २ ॥

सायंसायं गृहपतिर्नो अग्निः प्रातःप्रातः सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधि वयं त्वेन्धानास्तन्वं पुषेम ॥ ३ ॥

सायम्-सायम् । गृह-पतिः । नः । अग्निः । प्रातः-प्रातः । सौमनसस्य । दाता ॥ वसोः-वसोः । वसु-दानः । एधि । वयम् । त्वा । इन्धानाः । तन्वम् । पुषेम ॥ ३ ॥

प्रातः प्रातर्गृहपतिर्नो अग्निः सायंसायं सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतंहिमा ऋधेम ॥ ४ ॥

प्रातः-प्रातः । गृह-पतिः । नः । अग्निः । सायम्-सायम् । सौमनसस्य । दाता ॥ वसोः-वसोः । वसु-दानः । एधि । इन्धानाः । त्वा । शतम्-हिमाः । ऋधेम ॥ ४ ॥

भाषार्थ—(सायंसायम्) सायं सायङ्काल में (नः) हमारे (गृहपतिः) घरों का रक्षक, और (प्रातःप्रातः) प्रातः प्रातःकाल में (सौमनसस्य) सुख का (दाता) देने वाला (अग्निः) अग्नि [ज्ञानवान् परमेश्वर वा विद्वान् पुरुष वा भौतिक अग्नि] तू (वसोर्वसोः) उत्तम उत्तम प्रकार के (वसुदानः)

(एषा) इच्छा वर्तते (तया) इच्छया (नः) अस्मान् (मृड) सुखय । अन्यत् पूर्ववत्—म० १ ॥

३—(सायंसायम्) प्रतिसायङ्कालम् (गृहपतिः) गृहाणां रक्षकः (नः) अस्माकम् (अग्निः) ज्ञानवान् परमेश्वरः पुरुषो वा भौतिकाग्निर्वा त्वम् (प्रातः-प्रातः) सर्वदा प्रातःकाले (सौमनसस्य) आनन्दस्य (दाता) वसोर्वसोः उत्तमो-त्तमप्रकारस्य (वसुदानः) धनस्य दाता (एधि) भव (वयम्) (त्वा) त्वाम्

धन का देने वाला (एधि) हो, (त्वा) तुझ को (इन्धानाः) प्रकाशित करते हुये (वयम्) हम लोग (तन्वम्) शरीर को (पुषेम) पुष्ट करें ॥ ३ ॥

(प्रातःप्रातः) प्रातः प्रातःकाल में (नः) हमारे (गृहपतिः) घरों का रक्षक, और (सायंसायम्) सायं सायंकाल में (सौमनसस्य) सुख का (दाता) देने वाला (अग्निः) अग्नि [ज्ञानवान् परमेश्वर वा विद्वान् पुरुष वा भौतिक अग्नि] तू (वसोर्वसोः) उत्तम उत्तम प्रकार के (वसुदानः) धन का देने वाला (एधि) हो, (त्वा) तुझको (इन्धानाः) प्रकाशित करते हुये (शतं—हिमाः) सौ शीतल ऋतुओं वाले हम लोग (ऋधेम) बढ़ते रहें ॥ ४ ॥

भावार्थ—मनुष्यों को परमेश्वर की उपासना, विद्वानों के सत्संग और अग्निहोत्र के अनुष्ठान से स्वास्थ्य बढ़ाकर धन वृद्धि करनी चाहिये ॥ ३,४ ॥

मन्त्र ३, ४ महर्षि दयानन्द कृत ऋग्वेदादि भाष्य भूमिका पञ्च महायज्ञ विषय में व्याख्यात हैं। मन्त्र ३ का चौथा पाद आचुका है—अ० ५ । ३ । १ ॥

अपश्चा दग्धान्नस्य भूयासम् । अन्नादायान्नपतये रुद्राय नमो अग्नये । सभ्यः सभां मे पाहि ये च सभ्याः सभासदः ॥ ५ ॥

अपश्चा । दग्ध-अन्नस्य । भूयासम् ॥ अन्न-अदाय । अन्न-पतये । रुद्राय । नमः । अग्नये ॥ सभ्यः । सभाम् । मे । पाहि ये । च । सभ्याः । सभा-सदः ॥ ५ ॥

भाषार्थ—मैं (दग्धान्नस्य) जले हुये अन्न के (अपश्चा) न पीछे [जाने वाला] (भूयासम्) होऊं । (अन्नादाय) अन्न खिलाने वाले, (अन्नपतये) अन्न के स्वामी (रुद्राय) ज्ञानदाता, (अग्नये) ज्ञानी [पुरुष] के लिये (नमः) नम-

---

(इन्धानाः) प्रकाशयन्तः (तन्वम्) शरीरम् (पुषेम) पोषयेम । पुष्टं कुर्याम ॥

४—अस्यार्थः पूर्ववद् विज्ञेयः । विशेषस्तु व्याख्यायते (शतंहिमाः) शतं हिमानि शतं हेमन्तर्तवो येषां ते तथाभूताः (ऋधेम) ऋधु वृद्धौ । वर्धेमहि ॥

५—(अपश्चा) पश्च पश्चा चच्छन्दसि । पा० ५ । ३ । ३३ । इति पश्चा-शब्दः, नञ्समासः । अपश्चात् । न पश्चाद्गामी इत्यर्थः (दग्धान्नस्य) दग्धस्य भस्मीभूतस्य निःसारस्य भोजनस्य (भूयासम्) (अन्नादाय) अन्नस्य भोजयित्रे (अन्नपतये) अन्नस्य स्वामिने (रुद्राय) ज्ञानप्रदाय (नमः) सत्कारः (अग्नये)

स्कार है। (सभ्यः) सभा के योग्य तू (मे) मेरी (सभाम्) सभा [सभा की व्यवस्था] की (पाहि) रक्षा कर, (च) और [वे भी रक्षा करें] (ये) जो (सभ्याः) सभा के योग्य (सभासदः) सभासद हैं ॥ ५ ॥

भावार्थ—जैसे जले हुये अन्न को निःसार समझ कर छोड़ देते हैं, वैसे ही मनुष्य व्यर्थ निष्फल कामों में प्रयत्न न करें। अन्न आदि आवश्यक पदार्थों का संग्रह रक्खें, और राजप्रबन्ध से सभा व्यवस्था अर्थात् पंचायत बनाकर योग्य सभासदों को धर्म पथ में लगाये रहें ॥ ५ ॥

इस मन्त्र का अन्तिम भाग कुछ भेद से व्याख्यात है—महर्षि दयानन्द कृत संस्कार विधि गृहाश्रम प्रकरण, सत्यार्थ प्रकाश समुल्लास ६ राजधर्म, और ऋग्वेदादि भाष्य भूमिका राजप्रजाधर्म ॥

त्वमिन्द्रा पुरुहूत विश्वमायुर्व्य॑श्नवत् ।
अहरहर्बलिमित्ते हरन्तोऽश्वायेव तिष्ठते घासमग्ने ॥६॥

त्वम् । इन्द्र । पुरु-हूत । विश्वम् । आयुः । वि । अश्नवत् ॥
अहः-अहः । बलिम् । इत् । ते । हरन्तः । अश्वाय-इव । तिष्ठते । घासम् । अग्ने ॥ ६ ॥

भाषार्थ—(पुरुहूत) हे बहुतों से बुलाये गये (इन्द्र) परम ऐश्वर्य वाले राजन् ! (त्वम्) तू (विश्वम्) पूर्ण (आयुः) जीवन को (वि) विविध प्रकार (अश्नवत्) प्राप्त हो। (अग्ने) हे ज्ञानी राजन् ! (ते) तेरे लिये (इत्) ही (अहरहः) दिन दिन (बलिम्) बलि [कर] (हरन्तः) लाते हुये [हम हैं],

---

विदुषे पुरुषाय (सभ्यः) सभायोग्यस्त्वम् (सभाम्) सभाव्यवस्थाम् (मे) मम (पाहि) रक्ष (ये) (च) तेऽपि सभां पान्तु (सभ्याः) सभार्हाः (सभासदः) सभायां सदनशीलाः। सामाजिकाः ॥

६—(त्वम्) (इन्द्र) हे परमैश्वर्यवन् राजन् (पुरुहूत) हे बहुभिराहूत (विश्वम्) पूर्णम् (आयुः) जीवनम् (वि) विविधम् (अश्नवत्) अश्नोतेर्लेटि अडागमः। तिङां तिङो भवन्ति। वा० पा० ७। १। ३९। मध्यमपुरुषस्य प्रथमः। अश्नवः। अश्नुहि। प्राप्नुहि (अहरहः) प्रतिदिनम् (बलिम्) करम् (इत्) एव (ते) तुभ्यम् (हरन्तः) प्रापयन्तो वयम् (अश्वाय) (इव) यथा

हैं], (इव) जैसे (तिष्ठते) थान पर ठहरे हुये (अश्वाय) घोड़े को (घासम्) घास [लाते हैं] ॥ ६ ॥

भावार्थ—सब मनुष्य धन आदि से प्रधान पुरुष का सत्कार करते रहें, जिस से वह पूर्ण आयु प्राप्त करके सब की रक्षा में तत्पर रहे ॥ ६ ॥

यह मन्त्र कुछ भेद से महर्षि दयानन्दकृत ऋग्वेदादि भाष्यभूमिका बलिवैश्वदेव विषय में व्याख्यात है ॥

सूक्तम् ५६ [स्वप्नसूक्तम्] ॥

१—६ ॥ स्वप्नो देवता ॥ १, २, ६ त्रिष्टुप्; ३, ४ निचृत् त्रिष्टुप्; ५ आर्षी त्रिष्टुप् ॥

निद्रात्यागोपदेशः—निद्रा त्याग का उपदेश ॥

यमस्य॑ लो॒कादध्या ब॑भूवि॒थ प्रम॑दा॒ मर्त्या॒न् प्र यु॑नक्षि॒ धीर॑ः।
एका॒किना॒ सुरथं॑ यासि वि॒द्वान्त्स्वप्नं॒ मिमा॑नो॒ असु॑रस्य॒ योनौ॑॥१॥

यमस्य॑ । लो॒कात् । अधि॑ । आ । ब॒भू॒वि॒थ॒ । प्र॒-मदा॑ । मर्त्या॑न् । प्र । यु॒न॒क्षि॒ । धीर॑ः ॥ ए॒का॒किना॑ । स॒-रथ॑म् । या॒सि॒ । वि॒द्वान् । स्वप्न॑म् । मिमा॑नः । असु॑रस्य । योनौ॑ ॥ १ ॥

भाषार्थ—[हे स्वप्न !] (यमस्य) यम [मृत्यु] के (लोकात्) लोक से (अधि) अधिकार पूर्वक (आ बभूविथ) तू आया है, (धीरः) धीर [धैर्यवान्] तू (प्रमदा) आनन्द के साथ (मर्त्यान्) मनुष्यों को (प्र युनक्षि) काम में लाता है। (असुरस्य) प्राण वाले [जीव] के (योनौ) घर में (स्वप्नम्) निद्रा (मिमानः) करता हुआ (विद्वान्) जानकार तू (एकाकिना) एकाकी

(तिष्ठते) स्वस्थाने वर्तमानाय (घासम्) भक्षणीयं पदार्थम् (अग्ने) हे विद्वन् राजन् ॥

१—(यमस्य) मृत्योः (लोकात्) स्थानात् (अधि) अधिकृत्य (आ बभूविथ) प्राप्तोऽसि (प्रमदा) प्रकृष्टसुखेन (मर्त्यान्) मनुष्यान् (प्र युनक्षि) प्रयुक्तान् करोषि (धीरः) धैर्यवांस्त्वम् (एकाकिना) एकादाकिनिच्चासहाये । पा० ५ । ३ । ५२ । एक—आकिनिच् । असहायेन मृत्युना (सरथम्) समाने रथे भूत्वा (यासि) गच्छसि (विद्वान्) जानन् (स्वप्नम्) निद्राम् (मिमानः)

[मृत्यु] के साथ (सरथम्) एक रथ में होकर (यासि) चलता है ॥ १ ॥

भावार्थ—स्वप्न वा आलस्य के कारण अवसर चूककर मनुष्य कष्टों में पड़कर मृत्यु पाते हैं ॥ १ ॥

इस सूक्त का अर्थ अधिक विचारो और मिलान करो—अ० का० ६ । सू० ४६ तथा का० १६ । सू० ५ ॥

बुन्धस्त्वाग्रे विश्वचया अपश्यत् पुरा रात्र्या जनितोरेके अह्नि । ततः स्वप्नेदमध्या बभूविथ भिषग्भ्यो रूपमपगूहमानः ॥ २ ॥

बुन्धः । त्वा । अग्रे । विश्व-चयाः । अपश्यत् । पुरा । रात्र्याः । जनितोः । एके । अह्नि ॥ ततः । स्वप्न । इदम् । अधि । आ । बभूविथ । भिषक्-भ्यः । रूपम् । अप-गूहमानः ॥ २ ॥

भाषार्थ—[हे स्वप्न !] (विश्वचयाः) संसार के संचय करने वाले (बन्धः) प्रबन्ध कर्ता [परमेश्वर] ने (त्वा) तुझे (अग्रे) पहिले ही [पूर्व जन्म में] (रात्र्याः) रात्रि [प्रलय] के (जनितोः) जन्म से (पुरा) पहिले (एके अह्नि) एक दिन [एक समय] में (अपश्यत्) देखा है । (ततः) इसी से (स्वप्न) हे स्वप्न ! (भिषग्भ्यः) वैद्यों से (रूपम्) [अपना] रूप (अपगूहमानः) छिपाता हुआ तू (इदम्) इस [जगत्] में (अधि) अधिकार पूर्वक (आ बभूविथ) व्यापा है ॥ २ ॥

निर्मिमाणः कुर्वन् (असुरस्य) प्राणवतो जीवस्य (योनौ) गृहे ॥

२—(बन्धः) प्रबन्धकः परमेश्वरः (त्वा) (अग्रे) पूर्वकाले (विश्वचयाः) चिञ् चयने—असुन् । संसारस्य चेता । स्रष्टा (अपश्यत्) दृष्टवान् (पुरा) पूर्वम् (रात्र्याः) प्रलयरूपरात्रिकालस्य (जनितोः) जनी प्रादुर्भावे-तोसुन् । जन्मतः सकाशात् (एके) एकस्मिन् (अह्नि) दिने । समये (ततः) तस्मात् कारणात् (स्वप्न) (इदम्) दृश्यमानं जगत् (अधि) अधिकृत्य (आ बभूविथ) भू प्राप्तौ-लिट् । व्याप्तवानसि (भिषग्भ्यः) चिकित्सकेभ्यः सकाशात् (रूपम्) स्वभावम् (अपगूहमानः) आच्छादयन् ॥

भावार्थ—यह स्वप्न वा आलस्य आदि दोष पहिले जन्म के कर्म फलों के संस्कार से हैं और ईश्वर नियम से आत्मा में ऐसा गुण है कि विद्वान् लोग उसकी ठीक ठीक व्यवस्था नहीं जानते। मनुष्य ऐसा विचार कर उत्तम कामों को सदा शीघ्र करें ॥ २ ॥

बृहद्गावासुरेभ्योऽधि देवानुपावर्तत महिमानमिच्छन्। तस्मै स्वप्नाय दधुराधिपत्यं त्रयस्त्रिंशासः स्वरानशानाः ॥ ३ ॥

बृहत्-गावा। असुरेभ्यः। अधि। देवान्। उप। अवर्तत। महिमानम्। इच्छन् ॥ तस्मै। स्वप्नाय। दधुः। आधिपत्यम्। त्रयः-त्रिंशासः। स्वः। आनशानाः ॥ ३ ॥

भाषार्थ—[जो स्वप्न] (बृहद्गावा) बड़ी गति वाला, (महिमानम्) [अपनी] महिमा (इच्छन्) चाहता हुआ, (असुरेभ्यः अधि) असुरों [अविद्वानों] के पास से (देवान्) विद्वानों के (उप अवर्तत) पास वर्तमान हुआ है। (तस्मै स्वप्नाय) उस स्वप्न को (स्वः) सुख (आनशानाः) पा चुकने वाले (त्रयस्त्रिंशासः) तेतीस संख्या वाले [देवताओं] ने (आधिपत्यम्) अधिपतिपन (दधुः) दिया है ॥ ३ ॥

भावार्थ-तेतीस देवता, आठ वसु, ग्यारह रुद्र, बारह आदित्य वा महीने, एक इन्द्र वा बिजुली, और एक प्रजापति वा यज्ञ हैं [देखो-अथर्व० ६। १३६। १]। भावार्थ विचारना चाहिये ॥ ३ ॥

नैतां विदुः पितरो नोत देवा येषां जल्पिश्चरत्यन्तरेदम्। त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः ॥४॥

३—(बृहद्गावा) आतोमनिन्क्वनिब्वनिपश्च। पा० ३। २। ७४। गाङ् गतौ—क्वनिप्। महागतिशीलः (असुरेभ्यः) सुरविरोधिभ्यः। अविद्वद्भ्यः (अधि) (देवान्) विदुषः पुरुषान् (उपावर्तत) समीपं प्राप्तवान् (महिमानम्) स्वप्रभावम्। (इच्छन्) कामयमानः (तस्मै) तादृशाय (स्वप्नाय) (दधुः) दत्तवन्तः (आधिपत्यम्) साम्राज्यम् (त्रयस्त्रिंशासः) सर्वेषां त्रयस्त्रिंशत्संख्यापूरणत्वात्-डट्प्रत्ययः। त्रयस्त्रिंशत् संख्याकाः। अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, इन्द्रः प्रजापतिश्चेति-अथर्व०। ६। १३६। १ (स्वः) सुखम् (आनशानाः) अश्नोतेर्लिटः कानच्। प्राप्तवन्तः ॥

न । एताम् । विदुः । पितरः । न । उत । देवाः । येषाम् । जल्पिः । चरति । अन्तरा । इदम् ॥ त्रिते । स्वप्नम् । अदधुः । आप्त्ये । नरः । आदित्यासः । वरुणेन । अनु-शिष्टाः ॥ ४ ॥

भाषार्थ—(एताम्) इस [आगे वर्णित वाणी] को (न) न तो (पितरः) पालन करने वाले, (उत) और (न) न (देवाः) विद्वान् लोग (विदुः) जानते हैं, (येषाम्) जिन [लोगों] की (जल्पिः) वाणी (इदम् अन्तरा) इस [जगत्] के बीच (चरति) विचरती है—"(वरुणेन) श्रेष्ठ [परमात्मा] करके (अनुशिष्टाः) शिक्षा किये गये, (आदित्यासः) अखण्डव्रत वाले (नरः) नेता लोगों ने (आप्त्ये) आप्तों [सत्य वक्ताओं] के हितकारी (त्रिते) तीनों [लोकों] के विस्तार करने वाले [परमेश्वर] में (स्वप्नम्) स्वप्न को (दधुः) धारण किया है" ॥ ४ ॥

भावार्थ—विचारना चाहिये ॥ ४ ॥

यस्य क्रूरमभजन्त दुष्कृतोऽस्वप्नेन सुकृतः पुण्यमायुः । स्वर्मदसि परमेण बन्धुना तप्यमानस्य मनसोऽधि जज्ञिषे ॥ ५ ॥

यस्य । क्रूरम् । अभजन्त । दुः-कृतः । अस्वप्नेन । सु-कृतः । पुण्यम् । आयुः ॥ स्वः । मदसि । परमेण । बन्धुना । तप्यमानस्य । मनसः । अधि । जज्ञिषे ॥ ५ ॥

भाषार्थ—(दुष्कृतः) दुष्कर्मियों ने (यस्य) जिस [स्वप्न] के

४—(न) निषेधे (एताम्) वक्ष्यमाणां वाणीम् (विदुः) जानन्ति (पितरः) पालकाः (न) निषेधे (उत) अपि च (देवाः) विद्वांसः (येषाम्) (जल्पिः) जल्प व्यक्तायां वाचि—इन्प्रत्ययः । वाणी (चरति) विचरति । वर्तते (इदम् अन्तरा) अस्य जगतो मध्ये (त्रिते) अ० ५ । १ । १ । त्रि+तनु विस्तारे-डप्रत्ययः । लोकत्रयविस्तारके परमात्मनि (स्वप्नम्) (दधुः) धारितवन्तः (आप्त्ये) आप्तानां सत्यवक्तॄणां हिते (नरः) नेतारः (आदित्यासः) अखण्डव्रतिनः (वरुणेन) श्रेष्ठेन परमेश्वरेण (अनुशिष्टाः) निरन्तरमुपदिष्टाः ॥

५—(यस्य) (क्रूरम्) निर्दयं कर्म (अभजन्त) असेवन्त (दुष्कृतः)

(क्रूरम्) क्रूर [निर्दय] कर्म को (अभजन्त) भोगा है, और (अस्वप्नेन) स्वप्न त्याग से (सुकृतः) सुकर्मियों ने (पुण्यम्) पवित्र (आयुः) जीवन [भोगा] है। [हे स्वप्न !] (स्वः) सुख में [वर्तमान] (परमेण) परम (बन्धुना) बन्धु [पुरुष] के साथ (मदसि) तू जड़ होजाता है, और (तप्यमानस्य) सन्ताप को प्राप्त हुये [थके पुरुष] के (मनसः अधि) मन में से (जज्ञिषे) तू प्रकट हुआ है ॥ ५ ॥

भावार्थ—दुष्ट लोग स्वप्न वा आलस्य के कारण महाकष्ट उठाते हैं, और पुण्यात्मा उसके त्याग से आनन्द उठाते हैं। सर्वहितैषी पुरुषार्थी लोगों में उस का प्रभाव नहीं होता, वह पुरुषार्थ हीन थके लोगों में प्रभाव जमाता है॥५॥

विद्म ते सर्वाः परिजाः पुरस्ताद् विद्म स्वप्न यो अधिपा इहा ते। यशस्विनो नो यशसेह पाह्याराद् द्विषेभिरप याहि दूरम् ॥ ६ ॥

विद्म । ते । सर्वाः । परि-जाः । पुरस्तात् । विद्म । स्वप्न । यः । अधि-पाः । इह । ते ॥ यशस्विनः । नः । यशसा । इह । पाहि । आरात् । द्विषेभिः । अप । याहि । दूरम् ॥ ६ ॥

भाषार्थ—(स्वप्न) हे स्वप्न ! (पुरस्तात्) सामने [रहने वाले] (ते) तेरे (सर्वाः) सब (परिजाः) परिवारों [काम क्रोध लोभ आदि] को (विद्म) हम जानते हैं, और [उस परमेश्वर को] (विद्म) हम जानते हैं (यः)

दुष्कर्माणः पापिनः (अस्वप्नेन) स्वप्नत्यागेन (सुकृतः) पुण्यकर्माणः (पुण्यम्) पवित्रम् (आयुः) जीवनम्—अभजन्त, इत्यनुवर्तते (स्वः) सुखे वर्तमानेन (मदसि) मद जाड्ये। जडो मूढो भवसि (परमेण) सर्वोत्कृष्टेन (बन्धुना) बान्धवेन (तप्यमानस्य) सन्तप्यमानस्य। श्रान्तस्य पुरुषस्य (मनसः) अन्तःकरणस्य (अधि) अधिकम् (जज्ञिषे) प्रादुर्बभूविथ ॥

६—(विद्म) जानीमः (ते) तव (सर्वाः) (परिजाः) जनसनखनक्रम०। पा० ३। २। ६७। परि+जनी प्रादुर्भावे—विट्। विड्वनोरनुनासिकस्यात्। पा० ६। ४। ४१। अनुनासिस्य आकारः। परिजनान्। कामक्रोधलोभादीन्

जो (इह) यहां पर (ते) तेरा (अधिपाः) बड़ा राजा है। (यशस्विनः नः) हम यशस्वियों को (यशसा) धन [वा कीर्ति] के साथ (इह) यहां पर (पाहि) पाल (द्विषेभिः) बैर भावों के साथ (आरात्) दूर (दूरम्) दूर (अप याहि) तू चला जा ॥ ६ ॥

भावार्थ—मनुष्यों को चाहिये कि स्वप्न वा आलस्य के कारण अर्थात् काम क्रोध लोभ आदि को त्याग कर परमेश्वर के आश्रय से यशस्वी होकर अपनी सम्पत्ति और कीर्ति को बनाये रक्खें, और कभी परस्पर द्वेष न करें ॥६

सूक्तम् ५७ ॥

१—५ ॥ आत्मा देवता ॥ १ अनुष्टुप्; २ आर्षी पङ्क्तिः; ३ आर्षी त्रिष्टुप्; ४ निचृदष्टिः; ५ भुरिगार्षी जगती ॥

दुष्टस्वप्ननिवारणोपदेशः-बुरे स्वप्न दूर करने का उपदेश ॥

यथा कुलां यथा शुफं यथुर्णं सं नयन्ति ।
एवा दुःष्वप्न्यं सर्वमप्रिये सं नयामसि ॥ १ ॥

यथा । कुलाम् । यथा । शुफम् । यथा । ऋणम् । सम्-नयन्ति ॥ एव । दुः-स्वप्न्यम् । सर्वम् । अप्रिये । सम् । नयामसि १

भाषार्थ—(यथा) जैसे (कलाम्) सोलहवें अंश को और (यथा) जैसे (शफम्) आठवें अंश को और (यथा) जैसे (ऋणम्) [पूरे] ऋण को (संनयन्ति) लोग चुकाते हैं। (एव) वैसे ही (सर्वम्) सब (दुःष्वप्न्यम्) नींद में उठे बुरे विचार को (अप्रिये) अप्रिय पुरुष पर (सम् नयामसि) हम

(पुरस्तात्) अग्रे वर्तमानाः (विघ्न) (स्वप्न) (यः) (अधिपाः) स्वामी। परमेश्वर इत्यर्थः (इह) अत्र (ते) तव (यशस्विनः) कीर्तियुक्तान् (नः) अस्मान् (यशसा) धनेन । कीर्त्या (इह) (पाहि) रक्ष (आरात्) दूरे (द्विषेभिः) द्वेषैः (अप याहि) अपगच्छ (दूरम्) ॥

१—(यथा) येन प्रकारेण (कलाम्) षोडशांशम् (यथा) (शफम्) गवादिपादचतुष्टयस्य द्विखुरत्वाद् एकस्य खुरस्याष्टमांशग्रहणम् । अष्टमांशम् (यथा) (ऋणम्) पुनर्देयत्वेन गृहीतं धनम् (संनयन्ति) सम्यग् गमयन्ति । प्रत्यर्पयन्ति (एव) एवम् (दुःष्वप्न्यम्) कुनिद्राभवं विचारम्

छोड़ते हैं ॥ १ ॥

भावार्थ—जैसे मनुष्य ऋण को थोड़ा थोड़ा करके वा सब एक साथ चुकाते हैं, वैसे ही मनुष्य कुस्वप्न आदि रोगों से निवृत्ति पावें ॥ १ ॥

यह मन्त्र कुछ भेद से आचुका है—अ० ६ । ४६ । ३ और ऋग्वेद में भीहै—८ । ४७ । १७ ॥

सं राजा॑नो अगुः॒ समृ॒णान्य॑गुः॒ सं कु॒ष्ठा अ॑गुः॒ सं क॒ला अ॑गुः ।
सम॒स्मासु॒ यद्दु॒ष्वप्न्यं॒ निर्द्वि॑ष॒ते दु॒ष्वप्न्यं॑ सुवाम ॥ २ ॥

सम् । राजा॑नः । अ॒गुः॒ । सम् । ऋ॒णानि॑ । अ॒गुः॒ । सम् । कु॒ष्ठाः । अ॒गुः॒ । सम् । क॒लाः । अ॒गुः॒ ॥ सम् । अ॒स्मासु॑ । यत् । दुः॒-स्वप्न्य॑म् । निः । द्वि॒ष॒ते । दुः॒-स्वप्न्य॑म् । सु॒वा॒म॒॥२

भाषार्थ—(राजानः) राजा लोग (सम् अगुः) एकत्र हुये हैं, (ऋणानि) अनेक ऋण (सम् अगुः) एकत्र हुये हैं, (कुष्ठाः) कुष्ठ [कूट आदि औषध विशेष] (सम् अगुः) इकट्ठे हुये हैं, (कलाः) कलायें [समय के अंश] (सम् अगुः) एकत्र हुये हैं । (अस्मासु) हम में (यत्) जो (दुःष्वप्न्यम्) दुष्ट स्वप्न (सम्=सम् अगात्) एकत्र हुआ है, (दुःष्वप्न्यम्) उस दुष्ट स्वप्न को (द्विषते) वैर करने वाले के लिये (निः सुवाम) हम बाहर निकालें ॥ २ ॥

भावार्थ—(कुष्ठ) अर्थात् कूट औषध के लिये देखो—अ० १९ । ३९ । जैसे राजा लोग एकत्र होकर संसार के कष्ट दूर करते हैं, वैसे ही वैद्य लोग दुष्ट स्वप्न आदि रोगों का नाश करें ॥ २ ॥

देवा॒नां पत्नी॑नां ग॒र्भ॒ यम॑स्य कर॒ यो भ॒द्रः स्व॑प्न ।

(सर्वम्) (अप्रिये) अहिते । शत्रौ (संनयामसि) संनयामः । स्थापयामः ॥

२—(राजानः) (सम् अगुः) इण् गतौ—लुङ् । संहता अभवन् (ऋणानि) (सम् अगुः) बहूनि अभवन् (कुष्ठाः) अ० १९ । ३९ । १ । रोगाणां निष्कर्षकाः। औषधविशेषाः (सम् अगुः) (कलाः) कालांशाः (सम् अगुः) (सम्) सम् अगात् (अस्मासु) (यत्) (दुःष्वप्न्यम्) दुष्टस्वप्नभावः (द्विषते) द्वेष्ट्रे (दुःष्वप्न्यम्) दुष्टस्वप्नभावम् (निः सुवाम) बहिर्गमयाम ॥

स मम यः पापस्तद्द्विषते प्र हिण्मः ।
मा तृष्टानामसि कृष्णशकुनेर्मुखम् ॥ ३ ॥

देवानाम् । पत्नीनाम् । गर्भ । यमस्य । कर । यः । भद्रः ।
स्वप्न ॥ सः । मम । यः । पापः । तत् । द्विषते । प्र । हिण्मः ॥
मा । तृष्टानाम् । असि । कृष्ण-शकुनेः । मुखम् ॥ ३ ॥

भाषार्थ—(देवानाम्) हे विद्वानों की (पत्नीनाम्) पालन शक्तियों के (गर्भ) गर्भ ! [उदर रूप पोषक] और (यमस्य) हे यम [मृत्यु] के (कर) हाथ ! (स्वप्न) हे स्वप्न ! (यः) जो तू (भद्रः) कल्याणकारी है, (सः) वह (मम) मेरा [होवे], (तत्) इस लिये (यः) जो तू (पापः) पापी [अनहित है, [उसे] (द्विषते) वैरी के लिये (प्र हिण्मः) हम भेजते हैं । (तृष्टानाम्) क्रूरों के मध्य (कृष्णशकुनेः) काले पक्षी [कौवे आदि] का (मुखम्) मुख (मा असि) तू मत हो ॥ ३ ॥

भावार्थ—स्वप्न दो प्रकार के हैं, एक शुभ विद्वानों के हितकारी और दूसरे अशुभ जो दुःखदायी हैं । विद्वान् लोग अपने शुभ विचारों के अनुरूप शुभ स्वप्न देखें और कुविचारों के कारण से कुस्वप्न देखकर शत्रु न बनें ॥ ३ ॥

तं त्वा स्वप्न तथा सं विद्म स त्वं स्वप्नाश्व इव कायमश्व इव नीनाहम् । अनास्माकं देवपीयुं पियारुं वप यदस्मासु दुष्वप्न्यं यद् गोषु यच्च नो गृहे ॥ ४ ॥

३—(देवानाम्) विदुषाम् (पत्नीनाम्) पालनशक्तीनाम् (गर्भ) हे उदरवत् पोषक (यमस्य) मृत्योः (कर) हे हस्त इव हितकर (यः) यस्त्वम् (भद्रः) कल्याणकारी भवसि (स्वप्न) (सः) स त्वम् (मम) भवेः—इति शेषः (यः) त्वम् (पापः) अनिष्टकारी भवसि (तत्) तस्मात् (द्विषते) शत्रवे (प्र हिण्मः) हि गतौ, अन्तर्गतण्यर्थः । प्रेरयामः (तृष्टानाम्) ञितृषा पिपासायाम्—क्त । तृषितानां लोभिनां क्रूराणां मध्ये (मा असि) मा भव (कृष्णशकुनेः) कृष्णपक्षिणः । काकादेः (मुखम्) मुखमिव क्रूरम् ॥

तम् । त्वा । स्वप्न । तथा । सम् । विद्म । सः । त्वम् । स्वप्न । अश्वः-इव । कायम् । अश्वः-इव । नीनाहम् ॥ अनास्माकम् । देव-पीयुम् । पियारुम् । वप । यत् । अस्मासु । दुः-स्वप्न्यम् । यत् । गोषु । यत् । च । नः । गृहे ॥ ४ ॥

भाषार्थ—(स्वप्न) हे स्वप्न ! (तं त्वा) उस तुझ को (तथा) वैसा ही (सम्) पूरा पूरा (विद्म) हम जानते हैं, (सः त्वम्) सो तू, (स्वप्न) हे स्वप्न ! (अश्वः इव) जैसे घोड़ा (कायम्) अपनी पेटी को, और (अश्वःइव) जैसे घोड़ा (नीनाहम्) अपनी बागडोर [को तोड़ डालता है, वैसे], (अनास्माकम्) हमारे न होने वाले (देवपीयुम्) विद्वानों के सताने वाले (पियारुम्) दुःखदायी को (वप) तोड़ डाल और (दुःस्वप्न्यम्) उस दुष्ट स्वप्न को [तोड़ दे], (यत्) जो (अस्मासु) हम में है, (यत्) जो (नः) हमारी (गोषु) गौओं में है, (च) और (यत्) जो (गृहे) घर में है ॥ ४ ॥

भावार्थ—जैसे बलवान् घोड़ा अपनी पेटी और बाग डोर को तोड़ताड़ डालता है, वैसे ही मनुष्य शुभ विचारों द्वारा दुष्ट विचारों को नाश करें और सब को स्वस्थ रक्खें ॥ ४ ॥

४—(तम्) तादृशम् (त्वा) त्वाम् (स्वप्न) (तथा) तेन प्रकारेण (सम्) सम्पूर्णम् (विद्म) जानीमः (सः) (त्वम्) (स्वप्न) (अश्वः) (इव) यथा (कायम्) स्वशरीरसम्बधिनीं पार्श्वरज्जुम् । पेटीम् (अश्वः) (इव) (नीनाहम्) नि+णह बन्धने—घञ् । रश्मिम् । मुखरज्जुम् (अनास्माकम्) युष्मदस्मदोरन्यतरस्यां खञ् च । पा० ४ । ३ । १ । अस्मद्—अण् । योऽस्माकं न भवति तम् (देवपीयुम्) अ० ४ । ३५ । ७ । विदुषां हिंसकम् (पियारुम्) अ० ११ । २ । २१ । पीयतिर्हिंसाकर्मा—निरु० ४ । २५ । अङ्गिमदिमन्दिभ्य आरन् उ० ३ । १३४ । अत्र बाहुलकात् पीयतेः—आरुप्रत्ययो ह्रस्वश्च । हिंसकम् । दुःखप्रदम् (वप) टुवप बीजसन्ताने छेदने च । छिन्धि (यत्) (अस्मासु) (दुष्वप्न्यम्) दुष्टस्वप्नभावः (यत्) (गोषु) धेनुषु (यत्) (च) (नः) अस्माकम् (गृहे) निवासे ॥

अनास्माकस्तद् देवपीयुः पियारुर्निष्कमिव प्रति मुञ्चताम् ।
नवारत्नीनपमया अस्माकं ततः परि ।
दुष्वप्न्यं सर्वं द्विषते निर्दयामसि ॥ ५ ॥

अनास्माकः । तत् । देव-पीयुः । पियारुः । निष्कम्-इव । प्रति । मुञ्चताम् ॥ नव । अरत्नीन् । अप-मयाः । अस्माकम् । ततः । परि ॥ दुः-स्वप्न्यम् । सर्वम् । द्विषते । निः । दयामसि ॥ ५ ॥

भाषार्थ—(अनास्माकः) हमारा न होने वाला, (देवपीयुः) विद्वानों का सताने वाला, (पियारुः) दुःखदायी [शत्रु] (तत्) उस [दुष्ट स्वप्न] को (निष्कम् इव) सुवर्ण के समान (प्रति मुञ्चताम्) धारण करे । (अस्माकम्) हमारे (ततः) उस [स्थान] से [दुष्ट स्वप्न को] (नव) नौ (अरत्नीन्) हाथों भर (परि) अलग करके (अपमयाः) तू दूर ले जा । (सर्वम्) सब (दुःष्वप्न्यम्) दुष्ट स्वप्न को (द्विषते) बैरी के लिये (निः दयामसि) हम बाहर हांकते हैं ॥ ५ ॥

भावार्थ—धर्मात्मा लोग दुष्टों के समान कुविचारों को अपने में न आने देवें, किन्तु उत्तम विचारों को आत्मा में सदा धारण करते रहें ॥ ५ ॥

सूक्तम् ५८ ॥

१–६ ॥ आत्मा देवता ॥ १, ४ त्रिष्टुप्; २ आर्षी पङ्क्तिः; ३ अतिशक्वरी;

५—(अनास्माकः) म० ४ । योऽस्माकं न भवति सः (तत्) दुःष्वप्न्यम् (देवपीयुः) म० ४ । विदुषां हिंसकः (पियारुः) म० ४ । दुःखप्रदः (निष्कम्) सुवर्णम् (इव) यथा (प्रति मुञ्चताम्) धारयतु (नव) (अरत्नीन्) अ+ऋ गतौ—क्नि, रत्निर्बद्धमुष्टिकरः स नास्ति यत्र । विस्तृतकनिष्ठाङ्गुलिमुष्टिकहस्तप्रमाणानि (अपमयाः) मय गतौ भ्वादिः, लेट्, णिजर्थः । अपगमयेः (अस्माकम्) (ततः) तस्मात् स्थानात् (परि) पृथग्भावे (दुःष्वप्न्यम्) दुष्टस्वप्नभावम् (सर्वम्) (द्विषते) शत्रवे (निः दयामसि) दय दानगतिरक्षणहिंसादानेषु । अपगमयामः बहिष्कुर्मः ॥

५ आर्षी त्रिष्टुप्; ६ भुरिगार्षी त्रिष्टुप् ॥

आत्मोन्नत्युपदेशः—आत्मा की उन्नति का उपदेश ॥

घृतस्य॑ जू॒तिः सम॑ना सदे॑वा संवत्स॒रं ह॒विषा॑ व॒र्धय॑न्ती । श्रोत्रं॒ चक्षुः॑ प्रा॒णोऽच्छि॑न्नो नो अ॒स्त्वच्छि॑न्ना व॒यमायु॑षो वर्च॑सः ॥१॥

घृ॒तस्य॑ । जू॒तिः । सम॑ना । स-दे॑वा । स॒म्-व॒त्स॒रम् । ह॒विषा॑ । व॒र्धय॑न्ती ॥ श्रोत्र॑म् । चक्षुः॑ । प्रा॒णः । अच्छि॑न्नः । नः॒ । अ॒स्तु॒ । अच्छि॑न्नाः । व॒यम् । आयु॑षः । वर्च॑सः ॥ १ ॥

